**DHARMASASTRA**

**ACHARYA 2nd YEAR**
**Course/Paper-10**

# स्वशास्त्रीयेतिहास: निबन्धश्च

## *Svaśāstrīyētihāsa: Nibandhaśca*


**CENTER OF DISTANCE & ONLINE EDUCATION**

*(Formerly Directorate of Distance Education)*

**NATIONAL SANSKRIT UNIVERSITY :: TIRUPATI-517 507 (A.P)**

*(Erstwhile Rashtriya Sanskrit Vidyapeetha, Tirupati)*

# प्रथमग्रन्थिः(UNIT-I to UNIT-V )

# आमुखम्
## धर्मशास्त्रेतिहासस्य परिचयात्मकं विवरणम्

पवित्रतमेऽस्मिन् भारतवर्षे पुरुषार्थसाधनभूताः योगीश्वरोक्ताः विष्णूक्ताश्च चतुर्दशविद्या आश्रित्य यानि यानि शास्त्राणि विरचितान्यभूवन् तेषु सर्वेष्वपि शास्त्रेषु वेदानुमापकशास्त्रत्वेन धर्मशास्त्रं विराजतेतराम्, सर्वशास्त्रोपबृंहितवेदाधारेण धर्मार्थकाममोक्षात्मकचतुर्वर्गफलप्राप्तिर्भवतीति सर्वेषां प्रमुखं लक्ष्यम् । तेषु धर्मात्मको यः प्रप्रथमः पुरुषार्थः स एवार्थकाममोक्षाणां परमं साधनम् । धर्मं विनाऽन्येषां पुरुषार्थानां प्राप्तिर्नैव संभवति । अयमेव धर्मः धर्मशास्त्रस्य प्रमुखविचार्य विषयः ।

धर्मशास्त्रं नाम सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्यविवेकप्रतिपादनत्वेन नित्यनियतोपादेयं साक्षाद्वेदानुमापकत्वेन वेदवत् प्रमाणभूतं तपः स्वाध्याय पूतचरित्राणं यमनियमानुष्ठाननिष्ठावतां नित्य निरतिशयप्रयतात्मनां निखिलसंस्कारसंस्कृतानाम् आत्मगुणप्रभास्वर-ज्योतिस्ततिविद्योतितान्तःकरणानां ब्रह्मादिस्तम्भपर्यन्तं संकलभूतहिताकां-क्षिणां रागद्वेषस्पर्शरहितानां नितान्तवाचंयमानां मनुगौतमवसिष्ठादीनाम् अनवरतस्वाध्यायाध्ययनपूत-कष्ठोद्गीर्णत्वेन परमपवित्रं गुणिगणसमादरणीयं सर्वजनग्रहणीयं प्राचीनतमं शास्त्रम् । अस्यैव धर्मशास्त्रस्य ''स्मृति'' रिति अपरा संज्ञा- '' श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृति'' रिति मनुवचनात् । धर्मशास्त्रं विहाय पुराणव्याकरणसांख्यादीनां शास्त्रान्तराणां तु स्मृतिसंज्ञा योगिकी, परन्तु धर्मशास्त्रस्य तु स्मृतिरिति संज्ञा पङ्कजादिवत् योगरूढा । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमिति मध्यपदलोपिकर्मधारयस-मासेन धर्मशास्त्रयोर्मध्ये प्रतिपाद्यप्रतिपादकभावसम्बन्धो वर्त्तत इति सुस्पष्टं भवति । अत्र धर्मो भवति प्रतिपादकः, शास्त्रञ्च भवति प्रतिपादकम् । धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्रं धर्मशास्त्रनाम्ना यद्यप्यभिधीयते तथापि ''धर्मशास्त्रं तु वै स्मृतिः'' इत्यनेन मनुना स्मृतिरूपग्रन्थस्य मुख्यतया धर्मशास्त्रत्वं संकोतितम् । तेन च धर्मविषये परमप्रामाण्यत्वेन श्रुतीनामुल्लखो विहितः । स्मृतिप्रामाण्यमुपजीव्य

जैमिनिप्रणीतं सूत्रद्वयमत्र प्रसङ्गत: विचारणीयम् । यद्यपि धर्मशास्त्रपदेन मन्वादिप्रणीतानि शास्त्राण्येव मुख्यत: बोध्यानि । यथा याज्ञवल्क्येन स्वस्मृतौ स्मृतिप्रणेतृ णां नामानि निर्दिष्टानि । अत्र मिताक्षरायां यद्यपि विज्ञानेश्वरेण सुस्पष्टमेव व्याख्यातम्- नेयं परिसंख्या, किन्तु प्रदर्शनार्थमेतत् । अतो बौधायनादेरपि धर्मशास्त्रत्वमविरुद्धम् । एतेषां प्रत्येकं प्रामाण्येऽपि साकांक्षाणा-माकांक्षापरिपूरणमन्यत: क्रियते । विरोधे विकल्प इति । तथाप्यत्र गौणार्थे मूलस्मृतिग्रन्थानां तेषां क्वचित् टीकारूपेण क्वचिद्वा टीकाया: टिप्पणीरूपेण विरचिता: ग्रन्था: सर्वे धर्मशास्त्रेषु परिगणिता: भवन्ति । अपि च निबन्धाख्यां भजमाना: ग्रन्थविशेषा: अप्यत्रान्तर्भूता: । एते निबन्धार: विभिन्नेषु स्मृतिग्रन्थेषु उल्लिखितानां प्राकरणिकानां वचनानां सामञ्जस्यविधाने मुख्यत: यत्नपरा इति तत्र वैशिष्ट्यमवधेयम् ।

धर्मशास्त्रसहित्यमिदं भागचतुष्टयेन विभक्तम् । यथा- सूत्रसहित्यं, भाष्यसाहित्यं, निबन्धसाहित्यं चेति । वेदाङ्गत्वेन निर्दिष्टकल्पसूत्रादेव सूत्रसाहित्यस्योदभवो जात: । तेन बहूनां धर्मसूत्रग्रन्थानां रचना जाता । तत्र गौतम-बौधायन-आपस्तम्ब-वसिष्ठादय: प्रमुखा: धर्मसूत्रकारा: भवन्ति । तत्परवर्तिकाले स्मृतिग्रन्थानामपि अभ्युदय: संजात: । तेषु स्मृतिग्रन्थेषु, अनुष्ठुप्छन्दोबद्धश्लोका: दृश्यन्ते । तत्र स्मृतिकारेषु मनु-याज्ञवल्क्य-पराशरप्रभृतय: प्रमुखा: स्मृतिकर्त्तारो भवन्ति । क्रमश: समाजे जनानामाचारप्रक्रिया परिवर्तिता, अध्ययनाध्यापनादिक्षेत्रेषु परिवर्त्तनं जातम् । सूत्र-स्मृतिग्रन्थानां पठनेन सर्वै: काठिन्यमनुभूतम् । अत: सूत्रस्मृतिग्रन्थाना-मुपरि भाष्यादिकं धर्मशास्त्रकारै: कृतम् । तेषु भाष्यकारेषु विश्वरुप-मेधातिथि-कुल्लूक-हरदत्तप्रभृतय: प्रमुखा: भवन्ति । कियत्कालात्परं समाजे सर्वैरनुभूतं यत् मूलग्रन्थापेक्षया भाष्यग्रन्थानां पठने पाठने च काठिन्यं जायते । दीर्घसमासयुक्तानां सन्धिबद्धानां च वचनानामपि बाहुल्यं भाष्येष्ववाप्तम् । अत: परं निबन्धग्रन्थानां प्रादुर्भाव: संजात: । निबन्धृभि: विभिन्नेभ्य: प्रामाणिकग्रन्थेभ्य: प्रमाणवचनानि संगृह्य युक्तिप्रमाणाभ्यां धर्मनिबन्धग्रन्था: विरचिता: । एषु निबन्धकारेषु केचन दाक्षिणात्या, अपरे वङ्गीया:, इतरे उत्कलीया:, अन्ये च मैथिला: भवन्ति ।

# अंश - प्रथम:

संरचना

१.१. प्रस्तावना
१.२. उद्देश्यम्
१.३. धर्मशब्दार्थ:
१.४. धर्मलक्षणम्
१.५. दर्शनशास्त्रदृष्ट्या धर्मलक्षणानि

## १.१. प्रस्तावना

वेदानुमापकत्वेनैव धर्मशास्त्रस्य प्रामाण्यम् । समाजशास्त्रत्वेनास्य प्रसिद्धि: सर्वविदिताऽस्ति । समयानुसारं सामाजिकपरिस्थितिमभिलक्ष्य महर्षिभि: शास्त्रस्यास्य प्रणयनं विहितम् । सामाजिकी व्यवस्था एव शास्त्रस्यास्य प्रमुखमुद्देश्यम् । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रम् । अस्य प्रमुखप्रतिपाद्यविषयो भवति धर्म: । अयञ्च प्राचीनभारतीयसंस्कृते: मूलाधारभूत: । महानद इव बह्वीनां धर्मधाराणां संगमेनायं वैपुल्यमवाप । धर्मज्ञानं विना शास्त्रस्यास्याध्यनं सर्वथा व्यर्थमेव । अत: सर्वादौ शास्त्राध्ययनात्पूर्वमेव तदर्थज्ञानं कर्त्तव्यम् ।

## १.२. उद्देश्यम्

प्रियपाठका: ! अंशेऽस्मिन् भवन्त: अधोलिखितान् बिन्दून् आलोचयिष्यन्ति -

- धर्मशब्दस्य निर्वचनं कर्त्तुं प्रभवन्ति ।
- धर्मशब्दार्थं ज्ञातुं शक्नुवन्ति ।
- वेदानुसारं धर्मशब्दार्थं ज्ञातुं प्रभवन्ति ।
- उपनिषदनुसारं धर्मशब्दार्थं ज्ञातुं प्रभवन्ति ।
- धर्मलक्षणं ज्ञातुं प्रभवन्ति ।
- धर्मशास्त्रदृष्ट्या धर्मलक्षणं ज्ञातुं शक्नुवन्ति ।

## १.३.धर्मशब्दार्थ:

''धृञ्'' धारण-पोषणयोरित्यस्याद्धातोर्मन् प्रत्यये कृते धर्मशब्दो निष्पद्यते । धर्मशब्दस्य बहुविधान् अर्थान् शास्त्रकारा: प्रकटयन्ति । तत्रादौ निखिलशास्त्रोपबृंहितो वेद: कथयति यत् धर्मोऽयम् अलौकिकशक्ते: बोधक: । ऋग्वेदस्य मतानुसारं धर्म: नियमव्यवस्थाया: द्योतको भवति । येन नियमेन संसारस्य जना: सुखस्वाच्छन्देन प्रचलेयु: । अथर्ववेदे ऋग्वेदस्य मन्त्रा: प्राप्यन्ते । यत्र धर्मशब्दस्यार्थ: धार्मिकसंस्कारस्तथा अर्जितगुणरूपेण निर्दिष्टो वर्त्तते । अत्रापि धर्मशब्दस्यार्थ: पुण्यत्वेन व्यवहृतो दृश्यते । ऐरेतरेयब्राह्मणे सर्वधार्मिककर्त्तव्यमेव धर्मशब्दस्य अर्थत्वेन प्रयुक्तम् । कालक्रमेण धर्मशब्दस्यार्थ: व्यापको जात: । आर्यजाते: परिचायकत्वेनापि धर्म: सम्प्रतिष्ठित: । मानवजीवनस्याधिकार:, कर्त्तव्यम्, अनुशासनम्, आचरणम्, सर्वनैतिककार्यं च धर्मस्यार्थत्वेन समाहितम् । वेदेषु सम्पूर्णमानवजातीनां विकासाय सिद्धान्ता: प्रतिपादिता: सन्ति । वेदा: आर्यजातीनां पठनीयधर्मग्रन्थत्वेन निर्दिष्टा: । वेदस्तु ज्ञानभण्डारो भवति । तत्र सर्वेषां मानवानां कृते सदुपदेश: सत्प्रेरणाश्च गुम्फिता: वर्त्तन्ते । येन मानवजाति: पतनोन्मुखिनी न भवति । वेदेषु धर्मशब्दस्य यादृशोऽर्थ: यादृशी व्याख्या च विहिता वर्त्तते, तस्यार्थ: सर्वान् प्रीणयति । देवता: यज्ञेन यज्ञं सम्पादितवन्त: । स एव प्रथमो धर्म इति ऋग्वेद: कथयति । सृष्टिरचनानन्तरमयं प्रथमोधर्म: शाश्वतधर्मत्वेन परिवर्तित: संजात: । वेदेषु अग्निरपि धर्मस्याद्भूताध्यक्षरूपेण वर्णितोऽस्ति । सामोऽपि बलवान् धर्मधारयिताभावेन कथित: तत्रापि च धर्म: विश्वस्य चक्षुरूपेण भुवनस्य पतिरूपेण च सम्बोधितोऽस्ति ।

प्रायश: वेदेषु धर्मस्यार्थरूपेण धार्मिकविधि: धार्मिकक्रिया-निश्चित्तनियम-शिष्टाचारप्रभृतय:शब्दा: नियुक्ता: सन्ति । परन्तु उपनिषत्साहित्येषु वेदार्थातिरिक्ता: धर्मशब्दस्यार्था अपि वर्त्तन्ते । तत्र प्रथमत: छान्दोग्योपनिषदि वर्णाश्रमधर्मस्यार्थत्वेन धर्म: प्रयुक्त: । अत्र धर्मनाम्ना वर्णानामाश्रमाणां चाचारा उक्ता: । तैत्रिरीयोपनिषदनुसारं पठनोपरान्तं गुरुमाध्यमेनैव सत्यं वद, धर्मं चर, चेतीयं शिक्षा प्रदीयते । श्रीमद्भगवद्गीतायां ''स्वधर्मे निधनं श्रेय:'' इत्यपि तस्यार्थस्य द्योतक: । मनुस्मृत्यनुसारं सर्वे मुनय: चिन्तयित्वैकदा मनुं प्रार्थिनवन्त: यत् सर्ववर्णानां

धर्मान् ब्रूहीति । याज्ञवल्क्यस्मृतावपि एतादृशोऽर्थः प्राप्यते । महाभारतानुसारं ''अहिंसा परमो धर्मः'' ''आनृशंस्यं परो धर्मः'' इत्यपि निर्दिष्टोऽस्ति । मनुनाऽपि ''आचारः परमो धर्मः'' इति स्पष्टमुद्घोषितम् । हारीतेनापि धर्मस्य स्मृतिप्रामाणिकत्व-मङ्गीकृतम् । मनुस्मृतिटीकाकारेण मेधतिथिना धर्मशब्दः कर्त्तव्यतावचन इति प्रतिपादितम् । बौद्धधर्मशासाहित्येषु धर्मशब्दस्यार्थः तद्विद्भिः बह्वर्थेन प्रयुक्तः । कदा कदा भगवतः बुद्धदेवस्य सम्पूर्णशिक्षायाः द्योतकरूपेण धर्मं बौद्धाः स्वीकृतवन्तः । गजपतिपुरुषोत्तमदेवेनापि त्रिकाण्डशेषे धर्मशब्दस्यार्थः स्वभाव इति लिखितम् । मेदिन्यां तु न्याय-स्वभाव-आचार-उपमा-क्रतु-अंहिसाः उपनिषद्प्रभृतयः धर्मकोटौ अन्तर्भुताः वर्त्तन्ते । अमरकोशकारेण अमरसिंहेनापि बहुधा धर्मस्य नामानि निर्दिष्टानि । धर्मः श्रेयः, पुण्यं, सुकृतम्, वृषश्चेति पञ्चैव धर्मशब्दवाच्याः । योगसारे तु प्राणायाम-ध्यान-धारणाप्रत्याहारप्रभृतयः धर्माः प्रतिपादिताः सन्ति । मिताक्षराकारेण विज्ञानेश्वरेणापि धर्मशब्दः षड्विधस्मार्तधर्मविषय इति प्रतिपादितम् । यथा-वर्णधर्मः, आश्रयधर्मः, वर्णाश्रयधर्मः गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति ।

स्वानुशीलनप्रश्नाः

१.धर्मशब्दस्य कीदृशो प्रकृतिप्रत्ययः ?

(उ) ........................................

२.मेधातिथिमतेन कः धर्मशब्दार्थः ?

(उ) ........................................

## १.४. धर्मलक्षणम्

ध्रियते लोकः अनेन इति धर्मः । धरति धारयति वा लोकम् इति धर्मः । ध्रियते लोकः यात्रानिर्वाहार्थं वेति धर्मः । अर्थात् येन माध्यमेन लोकानां धारणं सम्भवेत् यश्च लोकानां सुनिर्वाहार्थं संसारं धारयेत् स एव धर्मशब्दवाच्यः । सर्वेषु शास्त्रेषु धर्मस्य स्वरूपविमर्शे स्वातन्त्र्ये सति विपश्चित्तः सर्वथा मनोः प्राथम्यमङ्गीकुर्वन्ति । यतो हि गौतमप्रतेणीतानि

धर्मसूत्राण्यपि मनुमतमुपस्थाप्य स्वमतं तन्मूलत्वेनोपस्थापयन्ति । अत: सर्वादौ मनुमतमेवोपस्थाप्यते -

**विद्वद्भि: सेवित: सद्भि: नित्यमद्वेषरागिभि: ।**
**हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ।।**

इति धर्मस्य सामान्यलक्षणे विद्वद्भि: वेदविद्भिरेव सेवित: धर्म इति । तथा हृदयेनाभ्यनुज्ञातो अभि-आभिमुख्येन आनुकूल्येन अर्थात् श्रेय: साधनत्वेन, अनु-परम्परया ज्ञात: य: स धर्म इति । एवं प्रकारेण धर्मपरिभाषाया: उपक्रमं कुर्वता वेदो धर्ममूलमिति प्रत्यपादि । यथा-

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**
**आचारश्चैव साधूनामात्मनतुष्टिरेव च ।।**

वेदानुमापकत्वेन च स्मृत्याचारात्मतुष्ट्यादीनां धर्मे प्रामाण्यमपि तेनाङ्गीकृतम् । तदनुसारमेतच्चतुर्विधमपि साक्षाद्धर्मलक्षणत्वेन मन्यते । निखिलस्य वेदस्य धर्ममूलत्वेऽपि नप्तृ-प्रणप्तृ-आदिद्वारा वंशसंसृतिदर्शनादिव श्रुति-स्मृति-सदाचारात्मतुष्टिपर्यन्तं धर्मे मानवं प्रमाणं स्वीकुर्वन्ति धर्मशास्त्रज्ञा: । विज्ञानेश्वराचार्येण तु याज्ञवल्क्यस्मृतिव्याख्याने एतच्चतुष्टयं धर्मस्य ज्ञापकहेतुरूपेण लिखितम् । कारकहेतुरूपेण इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् इत्यन्तं यावत् निर्दिष्टम्, एतदनन्तरं तु अनयो: हेतुद्वयो: सन्देहस्थले किं भवेदित्याशङ्कायां निर्णयहेतुत्वेन योगीश्वरयाज्ञवल्क्योक्तवचनमुद्धृत्य स्पष्टं चोक्तम् -

**चत्वारो वेदधर्मज्ञा: पर्षत्त्रैविद्यमेव वा ।**
**सा ब्रूते यं स धर्म: स्यादेकोऽध्यात्मवित्तम: ।।**

मनुना तु प्रतिपत्तिमाध्ययेन आचारे शील भावयतां कार्यरूपस्याचारस्य सर्वानुभवयोग्यतया चातुर्विध्यं धर्मलक्षणम् उपसंहारे उक्तम् । ''पुनश्चाचार: परमो धर्म:'' इत्युक्त्वाऽपि पुरुषस्याचरणरूपकर्त्तव्यविशेष: पृथक् निर्दिष्ट: । अत: धृत्यादिदशलक्षणकस्य धर्मस्य सेवितव्यत्वनिर्देशात् तस्यापि आचाररूपत्वमिति नास्ति विदुषां वैमत्यम् । परन्तु आत्मतुष्टिरेतयोर्भिन्ना । सा तु विकल्पे गृह्यते ।

प्राचीनधर्मसूत्रकारेण गौतमेनापि वेदस्य धर्ममूलकत्वं तद्विदां वेदविदां मन्वादीनां या स्मृति: तत्प्रमाणं नि:सन्देहेन स्वीकृतम् । एतस्य टीकाकारेण

श्रीमता हरदत्तेनापि कर्मजन्याभ्युदयनिःश्रेयसहेतुरपूर्वाख्यः आत्मगुणो धर्म इत्युक्तम् । आपस्तम्बोऽपि धर्मज्ञानां देशकालव्यक्तिभेदेन वेदार्थव्यवस्थापनरूपोऽवस्थाविशेषः समयापरपर्यायः धर्म इति वक्ति । आश्वलायनमतानुसारं स्थानीयप्रचलितधार्मिकप्रथानामपि धर्मप्रमाणमस्तीति स्पष्टं कथयति । एतन्मतं चाङ्गीकरोति बौधयनाचार्यः । आश्वलायनेनोक्तं यत् दान-दया-ब्रह्मचर्य-सत्यानुक्रोशधृतिक्षमाप्रभृतयः सनातनधर्मस्य मूलमन्त्राः भवन्ति । विश्वामित्रस्य विचारधारायां तु श्रेष्ठाः सज्जनाः शिष्टाः वा यं प्रंशसन्ति उपदिशन्ति च स धर्मः, यस्य वस्तुनः निन्दामादिशन्ति सोऽधर्मः ।

स्वानुशीलनप्रश्नाः

१. मनुमतेन धर्मस्य का परिभाषा ?

(उ) ..............................

२.दशविधं धर्मलक्षणं किम् ?

(उ) ...............................

## १.५. दर्शनशास्त्रदृष्ट्या धर्मलक्षणानि

पूर्वमीमांसाकारेण महर्षिजैमिनिना यज्ञादिकर्मणि पुरुषप्रवृत्तिजनकत्वेन स्वर्गरूपलक्ष्यवस्तु च धर्म उक्तः । अस्य च परिभाषा चोदना । धर्मप्रसारं निमित्तीकृत्यैव स्वगृहीतनामा भगवान् जैमिनिर्ग्रन्थारम्भे ''अथातो धर्मजिज्ञासा'' इत्यारम्भसूत्रेण छात्रान् धर्मजिज्ञासायामभिमुखीकृत्य ततःपरं ''चोदनालक्षणोऽर्थीः धर्मः'' इति धर्मलक्षणात्मकं द्वितीयं सूत्रं लिखितवान् । तत्र चोदनेति प्रवर्त्तकशब्दनाम । लक्ष्यते ज्ञायतेऽनेनेति लक्षणम् । यथा धूमेन बह्निर्ज्ञायत इति बह्निज्ञाने लक्षणं चोदना । उभयं चोदनया लक्ष्यते । अर्थः श्रेयः साधनं ज्योतिष्टोमादिः, अनर्थः प्रत्यवायसाधनं श्नेनादिः । तत वेदप्रमाणकं श्रेयः साधनं ज्योतिष्टोमादिर्धर्म इति स्पष्टार्थः । मीमांसान्याय-प्रकाशकारेण आपदेवेन वेदेन प्रयोजनमुद्दिश्य विधीयमानोऽर्थः धर्मः यथा यागादिरित्युक्ताम्, तद्वत् लौगाक्षिभास्करेण अर्थसंग्रहेऽपि

वेदप्रतिपाद्यप्रयोजनवदर्थो धर्मः, यथा यागादिरिति प्रतिपादितम् । मीमांसापरिभाषाकारेण कृष्णजज्वना तु वेदबोधितेष्टसाधनताको धर्मः । यथा यागादिः ।वेदबोधितानिष्टसाधनताकोऽधर्मः ।यथा कलञ्जभक्षणादिरित्युक्तम् ।

ऋषिदृष्टत्वात् आर्षं वेदं धर्मोपदेशं च तन्मूलस्मृत्यादिकं यः तद्विरुद्धेन मीमांसादिन्यायेन विचारयति स धर्मः । जानाति न तु मीमांसानभिज्ञः । धर्मे करणं वेदः, मीमांसा चेतिकर्त्तव्यता-स्थानीया इति भट्टवार्त्तिककृता स्पष्टं निर्णीतम् ।

''यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः'' इत्यत्राभ्युदयनिःश्रेयससाधन-त्वेन धारयतीति धर्म इति वैशेषिकाणां धर्मलक्षणमुट्टङ्कयद्यप्यस्ति धर्मस्वरूपनिश्चयवादिनां विप्रतिपत्तिस्तथापि शास्त्रकारैस्तस्याः निराकृतत्वादित्युक्त्वा तार्किकाः आत्मगुणौ धर्माधर्मौ इति स्वीकुर्वन्ति । पुनश्च विहितक्रियासाध्यो पुंगुणो धर्म इति तेषामभिप्रायः । भाट्टास्तु श्रेयःसाधनता साक्षाद् वेदादेव प्रतीयत इति कृत्वा द्रव्यक्रियागुणादीनां धर्मत्वं व्यवस्थापयन्ति । प्राभाकरास्तु कार्यनियोगात्पूर्वशब्दैरच्यमानं धात्वर्थसाध्यं स्वर्गादिफलसाधनमात्मगुणं धर्ममाहुः ।

स्वानुशीलनप्रश्नाः

१.चोदनाशब्दार्थः कः ?

(उ) ...................................

२. कलञ्जशब्देन किमुच्यते ?

(उ) ..................................

## सारांशः

प्रियपाठकाः ! अस्मिन् अंशे धर्मस्य प्रकृतिप्रत्ययः, धर्मस्य व्युत्पत्तिः, धर्मशब्दस्य अर्थाः वेदानुसारं धर्मशब्दस्यार्थाः, उपनिषदनुसारं धर्मशब्दस्यार्थाः, मनुमतानुसारं धर्मस्य परिभाषा, तल्लक्षणम्, दशकं धर्मलक्षणम्, वेदस्य धर्ममूलत्वम्, धर्मस्य कारकहेतवः, ज्ञापकहेतवः, निर्णयहेतवः, याज्ञवल्क्यमतेन धर्मलक्षणम्, गौतमस्य धर्मलक्षणम्, हदहत्तस्य धर्मलक्षणम्, आपस्तम्बस्य धर्मलक्षणम्, आश्वलायनोक्तं धर्मलक्षणम्, विश्वमित्रानुसारं च धर्मलक्षणमत्र प्रतिपादितम् । पुनश्च दर्शनशास्त्रदृष्ट्या धर्मलक्षणप्रतिपादनावसरे सर्वादौ

जौर्मिनिकृतधर्मलक्षणम्, आपदेवकृतधर्मलक्षणम्,लौगाक्षिभास्करकृतधर्मलक्षणम्, कृष्णयज्वकृतधर्मलक्षणञ्च अत्र मया प्रतिपादितम् । प्रसङ्गानुसारं भाट्टमतं प्राभाकरमतमपि विचारितम्, अन्ते वैशेषिकाणां धर्मलक्षणमुदृङ्क्य सम्यक् विचारितम् ।

## पारिभाषिकशब्दा:

(क) गुणधर्म: - राज्ञ: प्रजापालनरूपो धर्म: ।

(ख) स्मृति: - धर्मशास्त्रम् ।

(ग) शीलम्- स्वभाव: ।

(घ) आर्षम् - ऋषेरिदम् आर्षं प्रवर इत्यर्थ: ।

(ङ) पर्षत् - परिषत् ।

(च) धृति: - धैर्यम् ।

(छ) दम: - मनसो दमनम् ।

(ज) चोदना-प्रेरणा ।

(झ) ज्योतिष्टोम:-सोमयागविशेष: ।

(ञ) कलञ्ज: - विषाक्तशरविद्धमांसम् ।

## निबन्धात्मकप्रश्ना:

(क) धर्मशब्दस्य निर्वचनं विधाय वेद-स्मृत्युपनिषदनुसारं धर्मशब्दार्थं विचारयत ।।

(ख) मनुमतेन धर्मस्य परिभाषां विलिख्य तल्लक्षणविचारं कुरुत ।।

(ग) भीमांसकानां मतेन धर्मलक्षणं विमृशत ।।

## विश्लेषणात्मकप्राश्ना:

(क) वेदानुसारं धर्मशब्दार्थं विमृशत ।

(ख) दशकं धर्मलक्षणं विलिख्य व्याख्यात ।

(ग) ''चोदनालक्षणोऽर्थो धर्म:'' इति जैमितिसूत्रं व्याख्यात ।

## लघुप्रश्ना:

(क) मनुमतेन क: धर्मशब्दार्थ: ?

(ख) आचार: कथं परमो धर्म: ?

(ग) अहिंसा कथं परमो धर्मः ?

(घ) वेदस्य धर्ममूलत्वं कथम् ?

(ङ) वैशेषिकाणां धर्मलक्षणं किम् ?

**एकाङ्कप्रश्नाः**

(क) धर्मशब्दस्य कः प्रकृतिप्रत्ययः ?

(ख) कलङ्कशब्देन किमुच्यते ?

(ग) आचारः परमो धर्मः इति कः वदति ?

(घ) दशविधं धर्मलक्षणं कस्य ?

(ङ) कर्त्तव्यमेव धर्म इति कः वदति ?

(च) अहिंसा परमो धर्म इति कः वदति ?

(छ) यज्ञ एव प्रथमो धर्म इति कः कथयति ?

(ज) ''स्वधर्मे निधनं श्रेयः'' इति वाक्यं कुत्रास्ति ?

(झ) कः परमो धर्मो भवति ?

(ञ) शीलमित्यस्य कोऽर्थः ?

**एकाङ्कप्रश्नानामुत्तराणि**

(क) ''धृञ्'' धातोः ''मन्'' प्रत्ययः ।

(ख) विषाक्तशरविद्धमांसम् ।

(ग) मनुः ।

(घ) मनोः ।

(ङ) मेधातिथिः ।

(च) महाभारतम् ।

(छ) ऋग्वेदः ।

(ज) श्रीमद्भगवद्गीतायाम् ।

(झ) आचारः ।

(ञ) स्वभावः ।

# अंशः - द्वितीयः

संरचना

२.१. प्रस्तावना
२.२. उद्देश्यम्
२.३. - धर्मभेदाः
२.४. धर्मे प्रमाणानि
२.५. धर्मस्य महत्त्वम्

## २.१. प्रस्तावना

धर्मो भवति धारकः, जगद्भवति धार्यम् । धारकाभावे नाम धर्माभावे धार्यस्य नाम जगतः स्थितिः सुदृढा न भवति । अर्थात् धर्मं विना जगत् क्षणमपि स्थातुं नार्हति । धारकत्वेनैव धर्मस्य ख्यातिरतीव महनीया । सकलशास्त्रललामभूता श्रुतिरपि धर्मं व्याख्यापयन्ती तादृशमेवार्थमभिधत्ते - ''धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपजीवन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्याद्धर्मं परमं वदन्ति'' । एतादृशस्य धर्मस्यैव अनेके भेदाः सन्ति । धर्मप्रमाणं विना किमपि न स्यात्, अतः धर्मे बहूनि प्रमाणान्यपि सन्ति । तेष्वपि पूर्वपूर्वस्य साबल्यमुत्तरोत्तरस्य दौर्बल्यञ्च स्वीक्रियते । अतस्तेषां विमर्शोऽवश्यमेवात्र विधेयः ।

## २.२. उद्देश्यम्

प्रियपाठकाः ! अस्मिन्नंशे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- धर्मभेदान् ज्ञातुं प्रभवन्ति ।
- श्रौतधर्मान् ज्ञातुं शक्नुवन्ति ।
- स्मार्त धर्मान् निर्णेतुं शक्नुवन्ति ।
- कः परमो धर्म इत्यस्मिन् विषये ज्ञातुं प्रभवन्ति ।

- धर्मस्य प्रवृत्त-निवृत्तभेदान् अपि ज्ञातुं शक्नुवन्ति ।
- धर्मप्रमाणविषये ज्ञातुमर्हन्ति ।
- वेदोऽखिलो धर्ममूलं कथमिति ज्ञातुं प्रभवन्ति ।
- वेदाभावे कथं धर्मशास्त्रस्य प्रामाण्यं तदपि ज्ञातुं शक्नुवन्ति ।
- धर्मे कथमाचारस्य प्रामाण्यमस्ति तद्विषये ज्ञातुं प्रभवन्ति ।
- सर्वाभावे आत्मतुष्टि: कथं नियमिका भवतीति ज्ञातुं शक्नुवन्ति ।

## २.३. धर्मभेदा:

धर्म अलौकिकश्रेय: प्राप्ते: साधनं भवति । अतीव प्राचीनोऽयं सनातनवैदिकधर्म: विशालद्रुमरूपेण भारतवर्षेऽस्मिन् अनादिकालादारभ्य इहलौकिक-पारलौकिकसुखप्राप्तये पत्रपुष्पफलरूपेणार्थकाममोक्षान् प्रयच्छति । स्वभावतोऽयं धर्म: वृषावृतिमानित्युच्यते- ''वृषो हि भगवान् धर्म:'' इति मनुस्मरणात् । स्वयं भगवान् वेदोऽपि धर्मं वृषाकृतिमाचष्टे । अस्य विलक्षणभूतस्य वृषभरूपस्य धर्मस्य चत्वारि शृङ्गाणि अर्थात् शृङ्गवत् मूर्द्धन्यभूतानि श्रुति-स्मृति-सदाचारात्मतुष्ट्यादीनि प्रमाणानि भवन्ति । अस्यैव धर्मवृषभस्य तत्प्रतिपादकधर्मशास्त्रस्य च आचार-व्यवहार-प्रायश्चित्ताभिधकाण्डत्रयरूपा: त्रय: पादा: अपि सन्ति । अस्य विलक्षणरूप-धर्मवृषभस्य प्रवृत्तिनिवृत्तिसंज्ञके आभ्युदयनि:श्रेयसिकरूपे द्वे शीर्षे भवत: । एवञ्चास्य धर्मवृषभस्य सप्तहस्ता: सन्ति । यथा-वर्णधर्म:, आश्रयधर्म:, वर्णाश्रयधर्म:, गुणधर्म:, निमित्तधर्म:, साधारणधर्म: परमधर्मश्चेति । वृषभरूपोऽयं धर्म: शारीरिकमानसिक-वाचिकत्वेन त्रिधा बद्ध: । अयं सुप्रसिद्ध: धर्मवृषभ: महादेवसदृशो भवति । स च महादेव: मर्त्यलोकवासिन: मनुष्यान् व्याप्य वर्त्तते । पुरुषार्थचूडायमानस्यास्य धर्मवृषभस्य त्रय: स्कन्धा: अपि सन्ति यथा- छान्दोग्योपनिषदि- ''त्रयो धर्मस्कन्धा यज्ञोऽध्ययनं दानमिति प्रथमस्तप एवेति द्वितीयो ब्रह्मचार्याचार्यकुलावासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् सर्व एते पुण्यश्लोका: भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति'' इति ।

मनो: समये प्रायेण वर्णानां संसर्गेण अन्येषां केषाञ्चन शङ्करजातिविशेषाणामुद्भव: संजात: । कुलपरम्परया च केषाञ्चन

धर्माणामुपलब्धवेदभागे स्थितिं प्राप्य तेषां स एव धर्म इति व्यवस्थापयामास । तस्माद्दिनादारभ्य परम्परेयं प्रचलिता यत् यद्यपि आचरितानां धर्माणामनुष्ठाने वेदेन साकं साक्षाद्विरोधः न भवेत्तर्हि त एव धर्माः सर्वथा ग्रहणयोग्याः पालनयोग्याश्च भवितुमर्हन्ति । तद्द्वाराऽपि स्मृतेः कल्पनं सम्भवति । तद्वत् प्राचीनाचार्यैः गौतमप्रभृतिभिः वेदाविरुद्धत्वेन देशजातिकुलधर्माणां धर्मे प्रामाणिकतामङ्गीकुर्वन्ति । तथैव व्यासेनापि तन्मतं महाभारते स्पष्टीकृतम् । एवंप्रकारेण आचारधर्माणां समुद्भवः कुलपरम्परायां देशपरम्परायां च सञ्जातः । वर्णधर्मत्वेन आश्रमधर्मत्वेन च धर्माणां मुख्यतया विभागसत्त्वेऽपि प्रतिवर्णं प्रत्याश्रमं धर्मभेदः परिलक्ष्यते ।

वेदस्मृत्यादिभिः सर्वैरपि प्रतिपादितो यो धर्मः स नु सामान्यतः द्विधा विभज्यते । प्रवृत्रधर्मः निवृत्तधर्मश्चेति । तन्मूलं कर्म अपि प्रवृत्त-निवृत्तभेदेन द्विधा इति मनोः मतम् । यथा-

**सुखाभ्युदयिकं चैव नैःश्रेयसिकमेव च**
**प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम् ।।**

अत्र प्रवृत्तधर्मेण स्वर्गादिप्राप्तिरूपोऽभ्युदयः लभ्यते । नैःश्रेयसिकस्य निवृत्तधर्मस्य फलं तु मोक्ष एव । अयं प्रवृत्तधर्मोऽपि षट्स्मार्तधर्मविषयः । यथा वर्णधर्मः, आश्रमधर्मः, वर्णाश्रमधर्मः, गुणधर्मः, निमित्तधर्मः, साधारणधर्मश्चेति । तत्र वर्णधर्मोः ब्राह्मणो नित्यं मद्यं वर्जयेदित्यादिः । आश्रमधर्मो अग्नीन्धनभैक्ष्यचर्यादिः । वर्णाश्रमधर्म पालाशो दण्डो ब्राह्मणस्य इत्येवमादिः । गुणधर्मः शास्त्रीयाभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनादिः । निमित्तधर्मो विहिताकरण-प्रतिषिद्धसेवननिमित्तं प्रायश्चित्तम् । साधारणो धर्मः अहिंसादिः । न हिंस्यात् सर्वभूतानि इति आचाण्डालं साधारणो धर्म इति विज्ञानेश्वरस्याभिमतम् । योगीश्वरेण स्वयाज्ञवल्क्यस्मृतौ परमधर्मस्याप्युल्लेखो विहितः ।

**''इज्याचारदमाहिंसादानस्वाध्यायकर्मणाम् ।**
**अयं च परमो धर्मः यद्योगेनात्मदर्शनम् ।। इति ।**

तन्त्रवार्त्तिकानुसारं तु वर्णाश्रमधर्मः धर्मशास्त्रस्य प्रमुखविचार्यविषयः । यथा- ''सर्वधर्मसूत्राणां वर्णाश्रमधर्मोपदेशित्वात्'' इति । मनुस्मृतेः व्याख्याकारेण गोविन्दराजेन, गौतमधर्मसूत्र- व्याख्याकारेण हरत्तेन चापि

धर्मस्य पञ्चविधत्त्वं प्रतिपादितम् । भविष्यत्पुराणेऽपि पञ्चविधधर्माः वर्त्तन्ते । बौद्धधर्मसाहित्येषु धर्मशब्दस्य व्यवहारो विभिन्नेषु अर्थेषु जातः ।

स्वानुशीलनप्रश्नाः
१.षट्स्मार्तधर्माः के ?
(उ) ............................................
२.आश्रम धर्मः कः ?
(उ) .............................................

## २.४. धर्मे प्रमाणानि

पुरुषार्थेषु प्रधानभूतस्य सनातनवैदिकधर्मस्य वेद-स्मृति-सदाचारात्मतुष्ट्याख्यानि सुप्रसिद्धानि चत्वारि प्रमाणानि सन्तीति मनुना प्रतिपादितम् -

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।।**

वेदः ऋग्यजुःसामाथर्वलक्षणः । स च पुनः विधिमन्त्रनामधेयनिषेधार्थवादात्मको भवति । अत्र मन्त्रादीनां विधिवाक्यैकवाक्यतयैव धर्मे प्रामाण्यम् । एवंभूतस्य पञ्चविधात्मकस्य वेदस्य धर्मे प्रामाण्यं यथार्थानुभवकरणत्त्वरूपं न्यायसिद्धम् । वेदविदां मन्वादीनां स्मृतिरपि वेदमूलकतया धर्मे प्रमाणं भवति । श्रुत्यनुमापकत्वेन स्मृतेः प्रामाण्यात् । ब्रह्मण्यता देवपितृभक्तता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्यं मैत्रता प्रियवादी कृतज्ञता शरण्यता कारुण्यं प्रशान्तिश्चेत्येतानि हारीतोक्तानि त्रयोदशविधशीलानि, एतेषामपि स्मृत्यनुमापकतया धर्मे प्रामाण्यं स्वीक्रियते । अनुमीयते स्वमूलभूतस्मृतिवाक्यमनेनेत्यनुमानः शिष्टाचारः आचारः सदाचारः, तस्य च स्मृत्यनुमापकत्वमाचार्यैः विस्पष्टमभिहितम् । यथा-

**''आचाराच्च स्मृतिं ज्ञात्वा स्मृतेश्च श्रुतिकल्पनम्''**

इति साधूनां शिष्टानां धार्मिकाणामात्मतुष्टिरपि वैकल्पिके विषये धर्मे प्रमाणं भजते । एतेषां प्रमाणानां विषये यथोक्तं योगीश्वरेण-

**श्रुतिः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।**
**सम्यक्संकल्पजः कामो धर्ममूलमिदं स्मृतम् ।।**

एतेषु अखिलो वेदः धर्मस्य मूलं प्रमाणं भवतीति मनुनोक्तम् ।

**वेदेऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च ।।**

अत्र सत्स्वपि चतुर्विधेषु प्रमाणेषु वेद एव धर्मस्य मूलं प्रमाणं भवति । वेदोऽङ्गी, तदङ्गभूततया अन्येषां स्मृत्यादीनां धर्मे प्रामाण्यमङ्गीक्रियते । अत्र क्रमशो वेदाभावे धर्मशास्त्रस्य, धर्मशास्त्राभावे आचारस्य च प्रामाण्यं भवति, परन्तु यत्र वेद-वेदयोर्मध्ये, धर्मशास्त्र-धर्मशास्त्रयोर्मध्ये, आचाराचारयोर्मध्ये विरोधः परिलक्ष्यते, तत्र विरोधपरिहाराय ''तुल्यबलविरोधे विकल्पः'' इति गौतमोक्तान्यायेन विकल्प आश्रयणीयः । यथा वेदे- 'उदिते जुहोत, अनुदिते जुहोति'', अतिरात्रे, षोडशिनं गृह्णानि, नातिरात्रे, षोडशिनं गृह्णाति'', स्मृतौ च - ''गर्भाष्टमेऽष्टमे वाऽब्दे'' इत्यादावात्मेच्छेव नियामिका भवति । ''वैकल्पिके आत्मनुष्टिः प्रमाणम्'' इति गर्गवचनात् । एतेषु धर्मप्रमाणेषु सर्वथा पारदौबेल्यं पूर्वबलीयस्त्वं च स्वीक्रियते । तथा च संग्रहे -

**श्रुतिस्मृतिपुराणेषु विरुद्धेषु परस्परम् ।**
**पूर्वं पूर्वं बलीयः स्यादिति न्यायविदो विदुः ।।**

स्मृत्याचारयोर्विरोधे स्मृतिरेव बलवती भवति । यथा श्रुति-स्मृतिर्विरोधे श्रुतिः । इदानीन्तनाचारेण स्मृतिः, स्मृत्या च श्रुतिः कल्पनीया, इत्यनेनाचारस्य द्व्यन्तरित-प्रामाण्यमङ्गीक्रियते ।

स्वानुशीलनप्रश्नाः
१.धर्मे मूलं प्रमाणं किम् ?
(उ)............................
२.हारीतोक्तानि शीलानि कति ?
(उ)............................

## २.५. धर्मस्य महत्त्वम्

धर्मार्थकाममोक्षाणां पुरुषार्थचतुष्टयानां सम्बन्धो भारतस्य प्राचीनसंस्कृतवाङ्मये वर्णितमस्ति । अत्र विचारदशायां ज्ञायते यत् धर्मोऽर्थस्य, अर्थश्च कामस्य हेतु: । कामश्च द्विविधात्मक: । सुखरूपो दु:खनिवृत्तिरूपश्च । तदित्थं कामपारतन्त्र्यादेव मनुष्य: धर्ममर्थं चार्जयितुं सर्वदा यत्नशीलो भवति । तयोरपि धर्म एव अर्थस्य हेतुतया तदर्जनमेव मानवप्रयत्नस्य प्रथमो विषय: । धर्मार्थकामानां त्रिवर्गाणां विषये प्रथम-मध्यमो-उत्तमरूपेण महाभारते सम्यक् विचारितमस्ति । अत्र मुख्यतया मानवस्य लक्ष्यं भवति मोक्षप्राप्ति: । धर्मार्थकाममोक्षेषु चतुर्वर्गेषु धर्मस्यैव प्रथमं स्थानमस्ति । न हि धर्ममन्तरेण त्रयाणामर्थकाममोक्षाणां प्राप्ति: सम्भवति । धर्मं विना लोक: क्षणमपि स्थातुं नार्हति । सैव दशा विश्वस्यापि । धर्मस्तु सर्वदा धारक एव । तस्माद् धारकाभावे नाम धर्माभावे धार्यस्य नाम विश्वस्य स्थितिरसम्भवा । धर्मोऽयं समेषां जनानां हितकारक: सुहृच्च । कर्मणि मनसि वचांसि य सुहृत्वेन हितसाधकत्त्वेन च सर्वान् लोकान् साहय्यं करोति । शोभनां प्रेरणामपि प्रददाति ।

मरणानन्तरं केबलं धर्माधर्मौ पुरुषेण सह गच्छत इति भारतीया धारणा धर्मस्य अपरिहार्यत्वं स्थापयति । पुरा भारतीया: जना: इहलोकात् परलोकमधिकतरं महत्त्वपूर्णं मन्यन्तो स्म । धर्मानुसारं मानवताया अभ्युदयाय बहव: सिद्धान्ता: शाश्वतीवृता: । त एव धर्मस्य सनातनत्वं द्योतयन्ति । महाभारतानुसारं धर्मस्य ''कीर्त्तिर्लाक्ष्मीर्धृतिर्मेधा'' इत्यादिरूपेण दश पत्न्य: सन्तीति तेन धर्मस्य सातिशयत्वं महत्त्वं च प्रकटितं भवति ।।

स्वानुशीलनप्रश्नाः

१.कति पुरुषार्था: सन्ति ?

(उ)..........................

२.धर्मस्य कति पत्न्य: ?

(उ)..........................

## सारांश:

प्रियपाठकाः ! अस्मिन् अंशे धर्मभेदास्तत्रादौ प्रवृत्तधर्मः, निवृत्तधर्मश्च प्रतिपादितः । षट्स्मार्तधर्मः अपि वर्णितः । योगीश्वरोक्तपरमो धर्मोऽपि उक्तः । धर्मे प्रमाणानि, तेषु वेदोऽखिलो धर्ममूलञ्च प्रतिपादितम् । वेदानुमापकत्वेन स्मृत्याचारादीनां प्रामाण्यमपि स्वीकृतम् । हारीतोक्तं त्रयोदशविधं शीलमपि लिखितम् । धर्मवृषभस्य श्रृङ्ग-पाद-शीर्ष-हस्तादीनां विचारोऽपि विहितः । कीदृशो धर्मः महादेवसदृशो भवतीत्यपि सम्यक् प्रतिपादितम् । यज्ञाध्ययनदानभेदेन धर्मस्य त्रयः स्कन्धा अपि सम्यक् प्रदिपादिताः । धर्मप्रमाणेषु वैकल्पिकविषये आत्मतुष्टेरपि प्रामाण्यं गर्गमताधारेण उक्तम् । धर्मस्य महत्त्वमपि सप्रमाणमत्र विहितम् ।

## पारभाषिकशब्दाः

(क) श्रुतिः - वेदः

(ख) अनुमानः- शिष्टाचारः

(ग) आत्मतुष्टिः - आत्मेच्छा

(घ) यज्ञः - देवतोद्देश्येन द्रव्यत्यागरूपकर्मविशेषः ।

(ङ) गुणधर्मः - व्यवहारः

(च) स्वाध्यायः - स्वशाखायाः अध्ययनम्

(छ) सनातनः - शाश्वतः

(ज) अतिरातम् - यज्ञीयदिवसः

(झ) षोड़शी - यज्ञपात्रविशेषः

(ञ) चतुर्वर्गः - पुरुषार्थचतुष्टयम् (धर्मार्थकाममोक्षाः)

## निबन्धात्मकप्रश्नाः

(क) धर्मभेदान् विलिख्य तत्र षट्स्मार्तधर्मान् सम्यक् विवृणुत ।।

(ख) धर्मे कति प्रमाणानि ? इति विलिख्य तत्र कथं पूर्वपूर्वस्य बलीयस्त्वमिति प्रतिपादयत ।।

(ग) धर्मस्य महत्त्वं सप्रमाणं विशदयत ।।

## विश्लेषणात्मकप्रश्नाः

(क) प्रवृत्तधर्मं निवृत्तधर्मञ्च व्याख्यात ।।

(ख) धर्मप्रमाणविषये मनुमतं स्थापयत ।।

(ग) शीलस्य कथं धर्मे प्रामाण्यमिति प्रतिपादयत ।।

## लघुप्रश्नाः

(क) परमो धर्म इत्यस्य कोऽर्थः ?

(ख) श्रौतधर्माः के ?

(ग) धर्मः कथं वृषाकृतिमान् ?

(घ) धर्मे आचारप्रामाण्यं कथम् ?

(ङ) धर्मेण कथं मोक्षप्राप्तिः ?

## एकाङ्कप्रश्नाः

(क) वृषाकृतिमान् कः ?

(ख) धर्मस्य कति स्कन्धाः ?

(ग) प्रवृत्तधर्मः कः ?

(घ) आश्रमधर्मः कः ?

(ङ) निमित्तधर्मः कः ?

(च) साधारणो धर्मः कः ?

(छ) त्रयोदशविधं शीलं केनोक्तम् ?

(ज) तुल्यबलविरोधे कस्याश्रयः क्रियते ?

(झ) चतुर्वर्गेषु कः प्रधानः ?

(ञ) धर्मस्य दश पत्न्य इति कः वदति ?

## एकाङ्कप्रश्नानामुत्तराणि

(क) धर्मः ।

(ख) त्रयः ।

(ग) स्वर्गादिप्राप्तिरूपोऽभ्युदयः ।

(घ) अग्नीन्धनभैक्ष्यचर्यादिः ।

(ङ) प्रायश्चित्तम् ।

(च) अंहिसादिः ।

(छ) हारीतेन ।

(ज) विकल्पस्य ।

(झ) धर्मः ।

(ञ) महाभारतम् ।

# अंशः - तृतीयः

संरचना

३.१. प्रस्तावना
३.२. उद्देश्यम्
३.३. धर्मशास्त्रस्य स्वरूपम्
३.४. धर्मशास्त्रस्य प्रविभागाः

## ३.१. प्रस्तावना

विदितमिदं समेषां यत् सकलश्रुतीनामनुमापकत्वेन मुनिप्रणीतत्वेन, तदध्ययनानुष्ठानवताम् ऐहिकामुष्मिकफलप्रापकत्वेन, पुरुषामुपादेयत्वेन सकलशास्त्रललामभूतत्वेन, प्रधानपुरुषार्थस्य धर्मस्य प्रतिपादकत्वेन प्राचीनत्वेन च धर्मशास्त्रं विराजतेतराम् । सामाजिकस्थितिसुदृढाय शास्त्रस्यास्य नितान्तमावश्यकमस्ति । समाजे लोकः कथं सुश्रृङ्खलितजीवनयापनं कुर्यादितदर्थं शास्त्रेऽस्मिन् विविधनियमाः वेदाधारेण प्रणीताः सन्ति । समाजशास्त्रमिति यदि अस्य नामान्तरं स्यात्तर्हि न काऽप्यत्युक्तिः स्यात् । समयानुसारं सामाजिकस्थितिं परिलक्ष्य लोकानां कृते नियमप्रणयनमेव शास्त्रस्यास्य परमं लक्ष्यम् । अतः सर्वादौ शास्त्रस्यास्य कीदृशं स्वरूपं कश्च तस्य प्रतिपाद्यविषयः, के च तत्र प्रविभागाः सन्तीति अवश्यमेव ज्ञातव्यम् ।

## ३.२.उद्देश्यम्

प्रियपाठकाः ! अंशेऽस्मिन् भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति -

- धर्मशब्दं व्युत्पादयितुं प्रभवन्ति ।
- धर्मशास्त्रपदं व्युत्पादयितुं शक्नुवन्ति ।
- धर्मशास्त्रापरपर्यायः स्मृतिशब्दः योगिकः योगरूढो वा इति ज्ञातुं प्रभवन्ति ।
- धर्मशास्त्रस्य प्रमुखप्रतिपाद्यविषयान्नपि ज्ञातुं प्रभवन्ति ।
- शास्त्रेऽस्मिन् के के प्रवितभागाः सन्तीति ज्ञातुं शक्नुवन्ति ।

## ३.३. धर्मशास्त्रस्य स्वरूपम्

**धारणाद्धर्म इत्याहुः धर्मो धारयते प्रजाः ।**
**यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ।।**

इति महाभारतवचनानुसारं धर्मो भवति धारकः जनानां पालकश्च । ध्रियते लोक अनेन इति धर्मः, धरति धारयति वा लोकमिति धर्मः । ध्रियते लोकः यात्रानिर्वाहार्थं वेति धर्मः । धृञ् धारणपोषणयोरित्यस्माद्धातोः मन् प्रत्यये कृते धर्मः, ''शास्'' धातोः ष्ट्रञ् प्रत्यये कृते च शास्त्रमिति पदं निष्पद्यते । धर्मं शास्तीति व्युत्पत्त्या धर्मशास्त्रपदं सिद्ध्यति । धर्मः यस्मिन् शास्त्रे प्राधान्येन निर्दिश्यते तदेव शास्त्रं धर्मशास्त्रनाम्ना यद्यप्यभिधीयते तथापि ''धर्मशास्त्रं तु वै स्मृतिः'' इत्यनेन मनुना स्मृतिरूपग्रन्थस्य मुख्यतया धर्मशास्त्रत्वं सङ्केतितम् । तैनैव च महात्मना मनुना धर्मविषये परमप्रामाण्यत्वेन श्रुतीनामुल्लेखो विहितः । स्मृतिप्रामाण्यमुपजीव्य जैमिनिप्रणीतं सूत्रद्वयमत्र प्रसङ्गतः विचारणीयम् । यद्यपि धर्मशास्त्रपदेन मन्वादिप्रणीतानि शास्त्राण्येव मुख्यतः बोध्यानि । यथा याज्ञवल्कयेन स्वकीयस्मृतौ स्मृतिप्रणेतृ्णां नामानि निर्दिष्टानि । अत्र मिताक्षरायां यद्यपि विज्ञनेश्वरेण सस्यष्टमेव व्याख्यातम् - नेयं परिसंख्या, किन्तु प्रदर्शनार्थमेतत् । अतो बौधायनादेरपि धर्म- शास्त्रत्वमविरुद्धम् । एतेषां प्रत्वेकं प्रामाण्येऽपि साकांक्षाणामाकांक्षापरिपूरणमन्यतः क्रियते । विरोधे विकल्प इति । तथाप्यत्र गौणार्थे मूलस्मृतिग्रन्थानां तेषां क्वचित् टीकारूपेण क्वचिद्वा टीकायाः टिप्पणीरूपेण विरचिताः ग्रन्थाः सर्वे धर्मशास्त्रेषु परिगणिताः भवन्ति । अपि च निबन्धाख्यां भजमानाः ग्रन्थविशेषाः अप्यत्रान्तर्भूताः । एते विभिन्नेषु स्मृतिग्रन्थेषु उल्लिखितानां प्राकरणिकानां वचनानां सामञ्जस्यविधाने मुख्यतः यत्नपरा इति तत्र वैशिष्ट्यमवधेय् ।

अस्यैव शास्त्रस्य स्वरूपं प्रतिपादयता स्वर्गीयपण्डितकुलमणिमिश्रमहोदेन इत्थं प्रतिपादितं यत् धर्मशास्त्रं नाम सकलशास्त्रपुरस्कृतं निखिललोकसुरक्षकं कृत्याकृत्यप्रतिपादकत्वेन नित्यनितोपादेयं साक्षात् वेदार्थानुमापकत्वेन वेदवत् प्रमाणं तपःस्वाध्यायपूतचरित्राणां यमनियमानुष्ठानप्रयतात्मनां सकलसंस्कारसंस्कृतानाम् आत्मगुणविद्योतितान्तःकरणानां ब्रह्मादिस्तम्भपर्यन्तसकलभूतहिताकांक्षिणां रागद्वेषरहितानां मनुगौतमवसिष्ठादिमहर्षीणां निरतस्वाध्यायध्ययनपूतकष्ठोद्गीर्णत्वेन सर्वजनग्रहणीयं गुणिगणसमादरणीयं प्राचीनतमं शास्त्रम् । अतः व्यवहारविधायकस्य धर्मविधायकस्य च शास्त्रस्य नाम धर्मशास्त्रमिति । धर्मप्रतिपादकं शास्त्रं धर्मशास्त्रमिति मध्यपदलोपिकर्मधारयसमासः । अस्यैव धर्मशास्त्रस्य स्मृतिरित्यपरा संज्ञा मनुस्मरणान् । अयमेव स्मृतिशब्दः धर्मशास्त्रेषु पङ्कजादिवद् योगरुढः । शास्त्रान्तरे तु स्मृतिशब्दः यौगिकः । यथा पुराणस्मृतिः सांख्यस्मृतिश्चेत्यादि ।

शास्त्रेऽस्मिन् धर्मार्थकाममोक्षाणां चतुर्वर्गाणां निरपेक्षविचारः परिलक्ष्यते । तेषु चतुर्वर्गपरिगणितपुरुषार्तेषु यः प्रथमः पुरुषार्थः स धर्म एव तस्य प्राथम्यं सर्वसम्मतम् । कामार्थयोः पुरुषार्थयोः धर्मपृष्ठकोषकत्वेन व्यावहारिके जगति प्रमाणतया वर्त्तमानत्वात्

तयोरपि स्थितिः धर्ममूला इति मनुरब्रवीत् । अर्थकामायोः धर्ममूलकत्वेन धर्मशास्त्रग्रन्थे अर्थकामावपि सम्यक्तयैव निरुपितौ । यथा दायो लाभः, क्रयो जयः, प्रयोगः कर्मयोगश्येत्येते सप्त अर्थागमोपायाः शास्त्रानुसारं धर्म्याः । कामस्योदाहरणं योगीश्वरेण आचाराध्याये विवाहप्रसङ्गे एवोक्तम्- भवतीनां कामविहन्ता पातकी स्याद् इति इन्द्रप्रदत्तवरमनुस्मरन् गृहस्थः सर्वदा भार्याया इच्छानतिक्रमेण यथाकामी भवेदिति ।

मुख्यतया शास्त्रेऽस्मिन् आचार-व्यवहार-प्रायश्चित्तानां वर्णनं दृश्यते । आचारे तु वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्म-साधारणधर्माणामन्तर्भावो भवति । व्यवहारे तु अभिषेकादिगुणक्तस्य राज्ञः प्रजापरिपालनाख्यो यो गुणधर्मः सोऽन्तर्भवति । प्रायश्चित्ते तु विहिताकरणप्रतिषिद्ध- सेवननिमित्तस्य नैमित्तिकधर्मस्यान्तर्भावो भवति । तत्रादौ आचार एव प्रमुखः । आचारः भारतीयधर्मस्य मूलाधारभूतः । धर्मशास्त्राङ्गभूतस्यास्याचारस्य शास्त्रान्तरेष्वपि प्रशंसा दृश्यते । हिन्दुसमाजस्य भित्तिभूमिः भारतीयसंस्कृतेश्च प्रतिष्ठाऽऽचारमाध्यमेनैव जाता । व्यक्तेर्विकासः समाजस्य चोन्नतिराचारद्वारेणैव संभवति । आचारोऽयं साधूनामाचारणरूपो भवतीति कृत्वा तस्य सदाचार इत्यन्वर्थनाम । यथा विष्णुपुराणे -

**साधवः क्षीणदोषास्तु सच्छब्दः साधुवाचकः ।**
**तेषामाचरणं यत्तु सदाचारः स उच्यते ।।**

"आचारः परमो धर्मः" इति वचनमिदं स्मृतिषु पुराणेषु च प्रतिपादितमस्ति । आचाराद्विय्युतो विप्रो न वैदिकं फलं लभेत् । आचारयुक्तः पुनः समग्रफलभाग्भवति । यथोक्तं मनुना -

**आचाराद्विय्युतो विप्रो न वेदफलमश्नुते ।**
**आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत् ।।**

आचारवान् पुरुषः वेदोक्तम् आयुः, पुत्रपौत्रदुहित्रात्मिका अभिमताः प्रजाः, प्रभूतं धनं च लभते । आचारोऽपि शरीरस्थमलक्षणं दूरीकरोति । तस्मादेव कारणात् दुराचारः जनः लोके निन्दितः स्यात् । सर्वदा दुःखान्वितो भूत्वा रोगवानल्पायुश्च भवतीति मनुना स्पष्टीकृतम् । आचारोऽयं विगतमत्सरदम्भदर्पाभिमानलोभमोहक्रोधवर्जितैः शिष्टैराचरितो भवति । सम्प्रति जनानां नित्यत्वेन सम्पाद्यमानानां दन्तधावनस्नान-देवार्चन-तर्पण-पञ्चमहायज्ञ-बलि-वैश्वदेवदानाध्ययनातिथिसेवा-तीर्थयात्रा-शुद्धि-श्राद्धादीनां कर्मणां मूलभूतोऽयमाचारः वेदानुमापकत्वेन देशाचार-कुलाचार-जात्याचारभेदेन विभज्यते । यथा दक्षिणदेशे मातुलकन्याविवाहः प्रशस्तः । परन्तु न देशान्तरे । पुनश्चोत्कलवासिभिः महासमारोहेण प्रथमाष्टमी-वकुलामावास्या-श्रीगुण्डिचायात्रा-राधाष्टम्यादीनां पालनं क्रियते, परन्तु, नान्यत्र

कुत्रापि दृश्यते । अयमुत्कलीयानां कृते देशाचार: । कुलपरम्परया कुलमुख्यै: यस्य विधे: परिपालनं क्रियते, स एव कुलाचार: । स तु सर्वदा शास्त्रानुमोदितोऽपि शास्त्रापेक्षया भिन्नो भवति । जातिभेदेन य आचार: परिपाल्यते स जात्याचार इत्युच्यते । यथा रथकारस्य रथनिर्माणादिकं कर्म । एतस्मिन् विषये मनु-याज्ञवल्क्य पराशरादय: स्मृतिकर्त्तार:, गौतम-बौधायनापस्तम्बादयश्च सूत्रप्रणेतार: स्वस्वग्रन्थेषु बहुत्र चर्चितवन्त: । अभिषेकादिगुणयुक्तस्य राज्ञ: प्रजापालनं परमो धर्म: । तच्च दुष्टनिग्रहमन्तरेण न संभवति । दुष्टपरिज्ञानञ्च न व्यवहारदर्शनमन्तरेण । तद्व्यवहारदर्शनं राज्ञा अहरह: कर्त्तव्यम् । ''व्यवहारान् स्वयं पश्येत् सभ्यै: परिवृत्तोऽन्वहम्'' इति । व्यवहारोत्पत्तिस्तत्प्रयोजनञ्च नारदस्मृतौ प्राप्यते–

**लोकसंरक्षणार्थाय धर्मसंस्थापनाय च ।**
**राज्ञां दोषहरश्चैव व्यवहार: प्रकीर्तित: ।**

''वि'' उपसर्गात् ''अव'' उपसर्गात् ''हृ'' धातो: ''धञ्'' प्रत्यये च कृते व्यवहारशब्दो निष्पद्यते । अयं व्यवहारशब्द: धर्माशास्त्रेषु पारिभाषिको भवति । भाषायां विवाद: आङ्लोभाषायां च केश् इत्युच्यते । अस्य यौगिकार्थं कात्यायनोऽप्याह ।

**वि नानार्थेऽव सन्देहे हरणं हार उच्यते ।**
**नानासन्देहहरणात् व्यवहार इति स्मृत: ।।**

धर्मशास्त्रसमाचारविरुद्धेन मार्गेण परैरभिभूतो यद्राज्ञे प्राड्विवाकाय वाऽऽवेदयति चेद् आवेद्यमानं व्यवहारपदं प्रतिज्ञोत्तरसंशयपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारस्तस्य पदं विषय: । स च द्विविध: । सङ्काभियोगस्तत्त्वाभियोगश्चेति । शङ्काऽसतां संसर्गात्, तत्त्वं होढाभिदर्शनात् । तत्र तत्त्वाभियोग: द्विविध: प्रतिषेधात्मको विध्यात्मकश्चेति । यथा - मत्तो हिरण्यादिकं गृहीत्वा न प्रयच्छति । क्षेत्रादिकं ममायपहरति इति । स च पुन: ऋणादानादिभेदेन अष्टादशधा भिद्यते ।

**अकुर्वन् विहितं कर्म निन्दितं च समाचरन् ।**
**प्रशक्तश्चेन्द्रियार्थेषु प्रायश्चित्तीयते नर: ।।**

विहिताकरणप्रतिषिद्धसेवननिमित्तं प्रायश्चित्तमवश्यमेव करणीयमित्यस्यार्थ: । दैनन्दिनजीवने कर्मकुर्वतां मनुष्याणां विविधेषु क्षेत्रेषु पापं भवति । पापनाशनकर्मत्वेन प्रायश्चित्तस्य प्राधान्यात् जना: पापापनोदनाय प्रायश्चित्तमेवाङ्गीकुर्वन्ति । अतो पापनाशनमेव प्रायश्चित्तस्य मूलमन्त्र: । अयं निमित्तधर्माख्यो यो स्मार्तधर्म: स च विहिताकरणप्रतिषिद्धसेवनमभिलक्ष्य एवानुद्यते । पापं यथा कादाचित्कत्वेन भवति तथैव तस्य प्रायश्चित्तमवश्यमेव कर्त्तव्यम् । अस्य लक्षणं यथोक्तमङ्गिरसा-

**प्रायो नाम तपः प्रोक्तं चित्तं निश्चय उच्यते ।**
**तपो निश्चयसंयुक्तं प्रायश्चित्तमिति स्मृतम् ।।**

ब्रह्मचर्यादिषु आश्रमेषु स्थित्वा यथावत् गृहस्थाश्रमं परिपाल्य मनो मोक्षे निवेशयेदिति धर्मशास्त्रकाराणामभिमतम् । सामग्रिकरूपेण धर्मशास्त्रे वर्णिताः ये विषयास्तेषु पापनाशककर्मत्वेन समाजे संव्यवहारार्थं च क्रियमाणानां पापानामपनोदनार्थं प्रायश्चितं नितरामेवापेक्षते । यद्यपि प्रायश्चित्तेन पापक्षयो भवति न वेति शङ्का परिकल्पिता वर्त्तते तथापि षट्स्मार्त्तधर्मेषु प्रायश्चित्तस्य तदङ्गभूतानां होमयागतपःस्वाध्यायानाम् अस्त्येव महद्योगदानमिति मन्वादीनां धर्मशास्त्रकाराणामभिमतम् ।

स्वानुशीलनप्रश्नाः

१.''धर्मशास्त्रम्'' अत्र कीदृशः समासः ?

(उ) ......................................

२.''स्मृति''रिति शब्दः कीदृशः ?

(उ) .....................................

## ३.४. धर्मशास्त्रस्य प्रविभागाः

भारतवर्षे बहुप्राचीनकालादारभ्य धर्मशास्त्रस्य प्राधान्यं नितरां वर्त्तते । धर्मार्थकाममोक्षात्मकचतुर्वर्गफलप्राप्तये जनाः वेदोपनिषद्धर्मशास्त्रोक्तविहितानि यागादिकर्माणि कुर्वन्ति । स्वर्गसाधनरूपस्य ज्योतिःष्टोमादिनिवृत्तधर्मस्य विचारावकाशाभावात् प्रतीकोपासनात्मकस्य प्रवृत्तधर्मस्य विचारावकाशसत्वात् धर्मशास्त्रस्य श्रेणीविभागोऽवश्यमेवास्ति ।

धर्मशास्त्रसाहित्यमिदं भागचतुष्टेन विभक्तम् । यथा- सूत्रसाहित्यं स्मृतिसाहित्यं भाष्यसाहित्यं निबन्धसाहित्यञ्चेति । समेषां जनानां कल्याणार्थं धर्मविद्भिः मनीषिभिः समाजानुकुलस्य देशानुकुलस्य च धर्मशास्त्रस्य रचना विहिता । शास्त्रेऽस्मिन् वर्णजात्याश्रमाणां पारस्परिकसंबन्धव्यवस्थापनार्थं सार्वजनीनाभ्युदयार्थं च नियमाः व्यवस्थिताः सन्ति । येषां माध्यमेन ग्रामेषु नगरेषु देशेषु च परस्परं सोहार्दं शान्तिश्च प्रतिष्ठिता भवेत् । धर्मशास्त्रप्रणयनात्प्रागेव भातीयसंस्कृतेः मूलाधारभूतस्य वेदस्य प्रादुर्भावः संजातः । वेदानन्तरं धर्मशास्त्रस्यैव प्राधान्यं दृश्यते । तत्रादौ सूत्रसाहित्यस्योद्गमः सर्वादौ वेदाङ्गभूतकल्पसूत्रादेव

जातः । सूत्रं नाम संक्षिप्तीकरणम् । सूत्रग्रन्थानां रचना उत्तरवैदिककालेऽभूत् । यथाऽन्यानि शास्त्राणि सूत्राकारणे रचितान्यभूवन् तथैवापि धर्मशास्त्रं धर्म-गृह्यभेदेन प्रणीतमभूत् । धर्मसूत्रेषु गौतम-बोधायन आपस्तम्ब-वसिष्ठादिप्रणीतधर्मसूत्राणां प्रादुर्भावः संजातः । गृह्यसूत्रेषु पारस्कर-आपस्तम्ब-गोभिलादिगृह्यसूत्राणां प्रामुख्यमस्ति ।

स्मृतिग्रन्था अपि धर्मशास्त्रस्याङ्गभूताः भवन्ति ।स्मृतिग्रन्थानां भाषा-भाव-शैली-विचारादयो न क्लिष्टतराः नापि संक्षिप्ताः । वैदिकसाहित्यस्य परवर्त्तिकाले सर्वजनहिताय वेदोपनिषद्निपुणाः परमकारुणिकाः धर्मतत्त्वमर्मज्ञाः महर्षयो वेदार्थं यथावत् संस्मृत्य सारञ्च संगृह्य युगानुसारं छन्दोबद्धान् स्मृतिग्रन्थान् प्रणीतवन्तः तेषु स्मृतिकारेषु मनु-याज्ञवल्क्य-पराशर-कात्यायनादयः प्रमुखाः भवन्ति । सर्वेष्वेतेषु मनुः प्रप्रथमः धर्मशास्त्रकारः । धर्मशास्त्रसाहित्याकाशे सूत्र-स्मृतिग्रन्थानामनन्तरमेव भाष्यग्रन्थानां स्थानमायाति । भाष्यं नाम व्याख्या टीका वेति । धर्मशास्त्रे भाष्यकाराणामपि सुमहद्योगदानमस्ति । यथा मनुस्मृतेरूपरि नवभाष्याणि, याज्ञवल्क्यस्मृतेरूपरि सप्तभाष्यणि, गौतमधर्मसूत्रस्योपरि चत्वारि भाष्याणि च सन्ति । एतेषु भाष्यकारेषु विश्वरूप-मेधातिथि-कुल्लूकविज्ञानेश्वर-हरदत्त-नन्दपण्डितादीनां प्रामुख्यमस्ति ।

भाष्यानन्तरमपि धर्मशास्त्रीयस्मृतिनिबन्धग्रन्थानां निबन्धृ ृणाञ्च योगदानमतीव प्रशंसनीयमस्ति । एषु स्मृतिनिबन्धृषु केचन बङ्गीयाः, अन्ये दाक्षिणात्याः, अपरे उत्कलीयाः, परे मैथिलाः, अन्ये महाराष्ट्रियाश्च भवन्ति । एषु स्मृतिनिबन्धृषु हेमाद्रेश्चतुर्वर्गचिन्तामणिः, लक्ष्मीधरस्य कृत्यकल्पतरुः, चण्डेश्वरस्य स्मृतिरत्नाकरः, मित्रमिश्रस्य वीरमित्रोदयः, रघुनन्दस्य स्मृतितत्त्वम्, शतानन्दस्य शतानन्दसंग्रहः, गदाधरस्य गदाधरपद्धत्तिश्चेति ग्रन्थाः प्रमुखाः भवन्ति ।

स्वानुशीलनप्रश्नाः

१. सूत्रशब्दस्य कोऽर्थः ?

(उ)..............................

२. कः प्रप्रथमधर्मशास्त्रकारः ?

(उ) .............................

## सारांशः

प्रियपाठकाः ! अस्मिन् अंशे धर्मशास्त्रस्य स्वरूपं, धर्मशास्त्रस्य प्रविभागाश्च प्रतिपादिताः सन्ति । धर्मशास्त्रस्य स्मृतिरिति संज्ञा कथं, धर्मशास्त्रस्य कः प्रकृतिप्रत्ययः कश्च तस्य समासः इत्यस्मिन् विषयेऽत्र सम्यक् चर्च्चिताः सन्ति । धर्मशास्त्रस्य श्रेणीविभागेषु सूत्रस्य स्वरूपं, सूत्रभेदाः, सूत्रस्योद्गमः, धर्मसूत्रकाराः, गृह्यसूत्रकाराः, स्मृतिशब्दार्थः, स्मृतिकाराः, भाष्यशब्दार्थः, भाष्यकाराः, प्रदेशभेदेन स्मृतिनिबन्धकाराश्चात्र विवेचिताः दृश्यन्ते ।

## पारिभाषिकशब्दाः

(क) स्मृतिः - धर्मशास्त्रम् ।

(ख) व्यवहारः - Case, विवादः ।

(ग) आचारः - अनुमानः, परम्परा ।

(घ) प्रतिज्ञा - पक्षः, भाषा, आवेदनम् ।

(ङ) शङ्काभियोगः - असतां संसर्गात् यः अभियोगो भवति ।

(च) तत्त्वाभियोगः - चिह्नं दृष्ट्वा यः आभियोगो भवति ।

(छ) होढा - लोप्त्रं चिह्नं वा ।

(ज) प्राड्विवाकः - विचारकः ।

(झ) प्रायश्चित्तम् - पापनाशककर्मविशेषः ।

(ञ) भाष्यम् - टीका, व्याख्या ।

## निबन्धात्मकप्रश्नाः

(क) धर्मशास्त्रस्य स्वरूपं विलिख्य तत्र प्रतिपादितप्रमुखविषयानुपस्थापयत ।।

(ख) स्मार्तधर्माणां कथम् आचार-व्यवहार-प्रायश्चित्तेषु अन्तर्भाव इति विलख्य व्यवहाराणां याथार्थ्यं वर्णयत ।।

(ग) धर्मशास्त्रस्य श्रेणीविभागं कुरुत ।।

## विश्लेषणात्मकप्रश्नाः

(क) पं० कुलमणिमिश्रमतेन धर्मशास्त्रस्वरूपं व्याख्यात ।।

(ख) प्रायश्चित्तस्य धर्मशास्त्रे योगदानं वर्णयत ।।

(ग) सूत्राणामुद्गमस्थानं स्पष्टयत ।।

## लघुप्रश्ना:

(क) धर्मशास्त्रस्य स्मृतिरिति संज्ञा कथम् ?

(ख) आचार: परमो धर्म: कथम् ?

(ग) प्रायश्चित्तस्य कथं निमित्तधर्मत्त्वम् ?

(घ) व्यवहारस्य कथं गुणधर्मत्त्वम् ?

(ङ) के प्रमुखभाष्यकारा: ?

## एकाङ्कप्रश्ना:

(क) धर्मशास्त्रमित्यस्य क: प्रकृतिप्रत्यय: ?

(ख) धर्मशास्त्रमित्यत्र क: समास: ?

(ग) धर्मास्त्रिस्य का अपरा संज्ञा ?

(घ) धर्मशास्त्रस्य कथं प्रामाण्यम् ?

(ङ) धर्मशास्त्रशब्द: कीदृश: ?

(च) धर्मशास्त्रस्य के त्रय: प्रमुखविषया: ?

(छ) धर्मशास्त्रसाहित्यं कतिधा विभक्तम् ?

(ज) सूत्रमित्यस्य कोऽर्थ: ?

(झ) कस्मात् वेदाङ्गात् सूत्राणामुद्भव: ?

(ञ) क: प्रप्रथमधर्मसूत्रकार: ?

## एकाङ्कप्रश्नानामुत्तराणि

| | |
|---|---|
| (क) धृञ् + मन् + शास् + ष्ट्रञ् । | (ख)मध्यपदलोपिकर्मधारयसमास: । |
| (ग) स्मृति: । | (घ) वेदानुमापकत्वेन । |
| (ङ) योगरूढ: । | (च) आचार: व्यवहार: प्रायश्चित्तञ्च । |
| (छ) चतुर्धा । | (ज) संक्षिप्तम् । |
| (झ) कल्पसूत्रात् । | (ञ) गौतम: । |

# अंशः- चतुर्थः

संरचना

४.१. प्रस्तावना

४.२. उद्देश्यम्

४.३. धर्मशास्त्रस्योद्भवः क्रमविकासश्च

## ४.१. प्रस्तावना

''श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः'' इति मुनुमतानुसारं श्रुतिर्वेदः स्मृतिश्च धर्मशास्त्रमित्युच्यते । अस्यैव स्मृतिसंज्ञाभिधस्य धर्मशास्त्रस्य श्रुत्यनुमापकत्वेन प्रामाण्यमिति प्रसिद्धिः । वेद एव सकलशास्त्राणामाधाररूपः, वेदादेव सर्वशास्त्राणामुदभवः । धर्मशास्त्रस्यापि स्त्रोतस्तस्मादेव निःसृतम् । धर्मशास्त्रे न केबलं धर्मस्य नापि केबलमात्रं धर्मार्थयोर्विचारो वर्त्ततेऽपितु धर्मार्थकामानां मोक्षहेतुत्वं तत्र विचारितमस्ति । वेदोक्तपरमो धर्मः, स्मृतिशास्त्रोक्तधर्मः, शिष्टाचारश्चेति त्रयो धर्माः सनातनाः । एतेषां सर्वेषां साङ्गोपाङ्गविचारः धर्मशास्त्रेष्वेव प्राप्यते । अस्यैव धर्मशास्त्रस्य कथमुद्भवस्तस्य क्रमिकविकासश्च पृथिव्यां कथं जात इत्ययं विषयो विचारसापेक्षः ।।

## ४.२. उद्देश्यम्

प्रियपाठकाः ! अंशेऽस्मिन् भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- श्रुतिशब्दार्थं ज्ञातुं प्रभवन्ति ।
- स्मृतिशब्दार्थं ज्ञातुं शक्नुवन्ति ।
- स्मृतिप्रामाण्यमपि ज्ञातुं प्रभवन्ति ।
- धर्मशास्त्रस्योद्भवस्थानमपि ज्ञातुं शक्नुवन्ति ।
- पुरुषार्तानामाधारभूतं कथमिदं शास्त्रमिति ज्ञातुं प्रभवन्ति ।
- सूत्र-स्मृति-भाष्य-निबन्धरूपेण कथं शास्त्रस्यास्य क्रमिकविकासोऽभूदित्यस्मिन् विषयेऽपि ज्ञातुं शक्नुवन्ति ।

## ४.३. धर्मशास्त्रस्योद्भवः क्रमविकासश्च

अधर्माल्लोपः धर्माज्जयश्चेत्ययं प्रवादोऽस्मिन् संसारे आदिमयुगादद्यावधि प्रचलति । भारतीयसंस्कृतेः सनातनवैदिकधर्मो मूलभूतः । लोकेऽस्मिन् दृश्यमानेषु सर्वेष्वपि धर्मेषु सनातनवैदिकधर्मो न केवलं भारतीयसंस्कृतेः मूलाधारोऽपि तु समग्रसृष्टेः मूलाधार एव । अभ्युदयार्थं जनानां बुद्धिः धर्मे तिष्ठति । धर्म एवैको मित्रम् । यो मरणेऽप्यभीष्टफलदानार्थ-मनुगच्छति, यस्मादन्यत्सर्वं भार्यापुत्रादिशरीरेणैव सहादर्शनं गच्छति । तस्मात्पुत्रादिस्नेहापेक्षयाऽपि धर्मो न हातव्यः । अतो मनुनोक्तम् ।

**एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः ।**
**शरीरेण समं नाशं सर्वमन्यद्धि गच्छति ।।**

जगदिदं धर्मं विना क्षणमपि स्थातुं न शक्नोति । अतो धर्मस्य विनाशो कस्मिन् काले न भवति । यदा संसारे धर्मस्य विनाशो जायते अधर्मस्य च प्रादुर्भावो दृश्यते तदा धर्मस्य पुनः स्थापनाय पापस्य च विनाशाय स्वयं भगवान् स्वशरीरं प्रकटयति । धर्मं विना अर्थकामादिपुरुषार्थानां प्राप्तिः न सम्भवति । धर्मविरुद्धार्थकामौ शास्त्रे लोके च निन्दितौ भवतः । यावर्थकामौ धर्मविरोधिनौ भवेतां तौ परिहरेताम् । यथा चौर्यादिनाऽर्थोपपादनम्, दीक्षादिने यजमानस्य पत्न्युपगमः । उदर्क-उत्तरकालस्तत्रासुखं यत्र तं धर्ममपि परित्यजेत् । यथा पुत्रादिवर्गोपाष्ययुक्तस्य सर्वस्वदानम् । लोकविक्रुष्टं यत्र लोकानां विक्रोशः, यथा कलौ मध्यमाष्टकादिषु गोवधादिरित्युक्तं कुल्लूकेन । तस्माद्धर्मार्थकामेषु त्रिषु धर्म एव प्रधानः । धर्माचरणेनार्थकामयोः प्राप्तिर्भवति इति भगवता व्यासेन प्रतिपादितम् । साधनं विहाय न हि संसारेऽस्मिन् केनापि साध्यं संपादयितुं शक्यते । अत इहलोके परलोके च यत्किमप्युत्तमफलं साध्यत्वेन प्रतीयते तस्यैव साधनं धर्म एव । अस्मिन् भारतवर्षे अनादिकालादारभ्यायमतीव प्राचीनतमसनातनधर्मो विशालद्रुमरूपेण स्थित्वा पत्रपुष्पफलरूपेण अर्थकाममोक्षान् धर्मजिज्ञासूनां कृते प्रददाति ।

वेदो भवति धर्मस्य स्रष्टा । वेदेष्वेव सर्वत्र धर्मशब्दस्य प्रयोगो विभिन्नेष्वर्थेषु जातः । विश्वमानवसभ्यतायाः संस्कृतेः सदाचारस्य धर्मस्य च

परमप्राचीनतममूलग्रन्थो वेद: । ब्राह्मणोऽस्य मुखमासीत् इत्यादिवेदादेव चातुर्वर्ण्यं प्रसिद्ध्यति । ब्राह्मणीभूतमातापितृजनितत्वमिति तदुपजीवितया स्वर्गादिलोकोऽपि वेदादेव प्रसिद्ध: । एवं ब्रह्मचर्याद्याश्रमा अपि चत्त्वारो वेदमूलकत्वाद्वेदादेव प्रसिद्ध्यति । किं बहुना, यत्किञ्चिदतीतं वर्त्तमानं भविष्यं च तत्सर्वं ''अग्नौ प्रत्याहुति: सम्यग्'' इत्यादिन्यायेन वेदादेव प्रसिद्ध्यति । यथाह मनु: -

**चातुर्वर्ण्यं त्रयो लोकाश्चत्त्वार आश्रमा: पृथक् ।**
**भूतं भव्यं भविष्यं च सर्वं वेदात्प्रसिद्ध्यति ।।**

अत: धर्मविषये प्रथमं परमं च प्रमाणं वेद एव । ''शतायुर्वै पुरुष:'' इति श्रुतिवचनानुसारं मानवजीवतं शतवार्षिकमिति पुरालोकधारणास्ति, तर्हि तेषां दीर्घजीवनं न केवलमाधिभौतिकेन संग्रहेण अपि तु धर्मभावेनाधिकमानन्दं प्राप्नोति । मानवो सर्वदा धर्ममाध्यमेन आत्मन: सर्वोच्चसुखमभ्युदयं च साधयति । अतोऽस्मिन् संसारे विद्वान् पुत्रपौत्रादिसांसारिकसुखाय मरणादनन्तरं परलोकेऽपि मोक्षलाभाय धर्ममाचरेत् ।

प्रोक्तधर्मं प्रमाणयितुं वेद एव प्रमुखं स्थानं भजते ''धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुति''रिति महाभारतवचनात् । सकलकारणभूतस्य परंब्रह्मणो वाचका वेदा: । ''वेदैश्च सर्वैरहमेव वेद्य'' इति स्मृतिरपि वेदमूला, वाच्यवाचकयोरभेदात् वेदो ब्रह्म इत्युच्चते । सर्वत्र धर्मशास्त्रेषु ब्रह्मपदेन वेदस्यैवोल्लेख: । वैदिकशाखानामपि श्रुतिसंज्ञा प्रसिद्धा । ''श्रुतिस्तु वेदो विज्ञेय'' इति मनुस्मरणात् । आसां च श्रुतिसंज्ञाश्रवणात्, शब्दा हि श्रवणेनैव प्रत्यक्षीक्रियन्ते । प्रत्यक्षत्वेन तासां प्रमाणं वरिष्ठिम् । प्रत्यक्षत्वञ्च तासां ''श्रुतिं पश्यन्ति मुनय:'' इत्याद्युक्ते: प्रसिद्धमेव । उक्तानां शाखानां सर्वासामपि धर्मे प्रामाण्यम् । परस्परविमर्दे तु विकल्प: । तत्र कुलपरस्परया वा आत्मतुष्ट्या निर्णय: । अस्यैव नित्यरूपस्य शब्दब्रह्मणो वेदस्य रागद्वेषरहितै: तदर्थानुध्यानपरैर्मन्वादिभि: स्मरणरूपा स्मृति: अविच्छिन्नपारम्परिकतया पौरूषेयी अपि नित्यरूपा । तच्च प्रतिपादितं भर्त्तृहरिणा -

**अनादिमव्यवच्छिन्नां श्रुतिमाहुरकर्त्तृकाम् ।**
**शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृति: ।।**

अयं च स्मृतिशब्द: पङ्कजादिशब्दवत् धर्मशास्त्रेषु एव योगरूढ: ''धर्मशास्त्रं तु वै स्मृतिरिति मनुस्मरणात् । शास्त्रान्तरे तु क्वचित् यौगिक:, क्वचिच्च गौण: ।

चतुर्णां पुरुषार्थनामाधारभूतमिदं शास्त्रम् । धर्मार्थकाममोक्षात्मकेषु चतुर्षु पुरुषार्थेषु य: प्रप्रथम: पुरुषार्थ: स एवोत्तराणां त्रयाणामेवार्थकाममोक्षाणां परमं साधनम् । धर्मश्चतुर्विधेषु प्रथम इति प्रसिद्धिरस्ति । तत्र काममोक्षयो: सुखसाध्यत्वात् प्रार्थनाविषयत्वम्, धर्मार्थयोस्तु सुखसाधनत्वात् प्रार्थनाविषयत्वं न स्वरूपत: । अत: काममोक्षयो: प्रकृष्टत्वं संसिद्धम् । तत्रापि मोक्षस्य प्रकृष्टतरत्वम् । तत्र यद्यपि धर्मार्थकाममोक्षा: शास्त्रेणानेन प्रतिपाद्यन्ते, तथापि धर्मस्य प्राधान्याद्धर्मग्रहणम् । प्राधान्यं च धर्ममूलत्वादितरेषाम् । न च वक्तव्यं धर्ममूलोऽर्थ:, अर्थमूलो धर्म इत्यविशेष इति । यतोऽर्थमन्तरेणापि जपस्तपस्तीर्थयात्रादिना धर्मनिष्पत्ति:, अर्थलेशोऽपि न धर्ममन्तरेणेति । एवं काम-मोक्षावपीति ।

धर्मप्रतिपादकत्वेन शास्त्रस्यास्य धर्मशास्त्रमिति नामकरणम् । सूत्र-स्मृति-भाष्य-निबन्ध भेदेन धर्मशास्त्रमिदं विराजतेतराम् । एषु चतुर्विधेषु इतिहासदृष्ट्या सूत्रग्रन्थानां प्राथम्यं दृश्यते । सूत्रं नाम संक्षिप्तीकरणम्, अस्यैव सूत्रसाहित्यस्याविर्भाव: वेदाङ्गभूतकल्पसूत्रादेवाभूत् । प्राचीनकाले धर्मविद्भि: सूत्राकारेणैव धर्मशास्त्रग्रन्था:लिखता: । कल्पसूत्रादाविर्भूतस्य श्रौत-स्मार्त्त सूत्रयो: स्मार्त्तसूत्रं धर्मसूत्र-गृह्यसूत्रभेदेन द्विधा विभक्तम् । धर्मसूत्रकारेषु गौतमस्य प्राधान्यम्, तदनु बौधायन-आपस्तम्ब-वसिष्ठादीनां धर्मसूत्रकाराणां नामानि सुप्रसिद्धानि । गृह्यसूत्रकारेषु गोभिल-पारस्कर-आपस्तम्बादीनां गृह्यसूत्रग्रन्था: सुप्रसिद्धा: भवन्ति । धर्मसूत्रेषु प्रायश: धर्मशास्त्रस्य सर्वान्नेव विषयानाश्रित्य विचारो दृश्यते । गृह्यसूत्रेषु तु केवलमात्रं गृह्याग्निसाध्यकर्माणां पञ्चमहायज्ञ-होम-व्रत-संस्कारादीनां विचारो वर्त्तते ।

क्रमश: सूत्रग्रन्थानां पठने लोकेषु अनादरो जात: । परम्पराक्रमेण छन्दोबद्धस्मृतिग्रन्थानां प्रादुर्भाव: संजात: । योगीश्वरयाज्ञवल्क्येन विंशतिधर्मशास्त्रकाराणां नामानि गृहीतानि । यथा-

**मन्वात्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।**
**यमापस्तम्बसंवर्त्ताः कात्यायनबृहस्पती ।।**
**पराशरव्यासशंखलिखिता दक्षगौतमौ ।**
**शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ।। इति।।**

स्मृतयः अष्टत्रिंशत् प्रसिद्धाः कर्त्तृभेदेन । मन्वङ्गिरोव्यासगौत-मात्रियमवसिष्ठदक्ष-संवर्त्तशातातप-पराशरविष्णवापस्तम्बहारीतशङ्खकात्याय-नबृहस्पतिप्रचेतोनारदयाज्ञवल्क्य-बौधायनपितामहसुमन्तुकश्यपवभ्रुपैठीन-सिव्याध्रपाद-सत्यव्रतभरद्वाजगार्ग्यकार्ष्णाजिनजाबालि-जमदग्निलौगाक्षिवत्स-मरीचिदेबलपारस्करा: स्मृतिकर्त्तार: । तेषां स्मृतिस्तु तत्तन्नाम्ना प्रसिद्धा । नाचिकेतस्कन्दकाश्यप-सनत्कुमार-शन्तनु-जातुकर्णि-कपिञ्जल-कणाद-विश्वामित्रप्रमुखा: उपस्मृतिकर्त्तार: । आसु सर्वासु मनुस्मृतेरेव सर्वातिशायिप्रामाण्यं वरीवर्त्ति ''मनुर्वै यत् किञ्चिदवदत् तद्भेषजमिति'' श्रुते: । ''मन्वर्थविपरीता तु या स्मृति: सा न शस्यत इति बृहस्पतिस्मरणाच्च । इमे श्रुतिस्मृती भगवत: आज्ञारूपे न कदाचिदप्यवज्ञेये । यथा-

**श्रुतिस्मृति ममैवाज्ञे यस्ते उल्लङ्घ्य वर्त्तते ।**
**आज्ञाच्छेदी मम द्वेषी न स भक्तो न वैष्णव: ।।**

इत्युक्ते: । हेतुश्चात्र - ''ताभ्यां धर्मो हि निर्बभौ'' इति मनुस्मरणात् ।

सूत्रस्मृत्यात्मकधर्मशास्त्रग्रन्थानामनन्तरं धर्मशास्त्रीयभाष्यसाहित्यस्य स्थानम् । भाष्यं नाम टीका व्याख्या वा । सूत्रस्मृत्यात्मकधर्मशास्त्रग्रन्थानां पठने यदा काठिन्यमनुभूय धर्मविद्भि: अनादरो विहितस्तदा क्रमश: तत्तत्सूत्रस्मृतिग्रन्थानामाधारेण तत्र सरलीकरणार्थं भाष्यग्रन्थानां क्रमिकविकाशो जात: । गौतमधर्मसूत्रस्योपरि चत्वारि भाष्याणि संजातानि । मनुस्मृतेरूपरि नवसंख्यकानि भाष्याण्यपि अभूबन् । याज्ञवल्क्यस्मृतेरूपरि सप्तभाष्याणि सन्ति । पराशरस्मृतेरूपरि द्वे भाष्ये स्त: । एवमेव प्रकारेण धर्मसूत्राणामुपरि गृह्यसूत्राणामुपरि स्मृतिग्रन्थानामुपरि भाष्याणि संजातानि । एतेषु भाष्यकारेषु हरदत्त-मस्कराचार्य-असहाय-विश्वरूप मेधातिथि-विज्ञानेश्वर- कुल्लूक-अपरार्क-नन्दपण्डित-माधवाचा-र्यादीनां प्रामुख्यं दृश्यते ।

सूत्र-स्मृति-भाष्यात्मकधर्मशास्त्रग्रन्थानामनन्तरं धर्मनिबन्धग्रन्थानां क्रमविकाशो जातः । धर्मनिबन्धृभिः विभिन्नेभ्यः प्रामाणिकग्रन्थेभ्यः प्रमाणवचनानि संगृह्य पूर्वाचार्याणां मतान्यनुशील्य युक्तिप्रमाणाभ्यां च स्वाभिमतं तत्र तत्र निबन्धग्रन्थेषु प्रकटितम् । एतेषु धर्मनिबन्धृषु केचन दाक्षिणात्याः, अपरे महाराष्ट्रिया, इतरे वङ्गीयाः, अन्ये मैथिलाः, केचन उत्कलीयाश्च भवन्ति । देशभेदेन परम्पराभेदेन देशाचारं कुलाचारं लोकाचारं च दृष्ट्वा धर्मशास्त्रकारैः निबन्धग्रन्थाः प्रस्तुताः । तेषु हेमाद्रि- लक्ष्मीधर- देवणभट्ट-माधवाचार्यजीमूतवाहन-शूलपाणि-कमलाकर-नीलकण्ठ-शतानन्द गदाधर- मित्रमिश्रादीनां धर्मनिबन्धृणां प्रामुख्यं दृश्यते ।

सूत्र-स्मृति-भाष्य निबन्धात्मकमिदं धर्मशास्त्रं पवित्रतममार्यजुष्टं च शास्त्राम् । लोकद्वयकल्याणाय तदवश्यमध्येतव्यम् । धर्मशास्त्रमधीयानाः स्वयं विशुद्धाः सन्तः अन्यानपि विशुद्धान् कृत्वा स्वस्ववंशस्य स्वदेशस्य स्वकुलस्य च कल्याणं साधयन्ति । अत्र प्रतिपादितधर्मः प्रवृत्तनिवृत्तभेदेन द्विविधः । प्रवृत्तधर्मेण मानवः पितृयानमार्गेण स्वर्गं गत्वा तत्र सुखमनुभूय क्षीणे पुण्ये पुनरिहलोकं प्रत्यावर्त्तते । निवृत्तधर्मेण देवयानमार्गमासाद्य सूर्यमण्डलं भित्त्वा परमे ब्रह्मणि लीयते । देवयानमार्गलाभः धर्मस्य सर्वोत्तमं फलम् ।

स्वानुशीलनप्रश्नाः

१.धर्मशास्त्रस्य मूलस्रोतः कस्मात् निःसृतम् ?

(उ)..........................................

२.धर्मशास्त्रस्य साहित्यचतुष्टयं किम् ?

(उ).......................................

## सारांशः

प्रियपाठकाः ! अस्मिन् अंशे निखिलस्य धर्मशास्त्रसाहित्यस्योद्भवविषये क्रमविकासविषये चात्र मया विमर्शो विहितः । धर्मस्योद्गमस्थानादारभ्य पुरुषार्थेषु धर्मस्य कथं प्राधान्यमित्यस्मिन् विषयेऽपि विचारः कृतः । धर्मशास्त्रस्य कथं स्मृतिरिति संज्ञा पङ्कजादिवत् योगरूढाः, धर्मं प्रमाणयितुं कथं श्रुति-स्मृत्योः प्राधान्यं, पुरुषार्थानामाधारभूतं

कथमिदं शास्त्रं, कल्पादेवाङ्गात् कथं सूत्रसाहित्यस्योत्पत्तिः, धर्मगृह्यभेदेन कथं स्मार्त्तसूत्रस्य विभाजनं, सूत्र स्मृति-भाष्य-निबन्धात्मक-धर्मशास्त्रसाहित्यस्य समग्रेऽस्मिन् विश्वे विकाशो कथं जातश्चेत्यादिविषयाः समासेनात्र विवेचिताः सन्ति ।

## पारिभाषिकशब्दाः

(क) पुरुषार्थः- पुरुषप्रयोजनम्, चतुर्वर्गः (धर्मः, अर्थः, कामः, मोक्षश्च) The Four ends of life.

(ख) अर्थः - अभिलाषः, प्रयोजनम्, धनम् ।

(ग) कामः - कामना ।

(घ) मोक्षः - अपवर्गः, मुक्तिः ।

(ङ) पितृयानमार्गः- प्रवृत्तधर्मस्य फलम् ।

(च) देवयानमार्गः - निवृत्तधर्मस्य फलम् ।

(छ) भाष्यम् - व्याख्यानविशेषः, टीका, Commentary.

(ज) निबन्धः - रचनाविशेषः, A kind of Composition.

(झ) प्रवृत्तधर्मः - ज्योतिष्टोमादिना स्वर्गप्राप्तिः ।

(ञ) निवृत्तधर्मः - पञ्चमहाभूताद्यतिक्रम्य मोक्षप्राप्तिः ।

## निबन्धात्मकप्रश्नाः

(क) धर्मस्य धर्मशास्त्रस्योद्भवं सविस्तरं लिखत ।।

(ख) धर्मशास्त्रं कथं पुरुषार्थानामाधारभूतमिति विलिख्य तस्य स्मृतिरिति संज्ञां निरूपयत ।।

(ग) धर्मशास्त्रसाहित्यस्य क्रमिकविकासं लिखत ।।

## विश्लेषणात्मकप्रश्नाः

(क) प्रवृत्तधर्मं सप्रमाणं व्याख्यात ।।

(ख) निवृत्तधर्मं सप्रमाणं व्याख्यात ।।

(ग) सूत्राणामुद्गमस्थानं प्रकटयत ।।

## लघुप्रश्ना :

(क) पुरुषार्थचतुष्टयं स्पष्टयत ।

(ख) श्रुति - स्मृत्यो: धर्मे प्रामाण्यं विशदयत ।

(ग) स्मृति: धर्मशास्त्रमिति प्रमाणयत ।

(घ) सूत्रसाहित्यस्योद्भवं प्रतिपादयत ।

(ङ) स्मृतिकारेषु मनो: प्राथम्यं दर्शयत ।

## एकाङ्कप्रश्ना :

(क) मोक्षप्राप्तये साधन: क: ?

(ख) धर्मस्य आदिस्रोत: कस्मात् ?

(ग) धर्मार्थकामानां साध्य: क: ?

(घ) धर्मे परमं प्रमाणं किम् ?

(ङ) के भगवत: आज्ञारूपे ?

(च) सर्वासु स्मृतिषु का सर्वप्रथमा ?

(छ) भाष्यमित्यस्य कोऽर्थ: ?

(ज) सूत्रं नाम किम् ?

(झ) केन धर्मेण स्वर्गप्राप्ति: ?

(ञ) केन धर्मेण मोक्षप्राप्ति: ?

## एकाङ्कप्रश्नानामुत्तराणि

(क) धर्म: । (ख) वेदात् ।

(ग) स्वर्ग: । (घ) श्रुति: ।

(ङ) श्रुतिस्मृती । (च) मनुस्मृति: ।

(छ) व्याख्या टीका वा । (ज) संक्षिप्तम् ।

(झ) प्रवृत्तधर्मेण । (ञ) निवृत्तधर्मेण ।

# अंशः - पञ्चमः

संरचना

५.१. प्रस्तावना
५.२. उद्देश्यम्
५.३. धर्मशास्त्राणां रचनाकालः
५.४. धर्मशास्त्राणां महत्त्वम्

## ५.१. प्रस्तावना

नित्यमसावर्थस्तत्र भवतां भवतां चेतसि पदं धत्ताम् । यद्यपि - ''तमेव विदित्वा'', ''ज्ञानादेव तु कैवल्यम्'', ''तत्त्वमस्यादिवाक्योत्थं ज्ञानं मोक्षस्य साधनम्'' इत्यादिभिः परःशताभिः श्रुतिस्मृतिभिर्निरतिशयानन्दावाप्ति-लक्षणस्य मोक्षस्य ज्ञानैकसाध्यत्वं प्रतिपाद्यते तथापि तादृशमोक्षोपायो धर्म इति भगवानाम्नाय एवावगमयति । धर्मश्च विधिबोधितं कर्मैव । ''धर्मो विश्वस्य जगतः प्रतिष्ठा'' इतीयमुद्घोषणा तैत्तिरीयारण्यके कृता वर्त्तते । तत्प्रतिपादकशास्त्रत्वेन धर्मशास्त्रस्य प्रसिद्धिः सर्वविदितास्ति । यद्यपि शास्त्रमिदं वेदादेव निःसृत्य वेदानन्तरप्रमाणत्वेन ख्यातिमवलम्ब्य समग्रेऽस्मिन् विश्वे विकसितं दृश्यते तथापि अस्य कः प्रणयनकालस्तेषां प्रविभागानाञ्च कः कालः, किञ्च तस्य शास्त्रान्तरेषु महत्त्वमित्यवश्यमेव सर्वैः ज्ञातव्यम् ।

## ५.२. उद्देश्यम्

प्रियपाठकाः ! अंशेऽस्मिन् भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।-

- धर्मशास्त्रस्य रचनाकालं ज्ञातुं शक्नुवन्ति ।
- सूत्रसाहित्यस्य प्रणयनकालं ज्ञातुं प्रभवन्ति ।
- स्मृतिसाहित्यस्य रचनाकालं ज्ञातुमर्हन्ति ।
- भाष्यसाहित्यस्य कालं ज्ञातुं प्रभवन्ति ।
- स्मृतिनिबन्धसाहित्यस्य रचनाकालं ज्ञातुं शक्नुवन्ति ।
- शास्त्रान्तरेषु धर्मशास्त्रस्य महत्त्वमपि ज्ञातुं प्रभवन्ति ।

## ५.३. धर्मशास्त्राणां रचनाकाल:

धर्मशास्त्राणां रचनाकालविषये इतिहासकारेषु बहुमतभेद: परिलक्ष्यते । परन्तु डा० पी.वी. काणेमहाभागानां मतानुसारं गौतम - बौधायनापस्तम्बधर्मसूत्रादयो ग्रन्था: निश्चितरूपेण ख्री.पू. ६००त: ३०० मध्ये भवितुमर्हन्ति । यतो हि गौतमेन बौधायनेन च धर्मशास्त्रस्य चर्चा कृता । पुनश्च निरुक्तग्रन्थात् ज्ञायते यत् यास्कस्य बहुपूर्वादेव धर्मशास्त्रविषयकरिकथाधिकारविषये वादविवाद: प्रचलित आसीत् । धर्मसूत्रान्तर्गतविषया: यथा कर्त्तव्याकर्त्तव्यादिविषये पूर्वमीमांसायां जैमिनिनापि सूत्रितम् । पुनश्च धर्मशास्त्रविषये महर्षिपतञ्जलिनाऽपि महाभाष्ये वर्णितम् । अत: एतस्माद् ज्ञायते यद्यास्कात्पूर्वं धर्मशास्त्राणां रचनाऽभूदिति ।

पुनश्च धर्मशास्त्रेषु सूत्र-स्मृतिसाहित्ययोर्मध्ये प्राचीनार्वाचीनविषये मतभेद: परिलक्ष्यते । स्मृतिषु प्राचीनतमा मनुस्मृति:, सूत्रेषु प्राचीनतमं गौतमधर्मसूत्रञ्चेति । परन्तु मनु-गौतमयोर्मध्ये क: पूर्व: कश्च पर: इत्यस्मिन् विषये शङ्का उत्पद्यते । शैलीदृष्ट्या धर्मसूत्राणां रचना स्मृत्यपेक्षया पूर्वमेव जातेति काणेमहोदयस्याभिमतम् । परन्तु गौतमापेक्षया मनु: प्राचीनो भवति । मनोस्त्रैविद्यवादिता- ''त्रैविद्यो हेतुकस्तर्की'' इत्यादिभिर्वचनै: सुस्पष्टा । परन्तु ''चत्वारश्चतुर्णां पेरगा वेदानाम्'' इत्यादिवचनेन गौतमस्य चातुर्विद्यवादित्वात् त्रैविद्यावादिनोर्मनोरपेक्षया गौतमस्यार्वाचीनता सुसिद्धा । आपस्तम्बोऽपि स्वकीये धर्मसूत्रे- ''अथैतन्मनु: श्राद्धशब्दं कर्म प्रोवाच'' इति मनोर्नाम प्रतिपादनात् मनोरपेक्षया अर्वाचीन इति सिद्ध्यति । बौधायनस्य नामापि याज्ञवल्क्येन न दर्शितम्, तेन च ''वाजसनेयिनं याज्ञवल्क्यं तर्पयामि'' इति याज्ञवल्क्यो दर्शित: । तस्माद् बौधायनश्चातुर्विद्यवादित्वेन मनोरपेक्षयाऽर्वाचीन एव । पुनश्च मनो: प्रशंसायां छान्दोग्यब्राह्मणे श्रूयते यत् -

''मनुर्वै यत्किञ्चिदवदत्तद्भेषजं भेषजताया:'' इति मनो: प्रशंसावसरे तत्प्रणीतस्मृतेरपि प्रशंसनं कृतमाचार्येण बृहस्पतिना -

**वेदार्थोपनिबद्धत्वात् प्राधान्यं हि मनो: स्मृतम् ।**
**मन्वर्थविपरीता तु या स्मृति: सा न शस्यते ।।**
**तावच्छास्त्राणि शोभन्ते तर्कव्याकरणानि च ।**

**धर्मार्थमोक्षोपदेष्टा मनुर्यावन्न दृश्यते ।।**

मनुव्यतिरेकेण न कोऽपि अन्यो धर्मशास्त्रकारो गौतमेनोद्धृतः । एतेन गौतमात् पूर्ववर्त्तीत्वेन केवलं मनुरेवासीदिति केचनानुभवन्ति ।

आचार्यकण्ठोद्गीर्णा वाणीसंसृतिः यथा पद्येन भवति, न तथा गद्येन इति कृत्वा गद्यापेक्षया पद्यस्य प्राचीनत्वात् श्लोकस्य सर्वप्राचीनत्वेन गौतमधर्मसूत्रापेक्षया मनुस्मृतिः प्राचीनतमा इति सुसिद्धा । पुनश्च याज्ञवल्क्येन धर्मशास्त्रकारसंग्रहावसरे मनोर्नाम प्रथमं दत्वा गौतमस्य नाम बहुपरं दत्तम् । यथा -

**मन्वत्रिविष्णुहारीतयाज्ञवल्क्योशनोऽङ्गिराः ।**
**यमापस्तम्बसंवर्त्ता कात्यायनबृहस्पती ।।**
**पराशरव्यासशंखलिखिता दक्षगौतमौ ।।**
**शातातपो वसिष्ठश्च धर्मशास्त्रप्रयोजकाः ।।इति ।।**

केषाञ्चन शास्त्रकाराणामभिमतं यत् मनुस्मृतौ ''शौनकस्य सुतोत्पत्त्या उतथ्यतनयस्य च'' इत्यत्र उतथ्यतनयपदेन मनुः परम्परया गौतमस्य नाम गृह्णाति । तर्हि गौतमो मनोरपेक्षया प्राचीनतर इति प्रतिभाति । भाषादृष्ट्या धर्मसूत्राणां रचना स्मृतिशास्त्राणां रचनापेक्षया अतीव कठिना न च बोधगम्या । पुनश्च सूत्रसाहित्यं गद्यात्मकं, गद्य-पद्योभयात्मकञ्च । परन्तु स्मृतिसाहित्यं केवलं पद्यात्मकम् ।

काणेमहाभागानां मतानुसारं स्मृतिग्रन्थाः सूत्रग्रन्थानामपेक्षया अर्वाचीनाः, यतो हि धर्मसूत्रेषु विषयव्यवस्थापनं व्यवस्थिततया न विहितमस्ति, परन्तु स्मृतिषु विषयव्यवस्था व्यवस्थिता वर्त्तते, पुनश्च स्मृतिग्रन्थापेक्षया सूत्रग्रन्थानां संख्या न्यूनतमा । तेषां मतानुसारं धर्मसूत्राणां रचना स्मृतिग्रन्थानां प्रागेव जाता । मैक्समूलरमहोदयेन धर्मशास्त्ररचनाकालनिर्णयविषये उक्तं यत् सूत्रग्रन्थानामनन्तरमेव अनुष्टुप्छन्दोनिबद्धग्रन्थानां रचना जाता इति । परन्तु ऐतिहासिकेन श्रीमता डा० पी० वी० काणेमहोदयेन नेदं वचनं स्वीक्रियते । तन्मतानुसारं तु कथयितुं शक्यते यत् तेषु तेषु दिनेषु अस्माकं तद्विषयकं ज्ञानमेतावन्न्यूनमासीत् येन सामान्यीकरणमसम्भवमेव भवति । यथा छन्दोबद्धा मनुस्मृतिः विष्णुधर्मसूत्रात् प्राचीना । वसिष्ठधर्मसूत्रस्य समकालिकी च भवति । केषुचित्प्राचीनधर्मसूत्रेषु यथा बौधायनधर्मसूत्रेषु

बृहदाकारश्लोकाः प्राप्यन्ते । आपस्तम्बधर्मसूत्रेष्वपि बहवः श्लोकाः प्राप्यन्ते । एतस्मादेतत् स्पष्टं भवति यत् श्लोकबद्धाः ग्रन्थाः धर्मसूत्रात्पूर्वमेव विद्यमानाः आसन्निति । एतदतिरिक्तमपि आपस्तम्ब-बौधायनयोः समये एवं धर्मसम्बन्धिबृहत् साहित्यमुपलब्धमासीत्, परन्तु अधुना नोपलभ्यते ।

धर्मसूत्राणां भाषा स्मृत्यपेक्षया अधिकप्राचीना प्रतिभाति । धर्मसूत्राणां विषयवस्तु व्यवस्थितं नास्ति । परन्तु मनुस्मृत्यादिप्राचीनस्मृतिग्रन्थेषु काप्यव्यवस्था नैवावाप्यते तत्र मुख्यतया आचार-व्यवहार-प्रायश्चित्ताख्यमध्यायत्रयं व्यवस्थितं वर्त्तते ।

अतः धर्मशास्त्रसाहित्यस्य कालो भागत्रयेण विभक्तो वर्त्तते । सर्वादौ प्रचीनधर्मसूत्रस्मृत्यादि- ग्रन्थानां रचनाकालः ख्री०पू०६००तः प्रारभ्य ख्रीष्टीयप्रथमशतकं यावन्मन्यते । द्वितीये तु अधिकांशपद्यमयस्मृतिग्रन्थाः आगच्छन्ति । कालोऽयं प्रथमशतकादारभ्य ८०० ख्रीष्टाब्दं यावन्मन्दते । तृतीयस्तु भवति भाष्य-निबन्धसाहित्ययोः कालः । स च सप्तमशतकादारभ्योनविंशशतकावधिपरिव्याप्तो वर्त्तते । तृतीयकालस्य प्रथमो भागः प्रसिद्धभाष्यकाराणां सुवर्णयुग इत्युच्यते ।।

स्वानुशीलनप्रश्नाः

१.धर्मसूत्रकारेषु कः प्राचीनतमः ?

(उ) ....................................

२. कः भाष्य-निबन्धयोः रचनाकालः ?

(उ)..................................

## ५.४. धर्मशास्त्राणां महत्त्वम्

भारतीयशास्त्रपरम्परायां वेदनिःसृतानि यावन्ति शास्त्राणि भवन्ति तेषु वेदार्थानुमापकत्वेन सकलशास्त्रपुरस्कृतं धर्मशास्त्रमेव मूर्धन्यस्थानं विभर्त्ति ।'' श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृति''रिति मनुवचनात् ज्ञायते यदस्यैव शास्त्रस्य स्मृतिरिति अपरा संज्ञा । वेदान्तरमेवास्य द्वितीयं स्थानम् । शास्त्रमिमं समाजशास्त्रमित्यपि कथयितुं शक्यते । यतो हि

संसारस्य समोषामपि जनानां कर्त्तव्याकर्त्तव्यज्ञानार्थं शास्त्रमिदं मार्गदर्शनं करोति। न केबलमस्य महत्त्वमस्मिन्नेव शास्त्रे सीमितम्, अपि तु शास्त्रान्तरेष्वपि अस्य महत्त्वं सर्वविदितमस्ति। मन्वादिप्रणीतानां विभिन्नानामपि धर्मशास्त्राणां सर्वेषामेव प्रामाण्यमङ्गीक्रियते न कस्यापि अप्रामाण्यमिति महती गौरवावहा इयं भारतीयपरम्परा। आपाततः विरुद्धानीव प्रतीयमानानि स्मृतिवचनानि देशकालकर्तृव्यवस्थाविशेषभेदेन व्यवस्थाप्य एकवाक्यतया प्रतिपाद्यन्ते आचार्यैः। तत्रैकवाक्यतायाः साकांक्षाणामाकांक्षापरिपूरणम् अन्यतः क्रियते, निराकांक्षाणां विरुद्धानां विषमकल्पानां देशकालादिदृष्ट्या व्यवस्था उपदिश्यते। तुल्यबलानां च विकल्पः स्वीक्रियते। पुनश्च एत् धर्मशास्त्राणां सुमहद्गौरवं यत् परस्परं सम्प्रतिपन्नानि विप्रतिपन्नानि अपि शास्त्राणि धर्मशास्त्रप्रशंसायां सम्बदन्तीति।

तत्रादौ उत्तरमीमांसकाः ब्रह्मणो जगत्कर्त्तृत्वमीमांसायां सांख्यस्मृतेः अप्रामाण्यप्रदर्शनपुरःसरं मन्वादिस्मृतीनां प्रामाण्यं प्रतिपादयन्ति।

**सांख्यस्मृत्यास्ति संकोचो न वा वेदसमन्वये।**
**धर्मे वेदः सावकाशः संकोच्योऽनवकाशया॥**
**प्रत्यक्षश्रुतिमूलाभिर्मन्वादिस्मृतिभिर्मितिः।**
**अमूला कापिली बाध्या न संकोचोऽनया ततः॥**

सांख्याचार्यैरपि "धर्मेण गमनमूर्ध्वं गमनमधस्ताद् भवत्यधर्मेण" इति वदद्भिः ऊर्ध्वगमन-साधनस्य धर्मस्य प्रतिपादकं शास्त्रम् उपादेयत्वेन अङ्गीक्रियते। विहितकर्मजन्यो धर्म इति धर्मं लक्षद्भिर्नैयायिकैः विहितकर्मोपदेशकानां धर्मशास्त्राणां प्रामाण्यमङ्गीकृतमेव।

रक्षोहादिना वेदस्योपकारार्थं समवतीर्णं व्याकरणं वेदानुपापकस्य धर्मशास्त्रस्य सुरक्षकमिति सुव्यक्तमेव। पुनश्च महाभाष्यकारैः सूत्रभाष्ये "नैवेश्वर आज्ञापयति नापि धर्मसूत्रकाराः पठन्ति, अपवादैरूत्सर्गा वाध्यन्ता"मिति लिखित्वा धर्मशास्त्राणां सर्वमान्यत्वं प्रदर्शितम्।

पूर्वमीमांसा अपि "अथातो धर्मजिज्ञासा" इत्युपक्रम्य प्रवृत्ता इति तस्या अपि धर्मपुरस्कारत्वेन तथा सन्दिग्धेषु स्थलेषु धर्मनिर्णयेन च धर्मशास्त्रेण सह मैत्री विद्यत्ते। धर्मपुरस्कारकत्वेन शास्त्रस्यास्य

धर्मशास्त्रमिति नामान्तरम् । धर्मशास्त्रेण सह पूर्वमीमासाया: निगूढ: सम्बन्धो विद्यते ।

इतिहासविशेषो महाभारतग्रन्थोऽपि उपसंहारे धर्ममेव प्रशंसन् आह -

**''धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ।''**
**न जातु कामान्न भयान्न लोभाद्धर्मं त्यजेद् जीवितस्यापि हेतो:**
**धर्मो नित्य: सुखदु:खे त्वनित्ये जीवो नित्यो हेतुरस्य त्वनित्य: ।। इति ।**

पुनश्चात्रैव धर्मशास्त्रप्रणेता मनु: बहुधा प्रशंसित: ।

**ऋषयस्तु व्रतपरा: समागम्य पुरा विभुम् ।**
**धर्मं पप्रच्छुरासीनमादिकाले प्रजापतिम् ।।**
**× × ×**
**तैरेवमुक्तो भगवान् मनु: स्वायम्भुवोऽब्रवीत् ।**
**शुश्रूषध्वं यथावृत्तं धर्मं व्याससमासत: ।। इत्यादिना ।**

आदिकाव्यं रामायणमपि बालिप्रश्नं समादधत: रामचन्द्रस्य मुखेन मनुस्मृते: श्लोकद्वयमुपन्यस्य स्मृतीनां प्रामाण्यमङ्गीचकार । तद् यथा किष्किन्ध्याकाण्डे -

**राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवा: ।**
**निर्मला: स्वर्गमायान्ति सन्त: सुकृतिनो यथा ।।**
**शासनाद्वा विमोक्षाद्वा स्तेन: पापात् प्रमुच्यते ।**
**राजा त्वशासन् पापस्य तदवाप्नोति किल्विषम् ।।**

आयुर्वेदज्योतिर्वेदावपि रोगग्रहपीडयो: कारणत्वेन पापमेव प्रदर्शयन्तौ तयोरुपशमार्थं दानजपादिकृत्यमुपदिश्य धर्मप्रतिपादकं शास्त्रं सम्मानयन्ति ।

धर्मेण सह नित्यविरोधमुपगतयोरपि अर्थकामयो: प्रतिपादके शास्त्रे धर्मशास्त्रम् आत्मन: सहायकं मन्यते । तथा हि अर्थशास्त्रकारो विष्णुगुप्त: -

**व्यवस्थितार्यमर्याद: कृतवर्णाश्रमस्थिति: ।**
**त्रय्या च रक्षितो लोक: प्रसीदति न सीदति ।।**

इति वर्णाश्रमाचारप्रशंसया धर्ममाद्रियते । कामशास्त्रमपि भोगविच्छेदभिया वस्तूनां नियतविषयतामभिलषत् धर्मशास्त्रमवश्यमभि-

वन्देत ।वर्णाश्रमाचारविरुद्धैर्हेतुवादिभिरपि प्रजापालनादौ स्वस्वत्त्वपरिरक्षणादौ च धर्मशास्त्रं नूनमादरणीयम् ।

साक्षाद् भगवती श्रुतिरपि धर्मं प्रशंसति । ''धर्मो विश्वस्य जगत: प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्, तस्माद्धर्मं परमं वदन्ति'' । इति धर्मप्रशंसया तत्प्रतिपादकं शास्त्रमपि प्रशंसितमिति दिक् ।।

स्वानुशीलनप्रश्नाः
१.धर्मशास्त्रेण सह कस्या: निगूढ: सम्बन्ध: ?
(उ).......................................
२.''धर्मो विश्वस्य जगत: प्रतिष्ठा'' इति क: वदति ?
(उ).......................................

## सारांश:

प्रियपाठका: ! अस्मिन् अंशे धर्मशास्त्रं कथं वेदादेव नि:सृत्य विभिन्नेषु समयेषु विभिन्नरूपेण समग्रेऽस्मिन् भारतवर्षे प्रसारितमभूदित्ययं विषय: स्पष्टतयाऽत्र प्रतिपादितोऽस्ति । कृत्स्नस्य धर्मशास्त्रसाहित्यस्य क: काल इत्यपि अत्र सम्यक् निर्दिष्टो वर्त्तते। धर्मशास्त्रेषु सूत्र-स्मृतिसाहित्ययोर्मध्ये क: प्राचीन: कश्च अर्वाचीन इत्यपि मतभेदेन अत्र विचारो विहित: । क्रमश: सूत्र-स्मृति-भाष्य-निबन्धसाहित्यानां रचनाकालोऽपि अत्र विवेचितोऽस्ति । शास्त्रान्तरेषु धर्मशास्त्रस्य कथं महत्त्वं प्रतिपादितमस्ति इत्यस्मिन् विषयेऽपि चर्चाऽत्र विहिता । वेदान्त-सांख्य-न्याय-मीमांसा-व्याकरण-महाभारत-रामायणादिषु कथं केन प्रकारेण शास्त्रस्यास्य महत्त्वं प्रतिपादितं वर्त्तते इत्यस्मिन् विषये साङ्गोपाङ्गविमर्शोऽपि कृत: । अन्ते स्वयं भगवती श्रुतिरपि धर्मस्य महत्त्वप्रतिपादनमुखेन श्रुत्यनुमापकशास्त्रस्य धर्मशास्त्रस्य कथं प्रामाण्यं महत्त्वञ्च तत्सम्यक् प्रतिपादयति ।

**पारिभाषिकशब्दाः**

(क) निरुक्तम् - वेदाङ्गेषु अन्यतमः ।

(ख) यास्कः - निरुक्तकारः ।

(ग) डा० पी०वी०काणे - ड० पाण्डुरङ्गवामनकाणे - धर्मशास्त्रेतिहासलेखकः ।

(घ) मैक्समूलर- वैदेशिकेतिहासकारः ।

(ङ) गृह्यसूत्रम् - गृह्याग्निसाध्यकर्मणां यत्र विचारः ।

(च) विकल्पः - यत्र समानबलविरोधः ।

(छ) उत्तरमीमांसा - वेदान्तदर्शनम् ।

(ज) पूर्वमीमांसा - जैमिनिदर्शनम् ।

(झ) विष्णुगुप्तः - अर्थशास्त्रकारः कौटिल्यः ।

(ञ) त्रयी - ऋग्-यजुः-सामवेदाः ।

**निबन्धात्मकप्रश्नाः**

(क) धर्मशास्त्राणां रचनाकालं प्रतिपादयत ।।

(ख) धर्मशास्त्रीयभाष्य - निबन्धसाहित्ययोः कालं सविस्तरं लिखत ।

(ग) शास्त्रान्तरेषु धर्मशास्त्रस्य महत्त्वं प्रतिपादयत ।।

**विश्लेषणात्मकप्रश्नाः**

(क) सूत्र-स्मृत्योः पौर्वापर्यं सप्रमाणं व्याख्यात ।।

(ख) साम्प्रतिके काले स्मृतिनिबन्धसाहित्यस्य योगदानं विशदयत ।।

(ग) वेदानुसारं धर्मशास्त्रस्य महत्त्वं प्रमाणयत ।।

**लघुप्रश्नाः**

(क) सूत्रसाहित्यस्य रचनाकालं निर्दिशत ।

(ख) मनोः प्राथम्ये प्रमाणानि उपस्थापयत ।

(ग) पूर्वमीमांसादृष्ट्या धर्मशास्त्रस्य महत्त्वं वर्णयत ।।

(घ) उत्तरमीमांसादृष्ट्या धर्मशास्त्रस्य महत्त्वं वर्णयत ।

(ङ) कामशास्त्रदृष्ट्या धर्मशास्त्रस्य महत्त्वं प्रतिपादयत ।

## एकाङ्कप्रश्ना :

(क) स्मृतिग्रन्थेषु का प्राचीनतमा स्मृतिः ?

(ख) धर्मसूत्रेषु किं प्राचीनतमं धर्मसूत्रम् ?

(ग) श्राद्धशब्दं कर्म प्रोवाच कः ?

(घ) त्रिवेदवादी कः ?

(ङ) याज्ञवल्क्यकृतधर्मशास्त्रकारनामगणनायां मनोः नाम कुत्रास्ति ?

(च) काणेमहोदयः कः ?

(छ) कापिली का ?

(ज) महाभाष्यकारः कः ?

(झ) पूर्वमीमांसायाः कः कर्त्ता ?

(ञ) अर्थशास्त्रकारः कः ?

## एकाङ्कप्रश्नानामुत्तराणि

(क) मनुस्मृतिः ।

(ख) गौतमधर्मसूत्रम् ।

(ग) मनुः ।

(घ) मनुः ।

(ङ) सर्वादौ ।

(च) धर्मशास्त्रेतिहासकर्त्ता ।

(छ) कपिलाचार्यकृता सांख्यस्मृतिः ।

(ज) पतञ्जलिः ।

(झ) जैमिनिः ।

(ञ) विष्णुगुप्तः (कौटिल्यः)

❖❖❖

# द्वितीयग्रन्थिः (UNIT-VI – UNIT-X )

# अंशः - षष्ठ

संरचना

६.१. प्रस्तावना
६.२.उद्देश्यम्
६.३.सूत्रसाहित्यस्योद्भवो विकासश्च
६.४. प्रमुखधर्मसूत्रकाराणां परिचयः

## ६.१. प्रस्तावना

वेद एव सर्वविधभारतीयशास्त्राणामाधारभूतः । वेदमनुसृत्यैव सर्वेषां शास्त्राणामुद्भवो विकासश्च । कृत्स्नस्यापि संस्कृतवाङ्मयस्यैव मूलाधारो वेद इति कथनेन न भवेदत्युक्तिः । सर्वार्थसाधकस्य समस्तदोषरहितस्य सनातनरूपस्य वैदिकधर्मस्य प्राचीनभारतस्य कल्पनाऽपि वेदं विना न समुदेति । यथा लोचनविरहितो जनः कस्यापि पदार्थस्य दर्शने सामार्थ्यरहितो भवति तथैव वेदाध्ययनरहितो जनः आध्यात्मिकपदार्थावलोकने सर्वथाऽसमर्थ एव । प्रत्यक्षादिभिर्प्रमाणैरप्यनधिगतस्य तत्त्वस्य बोधनादेव वेदस्य वेदता । यथार्थेन तैत्तिरीयभाष्य- भूमिकायामुक्तं सायणेन -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।**
**तं वै विन्दन्ति वेदेन तस्माद् वेदस्य वेदता ।**

भारतीयपरम्परायां यथा वेदस्य तथैवापि षण्णां वेदाङ्गानां महत्त्वं वर्त्तते । वेदाङ्गेष्वन्तर्भूतं कल्पसूत्रमेव सूत्राणामुद्भवस्थानम् । भारतीयसंस्कृतौ कथं सूत्राणामुद्भवो विकासश्च जात इत्यस्मिन् विषयेऽवश्यमेव सर्वैः ज्ञातव्यम् ।

## ६.२.उद्देश्यम्

प्रियपाठकाः ! अशेऽस्मिन् भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति -

- कथं वेद एव सर्वशास्त्राणामाधारभूत इति ज्ञातुं प्रभवन्ति ।

- कल्पाख्यवेदाङ्गात् कथं सूत्रसाहित्यस्योद्भव इति ज्ञातुं शक्नुवन्ति ।
- क्रमशः सूत्रसाहित्यस्य विकासो कथं जात इत्यपि ज्ञातुं प्रभवन्ति ।
- श्रौत-स्मार्त-शुल्वसूत्रेषु धर्मसूत्राणां कीदृशं योगदानमिति ज्ञातुं शक्नुवन्ति ।
- देशभेदेन धर्मसूत्रकारास्तेषां परिचयश्च ज्ञातुं प्रभवन्ति ।

## ६.३.सूत्रसाहित्यस्योद्भवो विकासश्च

तमसाच्छन्नभारतीयसंस्कृतवाङ्मयाकाशस्य सूर्योदयो भगवतो वेदादेव सञ्जातः । स एव वेदो भारतीयहिन्दुजनानां परमनिःश्रेयससंप्राप्तये सहायको भवति । अतो वेदमनुसृत्यास्माकं भारतीयधार्मिकपरम्परा संप्रचलिता, तदनुसारमपि भारतीयसंस्कृतिः समुद्भूता । भारतीयसंस्कृतेः समृद्धिसाधनं वेदादेव सञ्जातम् । वेदानुसारिण्या धार्मिकधारायाः या निस्यन्दिनी यावत्पर्यन्तं प्रवाहिता भवति, स कालो वैदिककालत्वेन प्रथितो जातः । वेदोऽयं मन्त्रब्राह्मणात्मक इति प्रसिद्धिः सार्वजनिनी । तस्यैव वेदस्याध्ययनं मननं निदिध्यासनं ततः प्रभृति प्रचलितं वर्त्तते । अतो धार्मिकसाहित्यिकप्रक्रिया विधयश्चानेनैव प्रभाविताः सन्ति ।

वेदतत्त्वमीमांसकैः वैदिकवाङ्मयस्य विभाजनं बहुधा कृतम् । तत्रादौ पाश्चात्यसमालोचकेन मैक्समूलारमहोदयेन वैदिकवाङ्मयश्चतुर्धा विभाजितः । तद्यथा छन्दकालः, मन्त्रकालः, ब्राह्मणकालः, सूत्रकालश्चेति । अन्यैस्तु संस्कृतवैदिकवाङ्मयस्य कालः दशधा विभक्तः । परन्तु युगस्य प्रवृत्त्याधारेण रचनाशैल्याधारेण वैदिकवाङ्मयः पञ्चधा विभक्तुं शक्यते । ते यथा मन्त्रकालः, संहिताकालः, ब्राह्मणकालः, आरण्यकोपनिषत्कालः, सूत्रकालश्चेति । प्रयोगसमवेतार्थस्मारको मन्त्रः । वैदिकयुगस्य प्रारम्भोऽस्मादेव मन्त्रकालादभूदिति विपश्चित्तामभिमतम् । संहिताकाले ऋग्यजुःसामात्मकाः मन्त्राः भिन्नत्वेन सङ्कलिताः । ब्राह्मणकाले संहितानां ब्राह्मणग्रन्थानाञ्च व्याख्यानरूपं विरचनमभूत् । आरण्यकोपनिषत्कालो ब्राह्मणकालान्तर्गत इति मन्यते । एतेषु सर्वेष्वेव भागेषु सूत्रकालः अन्यतम अन्तिमश्च । आवश्यकदृष्ट्या सूत्रकालस्य विविचेनमत्र क्रियते ।

वैदिकसाहित्यस्यान्तिमकाल: सूत्रकाल इत्यत्र नास्ति कश्चिद्विसंवाद: । वितरिन्समहोदयस्य मतानुसारं सूत्रसाहित्यं न विशुद्धवैदिकम् । तदन्तर्गतत्वेन श्रौतगृह्य-धर्मसूत्राणि तेन स्वीकृतानि । वेदाङ्गसाहित्यस्यापि तदन्तर्गतत्वेन स्थापनं समीचीनं स्यात् । वेदाङ्गेषु कल्पाख्यवेदाङ्गस्यैव प्राधान्यम् । कल्पसूत्रादेव सूत्रकालस्यायमारम्भ: । अत: कालोऽयं सूत्रकालत्वेनोच्यते । अस्मिन् काले या: रचना: जाता: तास्वधिकांशग्रन्था: सूत्रशैल्या एव विरचिता: । अस्मिन् काले वेदस्वरूपसम्बन्धिधारणाऽपि भिन्ना जाता । ब्राह्मणकाले मन्त्रा: सहिताश्च वेदत्वेन स्वीकृता आसन् । विचारस्यास्यानुसरणं परवर्त्तिभाष्यकारैरपि कृतम् । परिशिष्टस्यानुक्रमणिकायाश्च रचना अस्मिन्नैव काले जाता । अत: प्रवाहमाने संस्कृतवाङ्मये विकसितेषु विभिन्नेषु साहित्येषु सूत्रासाहित्यमन्यतमम् । सूत्रं नाम संक्षिप्ता भाषा इति । तल्लक्षणं यथा-

**अल्पाक्षरमसन्दिग्धं सारवत् विश्वतो मुखम् ।**
**अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदु: ।**

सूत्रग्रन्था: कल्पशास्त्रस्याङ्गभूता: भवन्ति । श्रीमता विष्णुगुप्तेन ऋग्वेदप्रातिशाख्ये कल्पशब्दस्यार्थ इत्थं स्पष्टीकृत: - ''कल्पो नाम वेदविहितानां कर्मणामानुपूर्वकेण कल्पनाशास्त्रम् । यास्कात्पूर्वमेव सूत्रसाहित्यस्योद्भवो जात इति काणेमहोदयानामभिमतम् ।

सूत्रसाहित्येषु व्याकरण-दर्शन-धर्मशास्त्रादीनि सूत्राण्यन्तर्भवन्ति । धर्मशास्त्रसाहित्ये आलोचितेषु सूत्रेषु गौतम-बौधायन-आपस्तम्बधर्मसूत्राणि प्राचीनानि भवन्ति । एतेषां काल: ख्री.पू.६०० संवत्सारादारभ्य ख्री०पू.३०० मध्ये भवेदिति काणेमहोदयानामभिमतम् ।

भारतीयसंस्कृतवाङ्मये सूत्रसाहित्यस्य प्राधान्यं निर्विवादेन सर्वै: स्वीक्रियते । विरचनशैली एवास्य विशिष्टां पद्धत्तिं धत्ते । वैदिकसाहित्ये सूत्रकालोऽध्ययनचिन्तनत्वेन विभाति । सूत्रसाहित्यमेतादृशमेकं शृङ्खलं येन वैदिकसाहित्येन साकं परवर्त्तिसंस्कृतसाहित्यं संयुज्यते । सूत्रं संक्षेपात्मकमिति यद्यपि कथ्यते तथापि अनेनैव तस्य शाब्दिकार्थस्यावबोधो सम्यक् नैव जायते । अत: सूत्रं सूत्रमिति कथनमलं भवेत् । सूत्रेण सारगर्भितक्षुद्रातिक्षुद्रवाक्यानां ग्रथनं सम्भवति । संक्षिप्तकरणमेवास्य वैशिष्ट्यम् । पाश्चात्यविद्वद्भि: सूत्रशैलेरूपरि आलोचनात्मक-रीत्या विचार: कृत: । यद्यपि सूत्राणि व्याकरण-दर्शन-धर्मशास्त्र-आयुर्वेद-कामशास्त्र-ज्योतिषपुराण-तन्त्र-कर्मकाण्डादि-

संस्कृतवाङ्मयान्तर्गतविभिन्नेषु प्रस्थानेषु विद्यन्ते तथापि कल्पसूत्राङ्गभूतानामेतेषां सूत्राणां वर्गीकरणं निम्नोक्तप्रकारेण कर्तुं शक्यते । कल्पसूत्रं संक्षेपतो द्विविधम् । श्रौतसूत्रं स्मार्त्तसूत्रञ्चेति । श्रौतसूत्रे वैदिककर्मानुष्ठानांनां नियमाः प्रकाराश्च प्रतिपादिताः सन्ति । स्मार्त्तसूत्रं तु धर्मसूत्र-गृह्यसूत्रभेदेन द्विविधम् । धर्मसूत्रे वर्णानामाश्रमाणाञ्च समाजे स्थितिसुदृढाय धार्मिकनियमाः विहिताः सन्ति । गृह्यसूत्रे तु गृह्याग्निसाध्यकर्मणां नियमानुष्ठानं सुष्टु प्रतिपादितमस्ति । अपरञ्च शुल्वसूत्रमपि कल्पसूत्रान्तर्गतमिति ऐतिहासिकानां मतमस्ति । शुल्वं नाम मापक्रिया । भारतीयज्यामितिशास्त्रस्य मूलरूपं तत्र निहितमस्ति । कल्पसूत्रस्य वर्गीकरणे मतान्तरमपि दृश्यते । तद्यथा - श्रौतसूत्रम्, शुल्वसूत्रम्, पितृमेधसूत्रम्, प्रवरसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रं चेति ।

वैदिकयज्ञादिक्रियासु वेदि-मण्डल-होमकुण्डादीनां निर्माणेषु वास्तुकार्येषु च शुल्वसूत्रस्यावश्यकता विद्यते । बौधायन-आपस्तम्ब-हिरण्यकेशी-सत्याषाढ-कात्यायन-मैत्रायणीय-वाराहशुल्वसूत्राणि प्रमुखानि भवन्ति ।

पितुः स्वर्गगमनानन्तरं पुत्रेण तन्निकटतमसम्बन्धिभिर्वा तस्य मृतस्य पितुः सन्तोषाय क्रियमाणमौर्ध्वदेहिकं कर्म पितृमेधकृत्यमेव । तदिदं कर्म यस्मिन् सूत्रग्रन्थे प्रतिपादितमस्ति तदेव पितृमेधसूत्रम् ।

दर्शपूर्णमास-अग्निचयन-संस्काराश्वमेध-राजसूयादिषु कर्मसु गौत्रप्रवरयोरुच्चारणपरम्परा प्राचीनकालादेव वर्त्तते । प्रवरशब्दस्य पर्यायवाचीशब्द आर्षेयो भवति । ऋषेरिदमार्षमिति भावः । ऋषिपरम्परा इति सरलार्थः । प्रवराः मन्त्रद्रष्टारः गोत्रेभ्यश्च प्राचीनाः भवन्ति । प्रवरव्यवस्थायाः पूर्णता ब्राह्मणकालादनन्तरं जाता । अतः प्रवरविषये यत्र सूत्रग्रन्थे विचारो विद्यते तदेव प्रवरसूत्रमिति । अन्यानि श्रौत-गृह्य-धर्मसूत्राणि तु प्रसिद्धानि ।

ऋग्वेदसम्बन्धिश्रौतसूत्रद्वयमस्ति । यथा आश्वालयनश्रौतसूत्रं सांख्यायनश्रौतसूत्रं चेति । गृह्यसूत्रद्वयमपि एतन्नाम्ना प्राप्यते । शुक्लयजुर्वेदस्य कात्यायनश्रौतसूत्रं पारस्करगृह्यसूत्रं च सर्वविदितमस्ति । बौधायनश्रौतसूत्रम् आपस्तम्बगृह्यसूत्रं चेति सूत्रद्वयं कृष्णयजुर्वेदस्य । हिरण्यकेशीश्रौतसूत्रं गृह्यसूत्रं काठकगृह्यसूत्रं च कृष्णयजुर्वेदान्तर्गतम् । वैतानश्रौतसूत्र- कौशिकगृह्यसूत्रयोरन्तर्भावः सामवेदेषु भवति । अत्र गृह्यसूत्र- धर्मसूत्रयोर्मध्ये स्वल्पः प्रभेदोऽस्त्येव ।

गृह्यसूत्रेषु गृह्याग्नि-गृह्ययज्ञोपासना-हवन-यज्ञ-संस्कार-स्नातकनियम-मधुपर्क-कर्म-श्राद्धादिविषयाः विवेचिताः सन्ति । परन्तु धर्मसूत्रे वर्णानामाश्रमाणाञ्च सर्वविधोपकारक-कर्माणि कर्त्तव्याकर्त्तव्यानि च विहितानि सन्ति ।

वैदिकसाहित्यस्यैकमहत्त्वपूर्णाङ्गत्वेन विराजते धर्मसूत्रमिति विपाश्चित्तां सम्मतम् । धर्मसूत्राण्यपि विभिन्नासु शाखासु भिद्यन्ते । धर्मसूत्राणामभिन्नसम्बन्धो यज्ञकर्मभिः विवाहोपनयनादिगृह्यकर्मभिश्च सह वर्त्तते । कल्पसूत्रसन्दर्भे श्रौत-गृह्य-धर्मसूत्राणां पारस्परिकसम्बन्धोऽपि स्थापनीयः । अनेकासां शाखानां सूत्राणि श्रौत-गृह्यादिसमवायेन प्राप्यन्ते । आश्वलायन सांख्यायन- मानवशाखानां श्रौतसूत्राण्युपलभ्यन्ते । परन्तु एतासां धर्मसूत्राभावो परिलक्ष्यते । यासां शाखानां समस्तकल्पसूत्राणि उपलभ्यन्ते तासु बौधायनापस्तम्ब-हिरण्यकेशिशाखाः प्रमुखाः भवन्ति । सकलशाखीयधर्मसूत्राणामनुपलब्धेरिदमेव कारणं यत् कुत्रचित् क्वचित् शाखाध्यायिभिः पृथक् पृथक् धर्मसूत्रान्तराणां ग्रहणं विहितम् । केषाञ्चन धर्मसूत्राणामाधारेण ज्ञायते यत्तेषां स्वकीयेषु चरणेषु गृह्यसूत्राण्यपि सन्तीति । आपस्तम्बधर्मसूत्र-बौधायनधर्मसूत्रादिषु अस्य स्पष्टसंकेतो प्राप्यते ।

धर्मसूत्राणि प्रमुखरूपेण द्विधा विभक्तुं शक्यन्ते । प्राचीनानि धर्मसूत्राणि अनतिप्राचीनानि च धर्मसूत्राणि । प्राचीनेषु धर्मसूत्रषु गौतमबौधयन-आपस्तम्बधर्मसूत्राणि प्रधानानि भवन्ति । अनतिप्राचीनेषु धर्मसूत्रेषु वसिष्ठ-हारीतहिरण्यकेशि-शङ्खलिखित-वैस्वानस-विष्णुधर्म-सूत्राण्यन्यतमानि । अन्येऽपि केचन धर्मसूत्रकाराः सन्ति । तेषु अत्रि-उशना-काण्व-कश्यप-गार्ग्य-च्यवन-जातुकर्ण्यदेबल-पौठिनसी-बृहस्पति-भारद्वाज-सुमन्तुप्रभृतयो प्रधानभूताः भवन्ति ।

धर्मसूत्राणां रचनाकालविषयकालोचनावसरे विज्ञायते यत् एकस्मिन्नेव कल्पे श्रौत-गृह्य-धर्मसूत्राणां रचना एकेनैव कृतेति । आपस्तम्बगृह्यसूत्रस्य रचनाकालः ख्री.पू.७०० संवत्सरस्य निकटवर्त्तिसमये भवेत् । बौधायन-आपस्तम्बयोर्मध्ये शतवर्षाणामन्तर-मस्ति । अनेनैव प्रकारेण तैत्तिरीयसंहितासम्ब-न्धितसर्वप्राचीनसूत्रकारस्य कालः ख्री.पू.८०० इति स्वीक्रियते । गौतमधर्मसूत्रस्य सर्वप्राचीनत्वं धर्मसूत्रकारेषु विद्यते । तस्य कालस्तु ख्री.पू.-४००-३०० मध्ये भवेदिति काणेमहाभागानामाशयः । कुन्दनलालशर्ममहोदयेन तस्य कालः

ख्री.पू.८०० इति स्वीकृतम्। परन्तु ए.ए. मैक्डोनलमहोदयेन धर्मसूत्रस्य कालः ख्री.पू.४०० इति स्वीकृतत्वात् गौतमस्य कालस्तन्निकटवर्त्तिसमये भवितुमर्हति। अन्ततो गत्वा वक्तुं शक्यते यत् धर्मसूत्राणां कालः ख्री.पू.-६०० अनन्तरमिति। धर्मसूत्राणां वैशिष्ट्यं तेषां रचनाशैल्या सामाजिकजीवनविन्यासदृष्ट्या च प्राप्यते। सूत्र-स्मृतिग्रन्थयोर्मध्ये कालविषये मतभेदो विवादश्च विद्यते। मैक्समूलर-भण्डारकरमहोदयाभ्यामपि मतमिदं स्वीक्रियते यत् सूत्ररचनानन्तरमेव छन्दोबद्धस्मृतिग्रन्थानां रचना जातेति।

स्वानुशीलनप्रश्नाः

१.कल्पसूत्रं किम्?

(उ).........................................

२.गृह्यसूत्रस्य के विषयाः?

(उ).......................................

## ६.४. प्रमुखधर्मसूत्रकाराणां परिचयः

धर्मप्रतिपादकं सूत्रं धर्मसूत्रमिति। इदं तु कल्पसूत्रस्याङ्गभूतमिति प्रसिद्धिः सर्वसम्मता। धर्मसूत्रसाहित्यजगति बहवो धर्मसूत्रकाराः सन्ति। तान् धर्मसूत्रकारान् भागत्रयेण विभक्तुं शक्यते। यथा- प्राचीनधर्मसूत्रकाराः, अनतिप्राचीनधर्मसूत्रकाराः, अपरे च केचन धर्मसूत्रकाराः सन्ति येषां केवलमुद्धरणरूपेण नामानि दृश्यन्ते। तेषां धर्मसूत्रग्रन्थाः लुप्तप्रायाः। प्राचीनधर्मसूत्रकारेषु गौतम-बौधायन-आपस्तम्बधर्मसूत्राणां प्रामुख्यं वर्त्तते। तत्रादौ एतेषां प्राचीनधर्मसूत्रकाराणां परिचयः अधः प्रदीयते -

**गौतमः -**

धर्मसूत्रकारेषु गौतमस्य स्थानमन्यतममस्ति। योगीश्वरेण स्वस्मृतौ धर्मशास्त्रकारत्वेन गौतमस्य नाम उद्धृतम्। अयं सर्वप्राचीनतमधर्मसूत्रकारो भवतीति ऐतिहासिकानां धर्मशास्त्रमर्मज्ञानां च मतम्। धर्मशास्त्रेषु यावन्त्येव धर्मसूत्राणि सन्ति प्रायशः तान्येव गौतमधर्मसूत्रेण प्रभावितानि। कुमारिलभट्टमतानुसारं गौतमधर्मसूत्रं सामवेदेन सम्बद्धम्। सामवेदेन सम्बद्धं गौभिलगृह्यसूत्रं धर्मसूत्रं चेति

गौतमस्य प्रामाण्यमङ्गीकुरुत: । सामवेदस्य राणायनीयशाखाया: नवोपविभागा: सन्ति । यत्रैकस्यैवोपविभागस्य शाखाकार: आचार्यगौतम आसीत् । कठोपनिषदि नचिकेताया: तत्पितु: कृते च गौतमस्य नाम आयाति । छान्दोग्योपनिषदि अपि गौतमनामकस्य आचार्यस्य नाम आयाति । तत्रापि विभिन्नेषु ग्रन्थेषु वृद्धगौतम-बृहद्गौतमयोर्नाम प्रसिद्धमस्ति ।

बौधायनापस्तम्बादयो धर्मसूत्रकारा: विभिन्नेषु स्थलेषु गौतमधर्मसूत्रस्य नामोल्लेखं कृतवन्त: । बौधायनधर्मसूत्रे गौतमस्य प्रभावो प्रायश्चित्तप्रकरणे दृश्यते । गौतमधर्मसूत्रस्य एकोनत्रिंशत्तमोऽध्यायो बौधायनेन साधारणपरिवर्त्तनं विधाय स्वीकृत: । वसिष्ठेनापि स्वधर्मसूत्रस्य द्वात्रिंशत्तमेऽध्याये गौतमधर्मसूत्रस्य एकोनविंशतितमोऽध्यायोऽङ्गीकृत: । यद्यपि गौतमधर्मसूत्रापेक्षया वसिष्ठधर्मसूत्रमर्वाचीनम्, तथापि तत्र तत्र विषयव्यवस्थासु सामञ्जस्यं वर्त्तते । कुमारिलभट्टेन तन्त्रवार्त्तिकग्रन्थे बहूनि सूत्राणि गौतमधर्मसूत्रादुद्धृतानि । विश्वरूपेण स्वयाज्ञवलक्यस्मृतिटीकायां गौतमस्य नामोल्लेखो विहित: । मेधातिथिरपि मनुस्मृतिटीकायां गौतमस्य नामोल्लेखं करोति । मितक्षरा-स्मृतिचन्द्रिका-हेमाद्रि-माधवाचार्यैरपि विभिन्नेषु स्थलेषु गौतमस्य मतानि स्वीकृतानि । अपरार्क-हेमाद्रिभ्यां बृद्धगौतमस्य, दत्तकमीमांसायां नन्दयण्डितेन बृहदगौतम-वृद्धगौतमयोश्च नामोल्लेख: कृत: । वस्तुतो वृद्धगौतम-बृहद्गौतमयोर्नाम धर्मसूत्रकारगौतमाचार्यादेवार्वाचीनम् । गौतमस्य देशविषये निर्दिष्टरूपेण किमपि वक्तुं नैव शक्यते । गौतमधर्मसूत्रं सम्पूर्णभारतस्य कृते समादरणीयं भवति । बौधायनेन निर्दिष्टं यद् दक्षिणोत्तरभारतीयानां कृते गौतमधर्मसूत्रं मान्यं भवति । अतो सम्पूर्णेऽपि भारतवर्षे गौतमधर्मसूत्रस्य प्राथम्यं प्राधान्यञ्च वर्त्तते इत्यत्र नास्ति काऽपि विप्रतिपत्ति: ।

गौतमधर्मसूत्रेऽस्मिन् सम्भूय अष्टाविंशत्यध्याया: सन्ति । कलकत्तासंस्करणे एक: अतिरिक्त: ''कर्मविपाक'' नामकअध्यायोऽस्ति । गद्यवद्धमिदं धर्मसूत्रम् । उद्धरणरूपेण किमपि पद्यमत्र नैवावाप्यते । भाषादृष्ट्यापि बौधायनापस्तम्बयोरपेक्षया गौतमस्य भाषा पाणिनीयव्याकरणदृष्ट्या शुद्धा प्रतिभाति । परन्तु पाणिनिव्याकरणस्य सम्पूर्णप्रयोग: धर्मसूत्रेऽस्मिन् न प्राप्यते ।

अतोऽनुमीयते यत् पाणिनेः प्रागेवास्य ग्रन्थः लोकलोचनमागतः । परन्तु सूत्रग्रन्थानां सामग्र्यनुसारं ज्ञायते यत् निश्चित्तरूपेण गौतमधर्मसूत्रस्य रचना बौद्धकालात्प्रागेव जाता । निरुक्तकारयास्कादनन्तरमेव गौतमस्य कालो भवितुमर्हति । बौद्धधर्मावलम्बिभिः हिन्दुधर्मस्योपरि तदीयधर्मग्रन्थस्योपर्यपि बहुप्रहारः कृतः, यस्य चर्चा धर्मसूत्रेऽस्मिन् नास्ति । अतः बौधकालात्प्रागेव ग्रन्थस्यास्य रचनाकालो भवितुमर्हति । बौद्धायनेन निजधर्मसूत्रे गौतमस्योल्लेखो विहितः । एतस्मात् गौतमः उभयोः प्राचीनतर इति अनुमीयते । याज्ञवलक्येनापि गौतमस्योल्लेखः धर्मशास्त्रप्रयोजकेषु कृतः । एवमेवापरार्केण कुल्लूकेन कुमारिलेन विश्वरूपेण मेधातिथिना च गौतमवचनानि यथास्थानमुद्धृतानि । अतः काणेमहाभागानां मतानुसारं ख्री.पू.६००-४०० प्रागेवास्य गौतमधर्मसूत्रस्य रचना जातेति ।

गौतमधर्मसूत्रस्योपरि चतस्रः टीकाः संजाताः- यथा (१) मस्कराचार्यस्य मस्करी (२) हरदत्तस्य मिताक्षरा (३) असहायस्य असहायटीका । (४) प० कुलमणिमिश्रस्य च सूक्ष्मा । भर्तृयज्ञेनापि गौतमधर्मसूत्रस्योपरि एका टीका प्रस्तुता । परन्तु असहाय-भर्तृयज्ञयोः टीका सम्प्रति नैवावाप्यते । आसु असहायटीका प्राचीनतमा इति ।

**बौधायनः -**

आचार्यबौधायनः कृष्णयजुर्वेदशाखाध्यायी आसीदिति विज्ञायते । अयमेकः सुप्रसिद्धः धर्मसूत्रकारः । धर्मसूत्रमिदं गौतमधर्मसूत्रात् अर्वाचीनम्, आपस्तम्बधर्मसूत्रात् प्राचीनम् । धर्मसूत्रमिदं यजुर्वेदेन सह सम्बद्धम् । बौधायनात्पूर्वमपि काण्वबौधायनसंज्ञकः अपरः कश्चित् महामनिषी संजातः । तस्यैव वंशजोऽयं बौधायन इति काणेमहोदयस्याभिमतम् । गौविन्दस्वामिनाऽपि बौधायनः काण्वायनश्चेति स्वटीकाग्रन्थे प्रतिपादितम् । बौधायनेन स्वपूर्वजस्य काण्वबौधायनस्य चर्चा बहुधा कृता । गौतमधर्मसूत्रापेक्षया धर्मसूत्रस्यास्य भाषा अपाणिनीया इति अवलोक्यते । अस्य भाषा प्राचीना सरला च प्रतिभाति । अत्र पुनरूक्तिदोषाः प्रायशो दृश्यन्ते । धर्मसूत्रेऽस्मिन् रचनादृष्ट्या अत्यधिकं शैथिल्यमिति दृष्टिपथमायाति । टीकाकारेण गौविन्दस्वामिनाऽपि स्वटीकायामेषां दोषाणां चर्चा विहिता । धर्मसूत्रस्यास्य विभाजनं चतुर्षु प्रश्नेषु कृत्वा वर्णिल्महोदेन प्रकाशनं कृतम् । एवमेव आर. शास्त्रिणऽपि स्वतन्त्ररूपेण ग्रन्थोऽयं प्रकाशितः ।

प्रश्नचतुष्टयात्मकेऽस्मिन् धर्मसूत्रे चतुर्थप्रश्नः क्षेपकः प्रतिभाति । बौधायनस्य देशविषये समालोचकेषु मतैक्यं नास्ति । केषाञ्चन मते बौधायनो दाक्षिणात्यः । सम्प्रति यतो हि बौधायनीयाः दक्षिणदेशेष्वेव प्राप्यन्ते । वेदभाष्यकारः सायणाचार्योऽपि बौधायनीय एव । अतः एतस्मात् ज्ञायते यत् बौधायनो दाक्षिणात्य इति । परन्तु मतमिदं खण्डितं काणेमहोदयेन । सप्रमाणं तेनोल्लिखितं यद् बौधायनेन दाक्षिणात्यानां परिगणना निच्चजातिषु कृता । न कोऽपि स्वजातिं अधः पातयति । अतएव बौधायनः कदापि न दाक्षिणात्यो भवितुमर्हति ।

गौतमधर्मसूत्रादनन्तरमेव बौधायनधर्मसूत्रस्य रचनाऽभूत् । गौतमधर्मसूत्रस्य चर्चा अत्रैव वर्त्तते । धर्मसूत्रेऽस्मिन्नपि पाणिनीयव्याकरणनियमानां परिपालनं सर्वेषु स्थलेषु नैव जातम् । बौधायनेन उपनिषद उद्धारो विहितः । तस्मादत्रायमेव निष्कर्ष उत्पद्यते यद्धर्मसूत्रमिदम् उपनिषदामनन्तरमेव बौधायने प्रणीतम् । ग्रन्थस्यास्याधिकः प्रभावः आपस्तम्बधर्मसूत्रस्योपरि पतितः । स्वकीयधर्मसूत्रेऽनेन बहूनां धर्मसूत्रकाराणां नामानि उद्धृतानि । यथा- कात्यायनः, काश्यपः, गौतमः, प्रजापतिः, मनुः, मौद्गलः, हारीतश्चेति । एतद्भिन्नमपि इतिहास-पुराण-वेद-वेदाङ्ग-संहिता-ब्राह्मण-आरण्यक-उपनिषद्प्रभृतीनां नामानि अनेन विहितानि । शबरस्वामिनः बहुकालात्पूर्वं बौधायनधर्मसूत्रं प्रमाणत्वेन स्वीक्रियते । अस्य शबरस्वामिनः समयस्तु ५०० ख्रीष्टाब्दः । अतो बौधायनस्य कालः ५००-२२५ ख्री.पू. मध्ये भवितुमर्हति इति काणेमहोदयानामभिमतम् । अस्य टीकाकारः गोविन्दस्वामी । बौधायनधर्मसूत्रस्योपरि तत्कृतगृह्यसूत्रस्य प्रभावः सर्वाधिकतया पतित इति ।

**आपस्तम्बः -**

धर्मसूत्रकारेषु आपस्तम्बोऽन्यतमः । आपस्तम्बनाम्ना श्रौत-गृह्य-धर्मसूत्राण्युपलभ्यन्ते । गौतमबौधायनादिधर्मसूत्रापेक्षया अर्वाचीनत्वेऽपि आपस्तम्बस्य तदीयधर्मसूत्रस्य च महद्वैशिष्ट्यं वरीवर्त्तते । आपस्तम्बो मीमांसाकुशल आसीदिति विज्ञायते । यतो हि आपस्तम्बधर्मसूत्रे मीमांसासम्बन्धिनः बहवो पारिभाषिकशब्दाः प्राप्यन्ते । भाषादृष्ट्या रचनादृष्ट्या च अपस्तम्बीयगृह्यसूत्रं धर्मसूत्रं चेति एकेनैव आचार्येण विरचितमिति प्रतिभाति । स्मृतिचन्द्रिकायां मतमिदं समर्थितं दृश्यते । धर्मसूत्रेऽस्मिन् दौ प्रश्नौ, प्रत्येकस्मिन् प्रश्ने चैकादशपटलाः सन्ति ।

उपलब्धेषु धर्मसूत्रग्रन्थेषु आपस्तम्बधर्मसूत्रमितरापेक्षया संक्षिप्तम्, शैलीदृष्ट्या सुसंगठितं च प्रतिभाति । भाषा चास्य प्राचीना अपाणिनीया चावलोक्यते ।

आपस्तम्बस्य जन्मस्थानविषये बहुमतभेदो दृश्यते । केषाञ्चन मते उत्तरभारतस्य पञ्जावप्रदेशे आपस्तम्बस्य जन्म अभूदिति । आपस्तम्बीयगृह्यसूत्रे उल्लेखो वर्त्तते यत् यमुनायाः तटप्रदेशे साल्वदेशीयस्त्रीणाणुल्लेखो दृश्यते । साल्वदेशस्य रावीनद्याः समीपे आधुनिकपञ्जावस्य एको भाग आसीत् । एतस्मादनुमीयते यत् यमुना-रावीनद्योरोरूपकण्ठवर्त्तिस्थाने कुत्रापि आपस्तम्बस्य निवासस्थानं भवेत् ।

भाषादृष्ट्या धर्मसूत्रमिदं पाणिनिव्याकरणात्प्रागेव रचितं भवेत् । प्रायशः पाणिनिव्याकरणस्य प्रचलनं तदानीन्तनकाले नासीत् । बौद्धधर्मस्तु हिन्दुसंस्कारं ब्राह्मणवादं च आक्षिपति । एतस्मिन् विषये चर्चाऽत्र आपस्तम्बधर्मसूत्रे नोपलभ्यते । धर्मसूत्रकारेण ग्रन्थेऽस्मिन् कुत्रापि बौद्धधर्मस्य प्रतिवादोऽपि नैव कृतः । एतस्मान् ज्ञायते यद् बौद्धानां सुधारान्दोलनात्प्रागेव धर्मसूत्रमिदं लोकलोचनमागतम् । धर्मसूत्रकारस्यास्य आपस्तम्बस्य नामोल्लेखः याज्ञवलक्येन स्वस्मृतौ विहितः । अतोऽस्य रचना ख्री.पू.६०० तः ३०० मध्ये जातेति काणेमहोदयस्य मतम् ।

**वसिष्ठः -**

धर्मसूत्रसाहित्याकाशे गौतम-बौधायनापस्तम्बादीनामनन्तरमेव वसिष्ठस्य तत्प्रणीतधर्मसूत्रस्य च सातिशयं महत्त्वं परिलक्ष्यते । पूर्वप्रणीतेभ्यः धर्मसूत्रेभ्यः अनेन बहूनि वचनानि बहवो विषयाश्च संगृहीताः । महर्षेः गौतमस्य तदीयधर्मसूत्रस्य च यादृशी शैली यादृश शब्दविन्यासः यादृशी च प्रतिभा तत्सर्वमत्रैव पर्याप्तरूपेण प्राप्यते । गद्यपद्यामिश्रितमिदं तावद्धर्मसूत्रं ऋग्वेदात् वैदिकसंहिताभ्यश्च उद्धरणानि गृहीतवान् । क्वचित्क्वचिदपि ऐतरेय-शतपथब्राह्मणयोरपि चर्चाऽत्र दृश्यते । संदेहो जायते यद्वस्तुतो ग्रन्थोऽयं कस्याः वैदिकशाखायाः भवतीति ।

वसिष्ठस्य देशविषये ऐतिहासिकेषु बहुमतभेदो परिलक्ष्यते । बुलहरमतानुसारं धर्मसूत्रस्यास्य मतानुयायिनः नर्मदायारुत्तरतीरे एव निवासमकुर्वन् । परन्तु एतावता निश्चयो नैव जातो यद्धर्मसूत्रमिदं कस्याः शाखाया इति । कुमारिलामतेन ऋग्वेदस्य विद्यार्थिनः धर्मसूत्रमिदं

पठितवन्तः । परन्तु मतमिदं तादृशं सुदृढं नैव प्रतिभाति । धर्मसूत्रं विहाय न किमपि गृह्यसूत्रमस्ति, नापि श्रौतसूत्रम् । सर्वथा धर्मसूत्रमिदं स्वतन्त्रम् । कयाऽपि वैदिकशाखया सह अस्य सम्बन्धस्थापनं सर्वथा अनुचितम् । तीवरदेवेन रागिमनामके ताम्रपत्रे धर्मसूत्रस्यास्य विषये किमपि लिखितम् । ताम्रपट्टमिदम् अष्टमशतकस्य भवति ।

धर्मसूत्रेऽस्मिन् बहूनां बहत्त्वपूर्णतथ्यानामुल्लेखो दृश्यते । वैदिकग्रन्थादपि अनेनोद्धरणानि संगृहीतानि । स्वधर्मसूत्रे वसिष्ठेन वेदाङ्गानामपि नाम गृहीतम् । अत्र इतिहासपुराणादीनामपि महती चर्चा दृश्यते । व्याकरण-ज्योतिःशास्त्रादीनामपि अद्भुतसमन्वयोऽत्र दृश्यते । मनुस्मृत्या सह धर्मसूत्रस्यास्य धनिष्ठः सम्बन्धोऽपि अस्ति । मनुस्मृतेश्चत्वारिंशत् संख्याकाः श्लोकाः अत्र गद्यरूपेणैव वर्णिताः सन्ति । परन्तु काणेमहोदस्येदमभिमतं यत् वसिष्ठेन मनोरूद्धरणानि नैव गृहीतानि, अपि तु कालान्तरे मनुस्मृति-वसिष्ठधर्मसूत्रयोः संशोधतं जातम् । तदनन्तरमेव तत्र किञ्चित् परिवर्त्तनमभूत् ।

धर्मसूत्रेऽस्मिन् त्रिंशदध्यायाः सन्ति । प्रथमाध्यायादारभ्य चतुर्दशाध्यायं यावत् प्रायश आचारस्य विविधनियमानामुपरि चर्चा दृश्यते । वसिष्ठेनात्र आचारस्योपरि सर्वाधिकं महत्त्वं प्रदत्तम् । यथा-

**''आचारः परमो धर्मः सर्वेषामिति निश्चयः ।''**
**हीनाचार परीतात्मा प्रेत्य चेह च नश्यति ।।**

वसिष्ठेन स्वकीये धर्मसूत्रे म्लेच्छजातीनां चर्चा विहिता । तत्रावसरं प्राप्यापि म्लेच्छभाषा शिक्षणस्य निषेधः कृतः - ''न म्लेच्छभाषां शिक्षेत'' इति । एकस्मात् ज्ञायते यत् 'यूनानी' आक्रमणानन्तरं यूनानीनां सम्पर्कः यदा भारतवर्षेऽस्मिन् जातस्तदानीन्तनसमये म्लेच्छजातीयाः जनाः आसन् । अस्मादेव प्रमाणात् धर्मसूत्रस्यास्य समयः ख्री.पू. ३०० संवत्सरस्य समीपवर्त्तिकाले भवितुमर्हति ।

याज्ञवलक्यस्मृतिटीकासु वृद्धवसिष्ठस्य नाम दृश्यते । विशेषतो मिताक्षरायां बृहद्वसिष्ठस्य नामोल्लेखोपि दृश्यते । स्मृतिचन्द्रिकायां ज्योतिर्वसिष्ठस्य नाम प्राप्यते । गोविन्दस्वामिनः मतानुसारं वसिष्ठधर्मसूत्रस्य टीकाकारः यज्ञस्वामी आसीत् । उत्कलीय-स्मृतिपण्डितेन कुलमणिमिश्रशर्मणाऽपि वसिष्ठधर्मसूत्रस्य एका टीका विहिता, यस्यानाम तत्त्वप्रकाशिका इति ।

## विष्णु : -

धर्मसूत्रकारेषु विष्णु: सुप्रख्यात: । जीवनानन्देन १८७६ तमे ख्रीस्ताब्दे धर्मास्त्रसंग्रहेऽस्य प्रकाशनं विहितम् । डा० जालीमहोदयेन १९०९ तमे संवत्सरेऽस्य संपादनं विहितम् । वैजयन्तीटीकानुसारं धर्मसूत्रमिदं यजुर्वेदीयकठकशाखया सम्बद्धम् । वाचस्पतिना अपि मतमिदं समर्थितम् । वस्तुत: विष्णुधर्मसूत्रविषये एतावत्पर्यन्तं तादृशं किमपि सुदृढं प्रमाणं नोपलभ्यते । एकशतसंख्यकेषु अध्यायेषु वर्णितमिदं धर्मसूत्रं गौतमधर्मसूत्रवत् प्राचीनं न भवति ।

अतीव सरलशैल्या व्याकरणनियमानुकूल्येन चात्र सूत्राणि विष्णुना लिखितानि । मनुस्मृति- विष्णुधर्मसूत्रयोर्मध्ये प्रायश: षष्ट्युत्तरैकशतस्थलेषु साम्यं दृश्यते । डा० जालीमहोदयानामिदं तावदभिमतं यत् विष्णो: साहाय्येन याज्ञवलक्येन शरीरविज्ञानमधीतम् । इत: प्राक् चरकेन सुश्रुतेन च शरीरविज्ञानं लिखितम् । याज्ञवलक्यस्मृतेरनन्तरमेव विष्णुना धर्मसूत्रमिदं प्रणीतम् । संहिता-वेदाङ्ग-इतिहास पुराणानामुद्धरणानि धर्मसूत्रेऽस्मिन् प्राप्यन्ते । मिताक्षरायां, अपरार्क-टीकायां, स्मृतिचन्द्रिकायां च बहुवारं विष्णोर्नामोल्लेखो दृश्यते । धर्मसूत्रस्यास्य व्याख्याकार: श्रीनन्दपण्डित: बेङ्गल-एसियाटिक-सोसाइटिमाध्यमेनैव श्रीमता एम०एन० दत्तमहोदयेन वैजयिन्तीटीकाया: प्रकाशनं विहितम् । अत्र १०० परिमिता: अध्याया: सन्ति । प्रथम-द्वितीयाध्याययो: पूर्णरूपेण श्लोका: निबद्धा: सन्ति । किन्तु अवशिष्टा: अध्याया: गद्य-पद्योभयत्मिका: भवन्ति । वैजयन्तीटीकानुसारं ज्ञायते यत् यजुर्वेदीयकठकशाखाया: सूत्रकारोऽयं विष्णुरिति । अस्य सम्बन्ध: वसिष्ठधर्मसूत्रेण सह अस्ति । धर्मसूत्रेऽस्मिन् अध्यायान्ते इन्द्रवज्रा-उपजाति-त्रिष्टुप्छन्दसां प्रयोगो दृश्यते । अस्य समय: ख्री.पू. ३००त: १०० मध्ये भवितुमर्हतीति काणोमहोदयस्याभिमतम् ।

## शङ्खलिखितधर्मसूत्रम् -

शङ्खलिखितधर्मसूत्रस्याध्ययनं शुक्लायजुवेदीयवाजसनेयीशाखीया: कुर्वन्ति । कुमारिलेन तन्त्रवार्त्तिकेऽपि धर्मसूत्रस्यास्योद्धरणानि गृहीतानि । महाभारतेऽपि शङ्खलिखितयोर्नाम प्राप्यते । याज्ञवल्क्यस्मृतौ पराशरस्मृतौ चास्य धर्मसूत्रस्य चर्चा दृश्यते । गद्य-पद्यामिश्रितमिदं तावत् धर्मसूत्रं सम्प्रति अनुपलब्धं भवति । केवलमुद्धरणरूपेणैव इदं धर्मसूत्रं जीवितमस्ति ।

जीवनानन्दस्मृतिसंग्रहे धर्मसूत्रस्यास्य अष्टादशाध्यायाः, शङ्खस्मृतेः ३३० संख्यकाः श्लोकाः लिखितस्मृतेश्च ९३ संख्यकाः श्लोकाः प्राप्यन्ते । मिताक्षरायामपि अस्य धर्मसूत्रस्य ५० परिमिताः श्लोकाः वर्णिताः दृश्यन्ते । याज्ञवल्क्यस्मृतेः प्रमुखटीकाकारेण विश्वरूपेणापि नवमशतकस्य पूर्वार्द्धे एव शङ्खलिखितधर्मसूत्रस्य प्रशंसा विहिता । परशरस्मृतौ चास्य प्रसंसाऽपि दृश्यते यथा–

**कृते तु मानवो धर्मस्त्रेतायां गौतमः स्मृतः ।**
**द्वापरे शङ्खलिखितः कलौ पाराशरः स्मृतः ।।**

अनेनैव श्लोकाधारेण शङ्खलिखितधर्मसूत्रं प्रामाणिकमिति मन्यते । योगीश्वरेणापि स्वस्मृतौ शङ्खः लिखितश्च धर्मशास्त्रकारत्वेन गृहीतः । अस्य धर्मसूत्रस्योपरि भाष्यमपि केनापि कृतमित्यस्मिन् विषये कल्पतरौ विवादरत्नाकरे विवादचिन्तामणौ च चर्चितमस्ति ।

बहुप्राचीनकालादारभ्य पूर्वाचार्यैः धर्मशास्त्रविषये विचारः कृतः । अतः परमेव शङ्खलिखितधर्मसूत्रस्य रचनाऽभूत् । धर्मसूत्रस्यास्य भाषा शुद्धा परिमार्जिता चास्ति । अत्र व्याकरणनियमानां परिपालनमपि जातम् । विषयवस्तुनः विचारानुसारं ज्ञायते यत् धर्मसूत्रस्यास्य कालः आपस्तस्बधर्मसूत्रादनन्तरमेव भवितुमर्हति । याज्ञावक्ल्येन धर्माचार्यरूपेण अनयोर्नाम गृहीतम् । अतस्ततः प्रागेव ग्रन्थास्यास्य रचना जाता । ग्रन्थस्यास्य रचनाकालः ख्री. पू. ३००तः १०० ख्री. पू. मध्ये भवितुमर्हतितीति डा० काणेमहाभागानां मतम् ।

कुत्रत्यौ शङ्खलिखिताविति न कुत्रापि उल्लेखो दृश्यते । परन्तु वायु-हरिवंशपुराणयोः वचनात् ज्ञायते यन्मनुपुत्रस्य सुद्युम्नस्म ज्येष्ठपुत्रः उत्कलः उत्कलखण्डं प्राप्तवान् । तस्यैव नरपतेः सुद्युम्नस्य राजसभायां शङ्ख-लिखिताख्यो द्वावेव भ्रातरौ स्मृतिशास्त्ररचयितारौ आस्ताम् । महाभारतस्य शान्तिपर्वणि युद्धिष्ठिरोपदेशदानव्याजेन वर्णितमस्ति यत् वाहुदातीरे शङ्खलिखितयोः नित्यफलपुष्प- परिपूर्णौ रमणीयौ द्वावेवाश्रमौ पृथक् पृथक् आस्ताम् । एतौ दौ भ्रातरौ वाहुदातीरे सर्वदा आह्निकादीनि कर्माणि कृतवन्तौ । इदं वाहुदानदी सम्प्रति उत्कलखण्डस्य गञ्जामण्डले समेषां नेत्रपथगामिनी भवति । अतः शङ्खलिखितौ उत्कलीयौ इति प्रमाणितं भवति । कृत्स्नेऽपि उत्कलप्रान्ते अनयोः ख्यातिरविस्मरणीया वर्त्तते ।

स्वानुशीलनप्रश्नाः
(१)शङ्ख-लिखितौ कुत्रत्यौ ?

उ :.................................................।

(२)विष्णुधर्मसूत्रस्य टीकायाः नाम किम् ?

उ :................................................ ।

## सारांशः

प्रियपाठकाः ! अस्मिन् अंशे सूत्रपरिभाषा, सूत्रलक्षणं, सूत्रसाहित्योस्याद्गमस्थानं चेति विषयाः प्रतिपादिताः सन्ति । वेदाङ्गभूतकल्पसूत्रात्कथं सूत्रसाहित्यस्योत्पत्तिर्जाता, कल्पशब्दस्य का परिभाषा तत्र किञ्च प्रमाणमित्यस्मिन् विषयेऽपि चर्चा विहिताऽस्ति । कल्पसूत्रात् श्रौत-गृह्य-धर्म-शुल्वसूत्राणां क्रमविकासः कथं जातः, तेषां स्वरूपञ्च किमिति अत्र सम्यक् प्रतिपादितमस्ति । सूत्रसाहित्यस्य कालप्रसङ्गे धर्मसूत्राणामपि काल अत्र विचारितो वर्त्तते । प्रमुखधर्मसूत्रकाराणां प्रसङ्गे प्राचीनधर्मसूत्रकाराः अनतिप्राचीन-धर्मसूत्रकाराश्च के इत्यस्मिन् विषये विचारं विधाय गौतम-बौधायन-आपस्तम्ब-वसिष्ठ-विष्णवादीनां धर्मसूत्रकारणां परिचयोऽपि प्रदतः ।

## पारिभाषिकशब्दाः

(१) सूत्रम् - संक्षिप्तम् ।

(२) कल्पः - वेदाङ्गविशेषः, वेदविहितानां कर्मणां कल्पनाशास्त्रम् ।

(३)शुल्वसूत्रम्-वैदिकनिर्माणादिकर्मणां मापनविधायकसूत्रम् ।

(४) गृह्यसूत्रम् - गृह्याग्निसाध्यकर्मणां होम-पञ्चमहायज्ञादीनां विधायकं सूत्रम् ।

(५) प्रवरः - ऋषेरिदमार्षं नाम प्रवरः गोत्रप्रवर्त्तकः ।

(६) वाहुदा - नदीविशेषष्य नाम ।

(७) उतथ्यपुत्रः - गौतमस्य नामान्तरम् ।

(८) गोविन्दस्वामी: - बौधायनधर्मसूत्रटीकाकार: ।

(९) वैजयन्ती - नन्दपण्डितवृत्तविष्णुधर्मसूत्रटीका ।

(१०) सुद्युम्न: - मनुपुत्र:

निबन्धात्मकप्रश्ना:

(क) सूत्रसाहित्यस्य क्रमिकविकासं प्रतिपादयत ।।

(ख) सूत्रग्रन्थानां भेदं विलिख्य सूत्रसाहित्यस्य कालं च प्रदर्शयत ।।

(ग) धर्मसूत्रकारेषु प्राचीनधर्मसूत्रकारस्य गौतमस्य परिचयं लिखत ।।

**विश्लेषणात्मकप्रश्ना:**

(क) वेदाङ्गाख्यकल्पसूत्रात् कथं सूत्रसाहित्यस्योत्पत्तिर्जाता इति व्याख्यात ।

(ख) सूत्राणां रचनाकालं प्रमाणयत ।

(ग) शङ्खलिखितयोरुत्कलीयत्वं साधयत ।

**लघुप्रश्ना:**

(क) सूत्रलक्षणं लिखत ।

(ख) कल्पशब्दार्थं प्रतिपादयत ।

(ग) गौतमधर्मसूत्रस्य टीका-टीकाकाराणां नामानि लिखत ।

(घ) बौधायनस्य देशं प्रमाणयत ।

(ङ) वसिष्ठधर्मसूत्रस्य वैशिष्ट्यं लिखत ।

**एकाङ्कप्रश्ना:**

(१) सूत्रसाहित्यस्योत्पत्ति: कस्मात् जाता ?

(२) क: कल्पशब्दार्थ: ?

(३) गृह्यसूत्रं किम् ?

(४) क: प्राचीनतम: धर्मसूत्रकार: ?

(५) उतथ्यपुत्र: क: ?

(६) गौतमधर्मसूत्रस्य कति टीकाकारा: ?

(७) बौधायनधर्मसूत्रस्य टीकाकर्त्तुर्नाम किम् ?

(८) कस्मिन् धर्मसुत्रे आचारविषये बहुविचारोऽस्ति ?

(९) कः वैजयन्तीटीकाकारः ?

(१०) शङ्ख-लिखितौ कुत्रत्यौ ?

## एकाङ्कप्रश्नानामुत्तराणि

क) कल्पसूत्रात् ।

ख) वेदाङ्गविशेषः (वेदविहितकर्मणां कल्पनाशास्त्रम्)

ग) गृह्याग्निसाध्यकर्मणां यत्र विचारः ।

घ) गौतमः ।

ङ) पञ्च

(च) गोविन्दस्वामी ।

छ) वसिष्ठधर्मसूत्रे ।

ज) नन्दपण्डितः ।

झ) उत्कलीयौ ।

❖❖❖

# अंश: - सप्तम:

**संरचना**

७.१ . प्रस्तावना
७.२. उद्देश्यम्
७.३ .स्मृतिसाहित्यस्योद्भवो विकासश्च
७.४. प्रमुखस्मृतिकाराणां परिचय:

## ७.१ . प्रस्तावना

धर्मशास्त्रसाहित्याकाशे सूत्रवत् स्मृतिसाहित्यस्य परम्परा अतीव गौरवपूर्णा । सूत्रबद्ध- धर्मशास्त्रग्रन्थानामनन्तरं सामाजिकावश्यकतापरिपूर्त्तये स्मृतीनां योगदानमनीव महत्त्वपूर्णम् । अनुष्टुप्च्छन्दोबद्धस्मृतिग्रन्थानां परम्परायां मनुस्मृते: प्राथम्यं सर्वै: स्वीकृतम् । यद्यपि परवर्त्तिकाले योगीश्वरयाज्ञवल्क्येन कृत्स्नमपि धर्मशास्त्रं त्रिषु अध्यायेषु विभज्य विमर्श: कृतस्तथापि एतदपेक्षया मनो: विषयाणां प्रतिपादनशैली काचिद् भिन्ना प्रतिभाति । एतस्मिन् विषये सम्यक् ज्ञानार्थं स्मृतिसाहित्यस्योद्भव: क्रमिकविकासश्च कथं जात:, क: स्मृतिशब्दार्थ:, तस्य च प्रामण्यं कथम्, के च प्रमुखस्मृतिप्रणेतार:, कश्च तेषां परिचय इत्यवश्यमेव सर्वै: ज्ञातव्यम् । एतदर्थं सम्प्रति एतस्मिन् विषये सम्यक् विचार्यते ।

## ७.२. उद्देश्यम्

प्रियपाठका: ! सम्प्रति अंशेऽस्मिन् भवन्त अधोलिखितान् विन्दून् सम्यक् आलोचयिष्यन्ति -

- धर्मशास्त्रसाहित्याकाशे सूत्रानन्तरं स्मृतिसाहित्यस्योद्भवो विकासश्च कथमभूदिति ज्ञातुं शक्नुवन्ति ।
- स्मृतिशब्दार्थमपि सम्यक् व्युत्पादयितुं प्रभवन्ति ।
- स्मृतिप्रामाण्यं ज्ञातुं शक्नुवन्ति ।

- प्रमुखस्मृतिकारास्तेषाञ्च कः परिचय इति ज्ञातुं प्रभवन्ति।
- स्मृतिकारेषु मनोः कथं प्राधान्यमिति ज्ञातुं शक्नुवन्ति ।

## ७.३ .स्मृतिसाहित्यस्योद्भवो विकासश्च

प्राचीनकाले सर्वे ग्रन्थाः प्रायशः सूत्रबद्धा आसन् । विस्तृतं विषयं संक्षेपेण प्रतिपादयितुं सुत्रमेव प्रकृष्टं माध्यममासीत् । परन्तु परवर्त्तिकाले सूत्रग्रन्थानां पठनेऽनादरो जातः । फलस्वरूपं छन्दोबद्धस्मृतिग्रन्थानां प्रादुर्भावो जातः । मन्वादिभिः बहुभिः धर्मशास्त्रकारैः बहवो हि स्मृतिग्रन्थाः विनिर्मिताः ।

सूत्र-स्मृति-भाष्य-निबन्धात्मकेऽस्मिन् धर्मशास्त्रे स्मृतिसाहित्यं सर्वथा प्रामाण्यं भजते । स्मृतिग्रन्थाः छन्दोबद्धाः भवन्ति । सूत्रापेक्षया स्मृतिग्रन्था अर्वाचीना इति ऐतिहाषिकाः वदन्ति । स्मृतिकारेषु भगवान् मनुः प्रप्रथमः । तेन अत्रि-उतथ्यपुत्र-भृगु-वसिष्ठ-वैखानस-शौनकादीनां षण्णामेव स्मृतिकाराणां नामोट्टङ्कितम् । बौधायनेन सप्त धर्मशास्त्रकारणां नाम संगृहीतम् । यथा – औपजंधनिः, कात्यः, काश्यपः, गौतमः, प्रजापतिः, मौद्गलः, हरीतश्चेति । वसिष्ठेनापि गौतम-प्रजापति-मनु-यम-हरीतादिपञ्चानां स्मृतिकाराणां संग्रहो विहितः । आपस्तम्बोऽपि एक-कुणिक-पुष्करादीनां नामानि गृह्णाति । योगीश्वरेणापि विंशतिधर्मशास्त्रप्रयोजकानां नामानि स्वग्रन्थे सादरमुट्टङ्कितानि ''मन्वत्रिविष्णुहारीत'' इत्यादि । पराशरेणापि एकोनविंशतिसंख्यकानां स्मृतिकाराणां नामान्युद्धृतानि । एतत्सूच्यनुसारं ज्ञायते यत् योगीश्वरकृतस्मृतिकारसूच्यपेक्षया पराशरकृतसूचेरन्तरमस्तीति । चतुर्विंशतिमतसंग्रहनामके ग्रन्थे चतुर्विंशतिधर्मशास्त्रकाराणां नामोल्लेखोऽस्ति । पैठीनसिमतानुसारं षट्त्रिंशत्स्मृतयः सन्ति । अपरार्कानुसारं भविष्यपुराणे षड्विंशस्मृतीनां नामोल्लेखोऽस्ति । वृद्धगौतमस्मृतौ सप्तपञ्चाशत्संख्याकानां स्मृतिकाराणां नामानि प्राप्यन्ते । मित्रमिश्रकृतवीरमित्रोदयोद्धृतप्रयोगपारिजातवचनानुसारम् अष्टादशमुख्यस्मृतिकाराः, अष्टादश उपस्मृतिकाराः, एकविंशति अन्यस्मृतिकाराश्च सन्तीति ज्ञायते । यथा अष्टादश मुख्यस्मृतिकाराः - मनुः, बृहस्पतिः, दक्षः, गौतमः, यमः, अङ्गिराः, योगीश्वरः, प्रचेता, शातातपः, पराशरः, संवर्त्तः, उशना, शङ्खः, लिखितः, अत्रिः, विष्णुः

आपस्तम्बः, हारीतश्चेति । तथैवापि नारदादिगोभिलान्ताः उपस्मृतिकाराः, वसिष्ठादिवैजवापप्रभृतयः अपरे स्मृतिकर्त्तारश्च भवन्ति । कमलाकर-नीलकण्ठयोर्मतानुसारं तु स्मृतिकाराणां संख्या एकशतम् । प्रतापरुद्रदेवकृतसरस्वतीविलासेऽपि उपस्मृतिकाराणां नामानि उद्धृतानि सन्ति । यथा - जाबालि-नाचिकेत-स्कन्दलौगाक्षि-काश्यप-व्यास-सनत्कुमार-शान्तनु-जनक-व्याघ्र-कात्यायन-जातुकर्णि कपिञ्जल-बौधायन-कणाद-विश्वामित्र-पैठीनसि-भृगु-गोभिलप्रणीता उपस्मृतयः ।

एतेषां मन्वादिप्रणीतानां स्मृतीनां जाबाल्यादिप्रणीतोपस्मृतीनां च सर्वासामेव वेदानुमापकत्वेन प्रामाण्यमङ्गीक्रियते, न कस्यापि अप्रामाण्यमिति कृत्वा महनीयगौरवावहेयं भारतीयशास्त्रपरम्परा एतेषु पूर्वोक्तेषु स्मृत्युपस्मृतिकर्त्तुषु मनोरेव प्राथम्यं प्राधान्यञ्च स्वीक्रियते । यतो हि ऐतिहासिकानां समीक्षायां मनुः प्रप्रथमधर्मशास्त्रकारो भवति । परमात्मन एव संसारस्थितये सर्वज्ञैश्वर्यादिसम्पन्नमनुरूपेण प्रादुर्भूतत्वात् । तदभिधानस्य मङ्गलातिशयत्वाद् यथा–

**एवमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् ।**
**इन्द्रमेके परे प्राणमपरे ब्रह्म शाश्वतम् ।। इति ।।**

स्वानुशीलनप्रश्नाः
(१) स्मृतिग्रन्थाः सूत्रबद्धाः छन्दोबद्धाः वा ?
उः.......................................................
(२)कः प्रप्रथमस्मृतिकारः ?
उः.......................................................

## ७.४. प्रमुखस्मृतिकाराणां परिचयः

स्मृतिसूत्रग्रन्थानां कालनिर्णयप्रसङ्गे मैक्समूलर महोदयानां मतं भवति यत् सूत्रग्रन्थानामनन्तरमनुष्टुप्छन्दोबद्धग्रन्थानां रचनाऽभूत् । परन्तु काणेमहोदयानां मतेन सूत्रग्रन्थानामपेक्षया श्लोकबद्धाःमनुस्मृत्यादयो ग्रन्थाः प्राचीनतमाः । स्मृतिकारेषु मनुः सूत्रकारेषु गौतमश्च सर्वप्राचीनौ, पण्डितकुलमणिमिश्रमहोदयेन मनुस्मृतेः प्राचीनतानामके प्रबन्धे स्मृतीनां प्राचीनता स्पष्टीकृता । योगीश्वरेणापि स्वस्मृतौ श्लोकापेक्षया सूत्राणामर्वाचीनत्वं प्रतिपादितम् । यथा- ‘‘श्लोकाः सूत्राणि भाष्याणि

यच्च किञ्चन वाङ्मयम्'' इति, तर्हि एतेन स्पष्टं यत् स्मृतिग्रन्थानामपेक्षया सूत्रबद्धाः ग्रन्था अर्वाचीनाः । प्रमुखस्मृतिकारेषु च मनु-याज्ञवल्क्य-पराशरादयः प्रधानभूताः ।

## मनुः -

स्मृतिकारेषु मनोः प्राथम्यं वर्त्तते । मनुस्मृतिस्तस्यैव साधनस्य चरमपरकाष्ठा । वर्णाश्रमधर्मप्रतिपादकतयाऽस्माकं भारतीयानां धर्मप्राणानां प्रामाण्ये मनुस्मृतिनामको ग्रन्थः सर्वोत्कर्षेण वर्त्तते । यतो हि मानवेऽस्मिन् धर्मशास्त्रे, वर्णधर्म-आश्रमधर्म-वर्णाश्रमधर्म-गुणधर्म-निमित्तधर्म-साधारणधर्मश्चेति सर्वविधोऽपि धर्मो भगवता मनुना प्रतिपादितः । यथा-

**अस्मिन् धर्मोऽखिलेनोक्तो गुणदोषौ च कर्मणाम् ।**
**चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ।।**

वेदस्यानेकशाखाभिरनेकवर्त्मतया ततो नैव सर्वेषां जनानां यथावद् ज्ञानं सुशकमिति वेदविद्भिः वेदानुगततत्तदर्थाभिधायकस्मृतय उपनिबद्धाः । स्मृतयो धर्मशास्त्रम्, तासामपि धर्ममूलत्वम् इति मनुना अभिभाषितत्वाच्च । पौरुषेयत्वेऽपि मनुवाक्यानामविगीतमहाजनपरिग्रहात् श्रुत्युपग्रहाच्च वेदमूलकतया प्रामाण्यम् । तथा च छान्दोग्यब्राह्मणे श्रूयते- '' मनुर्वै यत्किञ्चिदवदत्तद्भेषजं भेषजतायाः'' इति । विभिन्नेषु निबन्धग्रन्थेषु मनुवचनानि, बृहन्मनुवचनानि, वृद्धमनुवचनानि च बहुशः समुपलभ्यन्ते । एतानि वचनानि तु सर्वदा भिन्नानि एव, यतो हि भिन्नरूपेण एतेषां पुरुषविशेषाणां नामानि प्राप्यन्ते ।

मनुस्मृतौ द्वादशाध्यायाः २६९४ परिमिताः श्लोकाश्च वर्त्तन्ते । अस्याः भाषा सरला सुगमा च । शैली च धाराप्रवाहानुसारेण वर्त्तते । अत्र व्याकरणदृष्ट्या ये नियमाः सन्ति ते पाणिनिसम्मता । अस्याः स्मृतेरपि सिद्धान्ताः गौतम-बौधायन-आपस्तम्बधर्मसूत्रेषु दृश्यन्ते । मनुस्मृतेः बहवः श्लोकाः वसिष्ठधर्मसूत्रेषु विष्णुस्मृतौ च समुपलभ्यन्ते । भाषायां सिद्धान्ते च मनु-कौटिल्ययोर्मध्ये बहुत्र साम्यमस्ति । अस्यां स्मृतौ अत्रि-उतथ्यापुत्र-भृगु-शौनक-वसिष्ठ-वैखानसादीनां धर्मशास्त्रकाराणां नामानि दृश्यन्ते । तत्र मनुनाऽपि केचित् ''अपरे'', ''अन्ये'', ''एके'' इत्येवंप्रकारेण धर्मशास्त्रकाराणां नामानि तेषां मतानि चोट्टङ्कितानि ।

मनुस्मृते: नवटीका: सन्ति । यथा - १) मेधातिथे: मनुभाष्यम्, २) गोविन्दराजस्य मनुटीका, ३) कुल्लूकस्य मन्वर्थमुक्तावली, ४) सर्वज्ञनारायणस्य मन्वर्थनिबन्ध:, ५) राघवानन्दसरस्वत्या: मन्वर्थचन्द्रिका, ६) नन्दनस्य मनुव्याख्यानम्, ७) रामचन्द्रस्य मनुभावार्थचन्द्रिका, ८) मणिरामस्य मन्वर्थबोधिनी ९) भारुचे: भारुचिटीका चेति । एषु भाष्यकारेषु मेधातिथि: प्राचीनतम: ।

मनुस्मृति: धर्मशास्त्रग्रन्थेषु यथा सर्वमान्या तथैव सर्वप्राचीना । योगीश्वरेण धर्मशास्त्रकाराणां नामानि व्याहरता मनु: सर्वप्रथमं प्रदर्शित: । एतद्भिन्नमपि अत्रिस्मृतौ अत्रिसंहितायाम् अङ्गिर:स्मृतौ ममुस्मृतौ आपस्तम्बधर्मसूत्रे बृहस्पतिस्मृतौ पराशरस्मृतौ च मनोर्नाम दृश्यते । शङ्खलिखितयोश्च स्मृतिधर्मशास्त्राणि । तेषां प्रणेतार: मनु-याज्ञवल्क्य-विष्णवादय: । एतेषु स्मृतिग्रन्थेषु मनो: साक्षात् कीर्त्तितत्वात् मनुस्मृते: प्राचीनता प्रमाणिता ।

गौतमधर्मसूत्रे ''त्रीणि प्रथमान्यनिर्द्देश्यानि मनु:'' इति मनो: नामदर्शनात् सत्यपि पाठान्तरे अस्यैव पाठस्य हरदत्तेन अनुसृतत्वात् पुनश्च ''चत्वारश्चतुर्णां पारगा वेदानां प्रागुत्तमास्त्रय: आश्रमिण: पृथग्धर्मविदस्त्रय एतान् दशावरात् परिषदित्याचक्षते'' इति वचनेन गौतमस्य चातुर्विद्यवादित्वात् त्रैविद्यवादिनो मनोरपेक्षया अर्वाचीनतैव ।

बौधायनोऽपि याज्ञवल्क्येन न दर्शित:, तेन च ''वाजसनेयिनं याज्ञवल्क्यं तर्पयामीति'' सूत्रे याज्ञवल्क्यो दर्शित इति तथा चातुर्विद्यवादित्वेन च मनोरपेक्षया अर्वाचीन एव । एतेन धर्मसूत्राणि श्लोकस्मृत्यपेक्षया प्राचीनानि इति वैदेशिकानां तदनुसारिणामाधुनिकानां च मतं निरस्तम् । ''श्लोक: सूत्राणि भाष्याणि यच्च किञ्चन वाङ्मयम्'' इति योगीश्वरवचने श्लोकशब्दानन्तरं क्रमसन्निविष्ट: सूत्रशब्द: श्लोकापेक्षया सूत्राणामर्वाचीनतां स्पष्टमभिधत्ते । अन्येऽपि स्मृतिकारा: नारद-शौनक-छागलेयादयो मुनयो मनोरर्वानता एव सामान्यत: याज्ञवल्क्येन अदर्शितत्वात् ।

वाल्मीकीयं रामायणमपि किस्किन्ध्याकाण्डे मनुवचनमुद्धृत्य आत्मानमर्वाचीनं साधयति । सर्वोपरि ''यद् वै किञ्च मनुरवदत्तद् भेषजम्'' इति नैत्तिरीयश्रुतिर्मनोगौरवं वर्द्धयतीति सकलधर्मशास्त्रापेक्षया मनुस्मृते: प्राचीनता प्रमाणितैव । यद्यपि उपलब्धमनुस्मृतौ अत्रि-गौतम-यम-वसिष्ठानां नामानि दृश्यन्ते, तथापि तानि मनुस्मृते: प्राचीनतां नैव

व्याहन्तुमीशते, यतस्तादृशनामवन्ति पद्यानि कथञ्चित् मनुस्मृतौ प्रक्षिप्तानि । यथा ''शूद्रावेदी पतत्यत्रेः'' इति । वसिष्ठविहितं पद्यमिति एतेषां वहिष्कारे कृतेऽपि ग्रन्थस्य पौवापर्यं सङ्गतिच्छेदाभावात् । श्लोकयोः मनुप्रोक्तौ यमदक्षौ तु न स्मृतिकारयमदक्षौ इति समाधेयम् । अन्यथा परस्परमुदाहरतां धर्मशास्त्राणां पौर्वापर्यपरिज्ञानमनाकलीयं स्यादिति ।

## याज्ञवल्क्यः -

स्मृतिकारेषु योगीश्वरयाज्ञवल्क्यः यथा सुव्यवस्थितस्तथैव याज्ञवल्क्यस्मृतिरपि सुव्यवस्थिता वर्त्तते । ग्रन्थोऽयं यथा धर्मशास्त्रविषयगुम्फितस्तथैव सामाजिकदृष्टिकोणानुसारं समादृतोऽप्यस्ति । अस्यां स्मृतौ आचार-व्यवहार-प्रायश्चित्तभेदेन त्रय अध्यायाः सन्ति । समेषां विषयाणां साङ्गोपाङ्गविवेचनमत्र योगीश्वरेण १०१२ परिमितैः श्लोकैः विहितम् । सम्पूर्णयाज्ञवल्क्यस्मृतिः अनुष्टुप्छन्दसा निबद्धाऽस्ति । अस्याः शैली सरसा धाराप्रवाहा चास्ति । पाणिनिनियमानां परिपालनमत्र प्रायशः सर्वेषु स्थलेषु अभूत् । अत्रादौ आचाराध्याये ब्रह्मचर्यप्रकरणादारभ्य राजधर्मान्तानि त्रयोदशप्रकरणानि द्वितीये व्यवहाराध्याये च साधारणकव्यवहारमातृकाप्रकरणादारभ्य प्रकीर्णकान्तानि पञ्चविंशति प्रकरणानि, अन्तिमे प्रायश्चित्ताध्याये च अशौचप्रकरणादारभ्य कृच्छ्ऽदिलक्षणान्तानि चतुर्दशप्रकरणानि सन्ति ।

वैदिकसाहित्ये याज्ञवल्क्यस्य नाम प्रसिद्धमस्ति । शुक्लयजुर्वेदस्यायं प्रणेता इति प्रसिद्धिः । बृहदारण्यकोपनिषदि याज्ञवल्क्यस्य आख्यायिका प्राप्यते । वैशम्पायनऋषिरस्य गुरुः । गुरोरवमाननाकारणात् प्राप्तं वेदं दातुं गुरुः आदिष्टवान् । ततः परं सूर्योपासनया शुक्लयजुर्वेदस्य ज्ञानमवाप्तवान् । तैर्याज्ञवल्क्यो वाजसनीसंज्ञाः शाखा अकरोत् ।

याज्ञावल्क्यस्मृतेरूपरि सप्तभाष्यकारैः भाष्यं विहितम् । यथा- विश्वरूपस्य बालक्रीड़ा, विज्ञानेश्वरस्य मिताक्षरा, शूलपाणेः दीपकलिका, अपरार्कस्य अपरार्कयाज्ञवल्क्यधर्मशास्त्र-निबन्धः, नन्दपण्डितस्य मिताक्षरोपरि प्रमीताक्षरा प्रतीताक्षरा वा, मित्रमिश्रस्य वीरमित्रोदयः, बालम्भट्टस्य बालम्भट्टी चेति । एषु भाष्यकारेषु विश्वरूपः (८००-८२५)

सर्वप्राचीनतमो भवति । परन्तु सत्स्वपि बहुषु भाष्येषु विज्ञानेश्वरकृतमिताक्षरा सर्वोपरिवर्त्तते, विदुषामग्रे-सरेण विज्ञानेश्वरेण राज्ञो विक्रमादित्याश्रयेणैव मिताक्षराख्या याज्ञवल्क्यस्मृतिख्याख्या निरमायि ।

यद्यपि याज्ञवल्क्यस्थितिकाल: पुरुषायुषेण मतिमदग्रेसरेणापि निश्चयितुमशक्यस्तथापि श्रीमद्भागवतद्वादशस्कन्धे –

**ते परम्परया प्राप्तस्तत्तच्छिष्यैर्धृतव्रतै: ।**
**चतुर्युगेष्वथ व्यस्ता द्वापरादौ महर्षिभि: ।।**

अतो द्वापरान्ते वेदभाष्यसिद्धे: शंतनुकालसमकालं व्यासावतारप्रसिद्धेश्च । अतो द्वापरस्यान्तिमकाले कलियुगारम्भात्पूर्वं व्यासावतार: । स च तदानीमेव ऋगादिसंहिताश्चतस्रो विभज्य एवैकस्मै शिष्याय एवैकां संहितां ददौ । तत्र च यजुर्वेदसंहितां वैशम्पायनायाददात् । तस्यैवान्तेवासी याज्ञवल्क्यो बभूवेति निश्चीयते ।

याज्ञवल्क्यस्मृतौ आचाराध्याये योगीश्वरेण स्मृतिकाराणां नामप्रदर्शनावसरे बौधायनस्य नामाप्रदर्शितत्वात्, बौधायनेन च वाजसनेयिनं याज्ञवल्क्यं तर्पयामि ''इति सूत्रे याज्ञवल्क्यो दर्शित इति बौधायनापेक्षया याज्ञवल्क्य: प्राचीन: । चातुर्विद्यवादित्वेन च मनोरपेक्षया अर्वाचीन एव । काणेमहाभागेन तु याज्ञवल्क्यस्य समय: ख्री.पू. १००-३०० मध्ये भवेदिति लिखितम् । अयं याज्ञवल्क्य: मिथिलावास्तव्य इति स्वकृतग्रन्थश्लोकात् ज्ञायते–

**मिथिलास्थ: स योगीन्द्र: क्षणं ध्यात्वाब्रवीन्मुनीन् ।**
**यस्मिन् देशे मृग: कृष्णस्तस्मिन् धर्मान्निबोधत ।।**

**इति ।।**

## पराशर: -

पराशर: स्मृतिकारेषु अन्यतम: । योगीश्वरयाज्ञवल्केन पराशर: स्मृतिकारत्वेन गृहीत: । कलौ युगे स्मृतेरस्या: प्राधान्यं वर्त्तते । यथा-

**कृते तु मानवो धर्मस्त्रेतायां गौतम: स्मृत: ।**
**द्वापरे शङ्खलिखित: कलौ पाराशर: स्मृत: ।।**

अस्यां स्मृतौ द्वादशाध्याया: ५९३ परिमिता: श्लोकाश्च सन्ति । अत्र प्रथमाध्याये धर्माचारादीनां वर्णनम्, द्वितीयेऽध्याये गृहस्थधर्मविचार:, तृतीयाध्याये आशौचव्यवस्था, चतुर्थाध्याये विविधप्रायश्चित्तम्,

पञ्चमाध्याये प्रायश्चित्त-श्रौताग्निहोत्रयोः वर्णनम्, षष्ठाध्याये प्राणिहत्याप्रायश्चित्त-ब्राह्मणमहत्त्वयोर्वर्णनम्, अष्टमाध्याये धर्माचरण-निन्द्यब्राह्मण-गोरक्षणानां विचारः, नवमाध्याये गोसेवागोवधप्रायश्चित्तविचारः, दशमाध्यायेऽगम्यगमनप्रायश्चित्तम्, एकादशेऽभक्ष्यभक्षणप्रायश्चित्तम्, द्वादशाध्याये सामान्यप्रायश्चित्तविचारश्च दृश्यते ।

अस्यां स्मृतौ धर्मशास्त्रकाराणां नामान्यपि प्राप्यन्ते । यथा-वसिष्ठ-काश्यप-गार्ग्येय-गौतम-मनु-उशना-अत्रि-विष्णु-संवर्त-दक्ष-अङ्गिरः-शातातप-हारीत-याज्ञवल्क्य-कात्यायन-प्रचेता-आपस्तम्ब-शङ्ख-लिखितादीनामूनविंशसंख्यकानां स्मृतिकाराणां नामानि तत्र परिगणितानि सन्ति । विश्वरूप-विज्ञानेश्वर-अपरार्क-हेमाद्रिप्रभृतिभिः स्मृति-निबन्धृभिः पराशरस्मृतेः श्लोकाः स्वस्ववृत्तिषु उद्धृताः । अतो निःसन्देहेन कथयितुं शक्यते यदीयं पराशरस्मृतिः नवमशताब्देः पूर्वमेव रचिता भवेत् । अस्याः स्मृतेः रचना याज्ञवल्क्यस्मृतेरनन्तरमेव जातेति मन्यते । काणेमहोदयेन स्मृतेरस्याः कालः प्रथमशताब्दितः पञ्चमशताब्द्यवधि प्रतिपादितः । पाणिनिना पराशरस्य नाम गृहीतम् । निरुक्तग्रन्थे अपि पराशरस्य चर्चा प्राप्यते । गरुडपुराणे ३९ संख्यकाः श्लोकाः पूर्णरूपेण समुपलभ्यन्ते । कौटिल्येन स्वकीयेऽर्थशास्त्रे पराशरस्य नामोल्लेखः कृतः । उपलब्धयाज्ञवल्क्यस्मृतौ यद्यपि पराशरस्य नाम प्राप्यते तथापि तदपेक्षया योगीश्वरः न अर्वाचीनः । यतो हि रचनादृष्टिकोणानुसारं विज्ञायते यदस्याः स्मृतेः रचना याज्ञवल्क्य-स्मृतेरनन्तरमेव जातेति ।

पराशरस्मृतिं विहाय पराशरसंहिताऽपि वर्त्तते । अत्र द्वादशाध्यायाः सन्ति । बृहत्पराशरस्मृतिरपि भिन्ना भवति । अत्रापि द्वादशाध्यायाः सन्ति। वर्णाश्रमधर्मादारभ्य योगाभ्यासवर्णनं यावदत्र विषयाः विवेचिताः वर्त्तन्ते । विभिन्नानामाश्रमाणामाचारप्रायश्चित्तानां च सम्यक् वर्णनमत्रैव जातम् । इयं स्मृतिः पराशरस्मृत्यपेक्षया बृहद् भवति ।

अस्याः स्मृतेः द्वे टीके वर्त्तेते । यथा माधवाचार्यस्य पराशरमाधवीयटीका, नन्दपण्डितस्य विद्वन्मनोहरा चेति । आसु पराशरमाधवीयटीका प्रमुखा भवति ।

## नारदः –

याज्ञवल्क्यस्मृतौ पराशरस्मृतौ च नारदस्मृतेः नामोल्लेखो नास्ति। परन्तु विश्वरूपोद्धृतेषु दशसु धर्मशास्त्रकारेषु नारदस्य नाम दृश्यते । नारदस्मृतेः त्रिषु अध्यायेषु न्यायसम्बन्धिनो विधयः चर्चिताः सन्ति । क्रमशो यदा धर्मस्य ह्रासः विद्वद्भिः परिलक्षितस्तदा व्यवहारस्य प्रतिष्ठा जाता । यथा नारदस्मृतौ –

**''नष्टे धर्मे मनुष्येषु व्यवहारः प्रकल्पितः'' इति ।**

अत्र क्रमानुसारमष्टादशविवादपदानां विचारो दृश्यते । अत्र १०२८ परिमिताः श्लोकाः सन्ति ।

नारदस्मृतेरेकः श्लोकः जीमूतवाहनकृतव्यवहारमातृकायां माधवाचार्यस्य पराशरमाधवीये च उद्धृतो वर्त्तते । अस्य श्लोकस्यार्द्धभागोऽपि विक्रमोर्वशीये प्राप्यते । एतस्मात् महाकविकालिदासात्पूर्ववर्त्ययं नारद इति प्रतिपादायितुं शक्यते । नारदस्मृतौ ''दीनार'' नामकशब्दस्य श्रवणात् प्रथमशताब्देरनन्तरमेवास्याः स्मृतेः रचना अभूदिति कथयितुं शक्यते । मनुयाज्ञवल्क्यस्मृत्योराधारेण नारदस्मृतेः रचना जातेति अनुमीयते । अत्र मनुस्मृतेः बहवः श्लोकाः प्राप्यन्ते । याज्ञवल्क्येन स्मृतिकारेषु नारदस्य नामोल्लेखो नैव विहितः । अत अनुमीयते यत् याज्ञवल्क्यस्मृतेरनन्तरमेव नारदस्मृतेः रचना संजाता। क्वचित् क्वचिदपि महाभारत-नारदस्मृतेः रचना संजाता । क्वचित् क्वचिदपि महाभारत-नारदस्मृत्योः श्लोकेषु साम्यं परिलक्ष्यते । अत उपर्युक्तविवेचनानुसारं स्पष्टं भवति यत् ख्री. १००तः ३००ख्री. मध्ये नारदस्मृतेः रचनाकाल इति ।

नारदस्य जन्मस्थानविषये सुदृढं किमपि प्रमाणं नैवावाप्यते । केचन मध्यप्रदेशीयः नेपालवास्तव्यश्चायं नारद इति कथयन्ति । परन्तु एतावत्पर्यन्तं विषयेऽस्मिन् कोऽपि निर्णयः न जातः । डा. भण्डारकरेण नारदस्य नाम ''पिशुन'' इत्युक्तम् । कौटिल्येन स्वकीयेऽर्थशास्त्रे मतमिदं समर्थितम् । पुराणेषु च नारदस्य परिचयः कलहकारीरूपेण वर्त्तते । परन्तु स्मृतीनां निर्णयावसरे तर्कोऽयं समीचीनः सुदृढश्च न भवति। भट्टोजीदीक्षितेन रघुनन्दनेन च स्वकीये ग्रन्थे ज्योतिर्नारद-बृहन्नारदयोश्चर्चा विहिता । निर्णयसिन्धौ तु लघुनारदस्य नामोल्लेखो

दृश्यते । विश्वरूप-मेधातिथि-विज्ञानेश्वर-स्मृतिचन्द्रिका-हेमाद्रि-माधवाचार्यादिभिः नारदस्मृतेरुल्लेखो विहितः ।

## कात्यायनः –

प्राचीनभारतीयव्यवहारविधौ नारद-बृहस्पति-कात्यायनादित्रिरत्नानां प्राधान्यं दृश्यते । मनुस्मृतेः सुप्रसिद्धटीकाकारः मेधातिथिरपि व्यवहारविचारदशायां कात्यायनं स्मरति । कात्यायनस्य यानि कानि चोद्धरणानि प्राप्यन्ते । तदनुसारं कात्यायनः बृहस्पति-नारदयोः मतानुयायी भवतीति ज्ञायते । बहुषु स्मृतिनिबन्धग्रन्थेषु कात्यायनस्य नाम प्राप्यते । क्वचित् क्वचिदपि भृगोः नाम विलिख्य कात्यायनेने श्लोकः लिखितः । कात्यायनोद्धृतानि यानि भृगुमतानि तानि क्वचिदुपलभ्यन्ते क्वचिच्च नोपलभ्यन्ते । मनोः नामानुसारं कात्यायनेन स्वग्रन्थे यानि उद्धरणानि गृहीतानि तान्यपि सम्प्रति मनुस्मृतौ अनुपलब्धानि भवन्ति ।

कात्यायनस्य व्यवहारसम्बन्धिवृतिरद्यापि नोपलभ्यते । कात्यायनेन स्त्रीधनस्य चर्चा सर्वत्र कृता । अध्यग्निक-अध्यवाहनिक-प्रीतिदत्त-अन्वाधेयसौदायिकादीनां स्त्रीधनानां चर्चा सर्वादौ विहिता । मनु-बृहस्पतिस्मृत्योः केचन श्लोकाः कात्यायनस्मृतौ अक्षर सः प्राप्यन्ते । ''वर्णानामानुलोम्येन दास्यं न प्रतिलोमतः'' इत्ययं श्लोकः याज्ञवल्क्यस्मृतौ कात्यायनस्मृतौ च प्राप्यते ।

कात्यायननानुसारं उग्रवादविवादानन्तरं यो निर्णयः प्रदीयते स ''पश्चात्कार'' इति कथ्यते । यदा प्रतिवादी स्वकीय अपराधं स्वीकरोति तदानीं यः निर्णयो दीयते तज्जयपत्रमिति कथ्यते । मनु-याज्ञवल्क्ययोरनन्तरमेव स्मृतिशास्त्रकारस्य कात्यायनस्य स्थानम् । विषयवस्तुनः विवेचनात् प्रतिपादनशैल्या च ज्ञायते यदयं कात्यायनः बृहस्पति - नारदयोः समकालिन इति गण्यते । तृतीयशताब्दी चतुर्थशताब्दी वा कात्यायनस्य समयो भवितुमर्हति । परन्तु डा. काणेमतानुसारं कात्यायनस्य समयः चतुर्थ-षष्ठशतकयोर्मध्यभागे भवति। जीवानन्दसग्रहे एका कात्यायनस्मृतिः संगृहीता प्रकाशिता च वर्त्तते । ५०० परिमितैः श्लोकैः अनुष्टुप् - इन्द्रवज्रादिच्छन्दोबद्धैः कर्मप्रदीपनाम्ना ग्रन्थोऽयं प्रसिद्धोऽस्ति । अस्य कर्मप्रदीपाख्यस्य व्यवहारशास्त्रस्य रचयिता कात्यायनो भवति नान्यः । केचन

कात्यायनस्येयं कृतिरथवा अपरस्य कस्यापीति सन्देहं कुर्वन्ति । विज्ञानेश्वर - अपरार्कौ कात्यायनस्य बहून् श्लोकान् उद्धृतवन्तौ । अत एकादशशतकात्प्रागेव ग्रन्थस्यास्य प्रामाणिकतां विद्वांस: स्वीकुर्वन्ति । सम्भवत: ग्रन्थोऽयं कात्यायस्येति केचन प्रतिपादयन्ति । ग्रन्थोऽयं बृहदाकारो भवेत् । यस्य केचनाशा: विलुप्ता: सन्ति ।।

स्वानुशीलनप्रश्नाः

१)योगीश्वरयाज्ञवल्क्य: कुत्रत्य: ?

उ:................................................... ।

२)कलौ कस्या: स्मृते: प्राधान्यम् ?

उ................................................... ।

## सारांश:

प्रियपाठका: ! अंशेऽस्मिन् स्मृतिसाहित्यस्योद्भव: क्रमविकासश्च प्रतिपादितोऽस्ति । स्मृतिशब्दार्थविचारस्तत्प्रामाण्यञ्चात्र विवेचितम् । स्मृतिकाराणां परिचयप्रदानावसरे स्मृतिकारेषु मनो: कथं प्राथम्यं तस्य प्राचीनताविषये बहूनामुदाहरणानां विचारोऽपि विहित: । याज्ञवल्क्य: चातुर्विद्यवादित्वेन कथं मनोरपेक्षयाऽर्वाचीन:, याज्ञवल्क्यस्मृते: सप्त टीकाकारास्तेषु च विश्वरूपस्य प्राथम्यं, आधुनिकदृष्टिकोणानुसारं विज्ञानेश्वरकृतमिताक्षरायाश्च प्राधान्यं वर्णितम् । युगानुसारं कथं स्मृतीनां प्राधान्यम्, कलौ युगे पराशरस्मृतेश्च महत्त्वम् । तस्याश्च टीकाकारा: प्रतिपादिता: । स्मृतिकारेषु व्यवहारविधौ कथं नारद-कात्यायनयो: प्रामुख्यमित्यपि समासेनात्र यथासाध्यं विवेचितम् ।

## पारिभाषिकशब्दा:

क) स्मृति: -धर्मशास्त्रम् (मन्वादिप्रणीता: स्मृतिग्रन्था: वा)

ख) उपोद्घात: - आमुखम्, उपक्रम: ।

ग) व्यवहार: - विवादपदम्, Case .

घ) समाह्वय: -प्राणिकरणिकाद्यूतक्रीड़ा(Betting on animals)

ङ) कृतयुगः - सत्ययुगः ।

च) पिशुनः - नारदः

छ) अनुलोमः- अनुक्रमः, Sucession.

ज) प्रतिलोमः - प्रतिकूलः, Hostile.

झ) प्रतिवादी - प्रत्यर्थी, Defendant.

ञ) जयपत्रम् - जयसूचकं पत्रम्, Record of Victory.

## निबन्धात्मकप्रश्नाः

१) स्मृतिसाहित्यस्योद्भवं विकासं च प्रतिपादयत ।।

२) मनोः प्राचीनतां प्रमाणीकुरुत ।।

३) ''कलौ पाराशरः स्मृतः'' इति शीर्षकमधिकृत्य निबन्धं लिखत ।।

## विश्लेषणात्मकप्रश्नाः

१) स्मृतिसाहित्यस्य कालं निरूपयत ।

२) योगीश्वरस्य देशकालनिरूपणं सप्रमाणं कुरुत ।

३) व्यवहारक्षेत्रेषु नारद-कात्यायनयोर्दानं प्रमाणयत ।

## लघुप्रश्नाः

१) स्मृतिशब्दार्थविचारं कुरुत ।

२) मनोः प्रशंसायां प्रमाणवचनानि लिखत ।

३) याज्ञवल्क्यस्मृतेष्टीकानां नामानि लिखत ।

४) मनुस्मृतेष्टीकाकाराणां नामानि स्पष्टयत ।

५) नारदस्य परचियं विशदयत ।

## एकाङ्कप्रश्नाः

१) स्मृतिकारेषु कः प्रथमः ?

२) मेघातिविकृतमनुस्मृतिटीकायाः नाम किम् ?

३) मन्वर्थमुक्ताबली कस्याः टीका: ?

४) योगीश्वरः कः ?

५) विज्ञानेश्वरकृतटीकायाः नाम किम् ?

६) दीपकलिका कस्य कृति: ?

७) मित्रमिश्रकृतयाज्ञवल्क्यस्मृतिटीकाया: नाम किम् ?

८) कलौ कस्या: स्मृते: प्राधान्यम् ?

९) माधवाचार्येण परशरस्मृतेरूपरि का टीका प्रस्तुता ?

१०)कर्मप्रदीप: कस्य कृति: ?

# एकाङ्कप्रश्नानामुत्तराणि

१) मनु: ।

२) मनुभाष्यम् ।

३) मनुस्मृते: ।

४) याज्ञवल्क्य: ।

५) मिताक्षरा ।

६) शूलपाणे: ।

७) वीरमित्रोदय: ।

८) पराशरस्मृते: ।

९) पराशरमाधवीयटीका ।

१०)कात्यायनस्य ।

# अंशः - अष्टमः

संरचना


८.१ .प्रस्तावना

८.२ .उद्देश्यम्

८.३. भाष्यसाहित्यस्योद्भवो विकासश्च

८.४. प्रमुखभाष्यकाराणां परिचयः


## ८.१.प्रस्तावना

धर्मशास्त्रसाहित्याकाशे भाष्यसाहित्यस्य योगदानमतीव महत्त्वपूर्णम् । धर्मशास्त्रसाहित्यस्य तृतीयः कालो भवति भाष्य-निबन्धयोः कालः । यः कालस्तु प्रायशः सप्तमशतकादेव प्रारब्धः । धर्मशास्त्रेषु भाष्यसाहित्यस्य कीदृशं स्थानम् ? तस्य उद्भवः क्रमविकासश्च कथं जातः ? कः भाष्यशब्दार्थः ? भाष्यस्य परिभाषा का ? भाष्यसाहित्ये केषां केषां धर्मशास्त्रविदां योगदानम् ? ते च के ? तेषां कः परिचयः ? चेत्येतत्सर्वं भाष्यसाहित्यस्येतिकर्त्तव्यताकलापः सर्वैरवश्यमेव ज्ञातव्यः । एतदर्थं सम्प्रति भाष्यसाहित्यविषये सम्यक् आलोच्यते ।

## ८.२ .उद्देश्यम्

प्रियपाठकाः ! अस्मिन् खण्डे भवन्तः अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- भाष्यशब्दं व्युत्पादयितुं प्रभवन्ति ।
- भाष्यशब्दार्थं ज्ञातुं शक्नुवन्ति ।
- धर्मशास्त्रे भाष्यस्य योगदानं ज्ञातुं प्रभवन्ति ।
- भाष्यसाहित्यस्य कालं ज्ञातुं प्रभवन्ति ।
- भाष्यसाहित्यस्य क्रमविकासं ज्ञातुं शक्नुवन्ति ।
- भाष्याणामावश्यकताविषये ज्ञातुं प्रभवन्ति ।
- भाष्यकाराणां परिचयमपि ज्ञातुं शक्नुवन्ति ।

## ८.३. भाष्यसाहित्यस्योद्भवो विकासश्च

कृत्स्नमपि धर्मशास्त्रसाहित्यं कालत्रयेणैव विभज्यते । प्रथमे काले धर्मसूत्राणि, मनुस्मृतिः, अन्ये प्रमुखाः स्मृतिग्रन्थाश्च समागच्छन्ति । कालोऽयं ख्री.पू. ६०० त आरभ्य एकसहस्रवर्षं यावत् परिव्याप्तो वर्त्तते । द्वितीये काले बहवो हि अनुष्टुप्छन्दोबद्धाः स्मृतिग्रन्थाः समागच्छन्ति । अयमेव कालः प्रथमशताब्दीतः आरभ्य ८०० ख्रीष्टाब्दं यावत् प्रचलितः । तृतीयश्च कालः धर्मशास्त्रभाष्य-निबन्धयोः कालो भवति । अयमेव कालः प्रायशः एकसहस्रसंवत्सरं यावत् प्रचलित आसीत् । प्रायशः सप्तमशतकादेवारभ्याष्टादशशतकं यावत् भाष्यसाहित्यस्य कालत्वेन स्वीक्रियते । अस्यैव कालस्य प्रथमे भागे प्रसिद्धाः भाष्यकाराः भाष्याणामुन्नतिं चक्रुः । अतोऽयं कालः भाष्यसाहित्यस्य सुवर्णयुग इत्युच्यते । स्मृतीनामुपरि भाष्यविरचनं भाष्यकालस्यान्तिमभागे एव जातमिति काणेमहाभागस्याशयः । भाष्यशब्दः नपुंसकलिङ्गे व्यवह्रीयते । भाष्यते विवृततया वर्ण्यते इति भाष्यम् । ''भाष्'' धातोः ''ण्यत्'' प्रत्यये कृते भाष्यशब्दो निष्पद्यते । भाष्यं नाम सूत्रविवरणग्रन्थ इति शब्दकल्पद्रुमे । तल्लाक्षणं यथा -

**सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः ।**
**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ।।**

इति लिङ्गादिसंग्रहटीकायां भरतः । सूत्रोक्तार्थप्रपञ्चकम् इति हेमचन्द्रः । धर्मशास्त्रान्तर्गतभाष्य-निबन्धसाहित्ययोः कालस्तु सप्तमशतकादारभ्योनविंशशतका- वधिपरिव्याप्तो वर्त्तते । स्मृतिसूत्रात्मकधर्मशास्त्रग्रन्थानां पठने यथा सर्वैः काठिन्यमनुभूतम्, तत्तद्ग्रन्थाध्ययने च जनानामावश्यकतादृष्ट्वा तदानीमेवासरं प्राप्य भारतस्य स्मृतिशास्त्रविदस्तत्त्वदर्शिनः महामनीषिणः विविधस्मृतिसूत्र-ग्रन्थानामुपरि विश्लेषणात्मकं भाष्यं कर्त्तुं चेष्टितवन्तः । भाष्यं भवति कस्याप्येकस्य श्लोकस्य सूत्रस्य वा बहूनां तद्विदां शास्त्रकाराणां मतपरिपोषणेन विश्लेषणात्मकार्थसम्पादनम् । टीका च भवति कस्याप्येकस्य श्लोकस्य गद्यभागस्य सूत्रस्य वा सान्वयव्याख्यापूर्वकं सरलार्थप्रतिपादनम् ।

धर्मशास्त्रस्य सूत्रस्मृति-भाष्य-निबन्धादिभागेषु यद्यपि भाष्यरचनायाः प्राधान्यं वरीवर्त्तते तथपि रचनेयं सप्तदशशतकादनन्तरं प्रारब्धेति भारतीयवृत्तौ । सप्ददशशतके नन्दपण्डितेन विष्णुधर्मसूत्रस्य वैजयन्तीटीका रचिता । या च टीका सुसमृद्धा बहुविचारयुक्ता चेति विदुषां मतम् । अस्यां टीकायां नन्दपण्डितस्य वैदुष्यं प्रकटितं भवति । द्वादशशताब्दयां भाष्यरचनायाः या धारा प्रचलतिाऽऽसीत् तत्रेयं प्रवृत्तिः विशेषरूपेण स्मृतिरचनानां धर्मसम्बन्धिसिद्धान्तानां च विचार-विश्लेषणार्थमुद्दिष्टाऽऽसीत् । तदानीं यानि भाष्याणि विरचितानि तानि तु धर्मशास्त्रभाष्यसाहित्यजगति अमूल्यनिधिस्वरूपाणीति नास्त्यत्र काचित् विप्रतिपत्तिः । विशेषरूपेण श्रुतिसाहित्यादनन्तरं कल्पसूत्राङ्गभूतस्य सूत्रसाहित्यस्य चर्चा प्रवरसूत्रादेव प्रारब्धा इति सायणाचार्यस्य मतम् । कल्पसूत्रे सन्ति यद्यपि बहूनि अङ्गसूत्राणि तथापि तेषु धर्मसूत्रस्य स्थानमन्यतममिति समालोचकानां मतम् । धर्मसूत्रेषु सर्वप्राचीनधर्मसूत्रत्वेन गौतमधर्मसूत्रं सुप्रख्यातम् । तत्र पञ्चटीकाः सन्ति । यथा- असहायस्य असहायटीका, भर्त्तृयज्ञस्य टीका, मस्कराचार्यस्य मस्करीटीका, हरदत्तस्य मिताक्षरा, पण्डितकुलमणिमिश्रस्य सूक्ष्मा चेति । आसु हरदत्तकृता मिताक्षरा यद्यपि मुख्यतमा काणेमहोदयस्य मतानुसारं तथापि सूक्ष्माकारेण प. कुलमणिमिश्रमहोदयेन बहुषु स्थलेषु हरदत्तस्य व्याख्यानमसमिचीनामिति खण्डितम् । हिरण्यकेशिधर्मसूत्रस्यापि महादेवकृतोज्वलाटीका प्रशस्ता वर्त्तते । तथैव वसिष्ठधर्मसूत्रस्य यज्ञस्वामि-कुलमणिमिश्रप्रमुखाः टीकाकाराः सन्ति । पण्डतकुलमणिमिश्रकृतवसिष्ठ-धर्मसूत्रटीकायाः नाम तत्त्वप्रकाशिका भवति । एवमेव प्रकारेण धर्मशास्त्रसाहित्याकाशे ये प्रमुखाः टीकाकाराः भवन्ति तेषु असहाय - भर्त्तृयज्ञ - विश्वरूप - भारुचि- श्रीकर - धारेश्वर - जितेन्द्रिय - बालक - बालरूप - योग्लोक - विज्ञानेश्वर - कामधेनु - हलायुध - भवदेवभट्ट - प्रकाश - पारिजात - हरदत्त - गोविन्दराज - कुल्लूकभट्टप्रभृतयः प्रमुखाः भवन्ति ।

धर्मशास्त्रे यद्यपि सामान्यरूपेण आचार-व्यवहार प्रायश्चित्ताख्याः विषयाः भवन्ति तथापि तदङ्गभूतत्वेन संस्कार-आचर-काल-व्यवहार - आशौच - प्रायश्चित्त - याग - होम - जपस्तप-व्रतोपवास - पञ्चमहायज्ञादीनां विषयाणां च सम्यक् व्यवस्थापनं सम्यगनवबोधानामर्थानामुद्घाटनं टीकाग्रन्थमाध्यमेन भवतीति टीकानां

महत्त्वं यद्यपि सर्वे टीकाग्रन्था: कस्यचित् सूत्रस्य स्मृतिग्रन्थस्य वा भाष्यं भवति, तथापि विज्ञानेश्वरकृतमिताक्षरायां कुल्लूकस्य मन्वर्थमुक्ताबल्याश्च स्वतन्त्ररूपेण मर्यादा वर्त्तते । वेदानुमापकतया धर्मशास्त्रस्य प्रामाण्ये सती धर्मानुकूला: न सर्वे विषया: स्वच्छन्दनया स्वतन्त्ररूपेण बोद्धुं शक्यन्ते । यदि टीकाग्रन्था: न स्युस्तर्हि तत्तद्गूढार्थानामवबोधनं नैव सम्भवेत् ।

निखिलेऽस्मिन् विरञ्चिप्रपञ्चे वेदनि:सृतानि यानि यानि शास्त्राणि भवन्ति तेषां समेषामेव भाष्याणि विराजन्ते । तद्वदेव धर्मशास्त्रस्य सूत्रस्मृत्यादीनां ग्रन्थानां भाष्यग्रन्था अपि सन्ति । परन्तु एषु केषाञ्चन ग्रन्थानां टीकासंज्ञात्वमपेरेषां भाष्यसंज्ञात्वमितरेषां च व्याख्यासंज्ञात्वं दृश्यते । तत्रादौ प्रमुखस्मृतिग्रन्थेषु मनुस्मृते: प्राधान्यं प्रायश: सर्वधर्मशास्त्रकारै: स्वीकृतत्वात् मनुस्मृतिमवलम्ब्य ये टीकाग्रन्था: सन्ति तेषां नामानि यथा १) मेधातिथे: मनुभाष्यम् २) गोविन्दराजस्य मनुटीका ३) कुल्लूकस्य मन्वर्थमुक्तावली, ४) सर्वज्ञनारायणस्य मन्वर्थनिबन्ध: ५) राघवानन्दसरस्वत्या: मन्वर्थचन्द्रिका, ६) नन्दस्य मनुव्याख्यानम्, ७) रामचन्द्रस्य मनुभावार्थचन्द्रिका, ८) मणिरामस्य मन्वर्थबोधिनी, ९) भारुचे: भारुचिटीका चेति । याज्ञवल्क्यस्मृतेरपि षट् भाष्याणि सन्ति । यथा- १) विश्वरूपस्य बालक्रीड़ा, २) विज्ञानेश्वरस्य मिताक्षरा ३) शूलपाणे: दीपकलिका, ४) अपरार्कस्य अपरार्कयाज्ञवल्क्यधर्मशास्त्रनिबन्ध:, ५) मित्रमिश्रस्य वीरमित्रोदय:, ६) बालंभट्टस्य बालंभट्टि चेति । पराशर स्मृतेरपि द्वे टीके वर्त्तेते । यथा - माधवाचार्यस्य पराशरमाधवीयटीका, नन्दपण्डितस्य च विद्वन्मनोहरा । नारदस्मृतेरूपरि असहायस्यापि एका टीका वर्त्तते । गौतमधर्मसूत्रोपरि पञ्चटीका: सन्ति । यथा- १) मस्कराचार्यस्य मस्करी, २) हरदत्तस्य मिताक्षरा, ३) पण्डितकुलमणिमिश्रस्य सूक्ष्मा, ४) भर्त्तृयज्ञस्य टीका, ५) असहायस्य असहायटीका चेति । बौधायनधर्मसूत्रस्य गोविन्दस्वामिकृतटीका विवरणटीकानाम्नी प्रसिद्धा । आपस्तम्बधर्मसूत्रस्य हरदत्तमिश्रकृता उज्वलानाम्नी टीका प्रसिद्धाऽस्ति । वसिष्ठधर्मसूत्रस्योपरि गोविन्दस्वामिनो भाष्यमस्तीति काणेमहोदयस्य मतम् । कुन्दनलालशर्ममहोदयेन तु वसिष्ठधर्मसूत्रस्य व्याख्याकारो यज्ञस्वामीति प्रपञ्चितम्, धर्मसूत्रस्यास्यापराऽप्येका व्याख्या विद्वन्मोदिनी

नाम्नी वर्त्तते यस्याः कर्त्ता भवति कृष्णपण्डितधर्माधिकारी । प. कुलमणिमिश्रस्यापि धर्मसूत्रस्यास्योपरि तत्त्वप्रकाशिका टीका वर्त्तते ।

एवमेव प्रकारेणोपर्युल्लिखित विषयाणामाधारेण ज्ञायते यत् धर्मशास्त्रे येषां स्मृतिग्रन्थानां सूत्रग्रन्थानां निबन्धग्रन्थानाञ्च टीका भाष्यं वा दृश्यते तत्र संज्ञया वैविध्यता दृश्यते । यथा- टीका, भाष्यं, व्याख्या, वृत्तिश्चेति ।

स्वानुशीलनप्रश्नाः

१)भाष्यशब्दस्य का व्युत्पत्तिः ?

उ.................................................

२)वसिष्ठधर्मसूत्रस्य कति टीकाः सन्ति ?

उ.................................................

.

## ८.४. प्रमुखभाष्यकाराणां परिचयः

धर्मशास्त्रान्तर्गतस्मृतिसूत्रग्रन्थानां भाष्यकाराः टीकाकाराः व्याख्याकाराः वृत्तिकाराश्च यद्यपि बहवः सन्ति तथापि तेषु विश्वरूप - मेधातिथि - शूलपाणि - नन्दपण्डित - विज्ञानेश्वर - कुल्लूक - अपरार्क - हरदत्तादीनां प्रामुख्यं प्राथम्यञ्च सर्वथा विद्यते । अतः क्रमशः एतेषां परिचयविषये सम्यगालोच्यते ।

### विश्वरूपः –

धर्मशास्त्रसाहित्याकाशे भाष्यकाराणां सुमहद् योगदानमस्ति । एषु भाष्यकारेषु प्रप्रथमो भवति विश्वरूपः । अनेन योगीश्वरकृतयाज्ञवल्क्यस्मृतेरूपरि ''बालक्रीड़ा'' नाम्नी टीका कृता । विज्ञानेश्वरेण मिताक्षरायां विश्वरूपभाष्यस्य चर्चा विहिता । आचार्य-शङ्करस्य शिष्यः सूरेश्वर एव विश्वरूप इति कथनं समीचीनमेव प्रतिभाति । तैत्तीरीयोपनिषद्भाष्यवार्त्तिके नैष्कर्म्यसिद्धौ च सुरेश्वरेण आत्मानम् आचार्यशङ्कर रूपेण प्रतिपादनं कृतम् । माधवाचार्येण सुरेश्वरस्य ग्रन्थादेवोद्धरणानि गृहीतानि, परन्तु ग्रन्थकर्त्तुः नाम ''विश्वरूप'' इति लिखितम् । आचार्यशङ्करस्य चत्त्वारः शिष्याः प्रसिद्धाः । ते च यथा- सुरेश्वरः, पद्मपादः, त्रोटकः, हस्तामलकश्चेति । अत सुरेश्वर एव विश्वरूपो

भवति । विषयेऽस्मिन् चर्चा श्रीमता रामतीर्थेण ''मानसोल्लास'' नामके ग्रन्थे कृता । गुरुवंशकाव्यमपि यः सुरेश्वर स एव विश्वरूप इति दृढ़ं प्रतिपादयति । एतेन सिद्धं भवति यत् आचार्यशङ्करस्य आचार्यकुमारिलस्य च शिष्योऽयं विश्वरूप इति । गुरुवंशकाव्येऽपि सुरेश्वर आचार्यशङ्कर-कुमारिलयोः शिष्य इति लिखितमस्ति । आचार्यशङ्करस्य कालः ख्री० ७८८-८२० ख्रीष्टब्दं यावत् । एवंप्रकारेण ८२० ख्रीष्टाब्दं यावत् विश्वरूपस्य प्रसिद्धिरासीत् । अतोऽस्य समयः ८००-८५० ख्रीष्टाब्दमध्ये भवितुमर्हतीति ज्ञायते ।

शङ्कराचार्यस्य शिष्यपरम्परायां विश्वरूपस्य नाम सुप्रसिद्धमस्ति । अस्य भाष्यकरणशैली सरला शक्तिशालिनी च । अस्मिन् भाष्येऽपि श्रीशङ्कराचार्यस्य प्रभावः नूनमेव पतितः । विश्वरूपेण स्वव्याख्यायां वेदोपनिषद्-पारस्कर-भरद्वाज-आश्वलायनादीनां नामानि उद्धृतानि । अत्रि-आपस्तम्ब-अङ्गिरा-उशना-कात्यायन-काश्यप-गार्ग्य-वृद्धगार्ग्यगौतम-जातुकर्ण-दक्ष-नारद-पराशर-पारस्कर-पितामह-मनु-भृगु-वृद्धमनु-बौधायन-याज्ञवल्क्य-बृहस्पति-पैठीनसि-पुलस्त्य-भरद्वाज-यम-वृद्धयाज्ञवल्क्य-विष्णु-शङ्ख-व्यास-वसिष्ठ-शातातप-शौनक-संवर्त-स्वायम्भूमनु-सुमन्तु-हारीतप्रभृतीनां स्मृतिकाराणां वचनान्यपि विश्वरूपेण स्वभाष्ये संगृहीतानि ।

पूर्वमीमांसायां विश्वरूपस्य महती योग्यताऽऽसित् । मीमांसार्थमनेन ''न्याय'' शब्दस्य प्रयोगो विहितः । बहवः श्लोकाः कारिकारूपेणोद्धृता अनेनापि । एताः कारिकाः विश्वरूपेण स्वयमेव विरचिताः । कारिकानामुपस्थापने नूनमेव आचार्यकुमारिलस्य प्रभावः पतितो भवेत् । पूर्वमीमांसा-अद्वैतवेदान्तयोरद्भूतसमन्वयः विश्वरूपव्याख्यायामेव परिलक्षितो भवति । विश्वरूपेण आचार्यशङ्करस्य मोक्षस्य कारणं ज्ञानं, संसारस्य कारणं अविद्या च भवतीति स्वीकृतम् । कुमारिलस्य श्लोकवार्त्तिकादपि विश्वरूपेण उद्धरणानि गृहीतानि । दायभाग-व्यवहारमातृका-स्मृतिचन्द्रिका-हारलता-सरस्वतीविलास- प्रभृतिषु ग्रन्थेषु विश्वरूपमतानां चर्चा वर्त्तते । मिताक्षरायाः लेखनसमये विज्ञानेश्वरेण विश्वरूपः प्रामाणिकभाष्यकाररूपेण स्वीकृतः ।

# मेधातिथि :-

भाष्यकारेषु मेधातिथेः स्थानमन्यतममस्ति । मनुस्मृतेः बहुषु भाष्येषु अपि मेधातिथिकृतभाष्यं प्रथमं प्रधानञ्च । बुहलरमतानुसारं ज्ञायते यदयं मेधातिथिः कश्मीरवास्तव्य इति ।

मनुस्मृतिभाष्ये मेधातिथिना गौतम-बौधायन-आपस्तम्ब-वसिष्ठ-विष्णु-शङ्ख-मनु-याज्ञवल्क्य-कात्यायन-पराशर-नारद-बृहस्पति-उशना-चाणक्य-जैमिनिप्रभृतीनां नामानि उद्धृतानि । कौटिल्यार्थशास्त्रस्य प्रभावः मेधातिथेः भाष्योपरि पतित इति स्पष्टं ज्ञायते । अनेन पुराणादपि उद्धरणानि संगृहीतानि । आर्यसमाजस्य यच्चित्रणं मेधातिथिभाष्यात् प्राप्यते, वस्तुतः तदेव चित्रणमुल्लेखनीयं भवति ।

विश्वरूपापेक्षया मेधातिथिभाष्ये मीमांसा अद्वैतवेदान्तयोः अद्भूतसमन्वयः दृश्यते । मेधातिथिकृतमनुस्मृतिभाष्यस्य नाम ''मनुभाष्यम्'' इति । अत्र शङ्कराचार्यकृतशारीरिकभाष्यस्य चर्च्चा मेधातिथिना कृता ।

जैमिनिकृतसूत्राणामपि उल्लेखः भाष्येऽस्मिन् प्राप्यते । यद्यपि मेधातिथिना जैमिनि-शङ्कराचार्ययोः मतं स्वीकृत्य स्वग्रन्थे प्रतिपादितं, तथापि तेषां तेषां मतानां साक्षादुल्लेख अनेन नैव विहितः, अपितु स्वभाषया स्वशैल्या च प्रतिपादितः । अनेन मोक्षार्थं ज्ञानकर्मणोः द्वयोरेव आवश्यकता वर्त्तत इति सुस्पष्टं प्रतिपादितम् ।

मेधातिथेरपि अपरा एका कृतिरस्ति, यस्याः नाम भवति ''स्मृतिविवेकः'' । अस्मादेवानेन उद्धरणानि संगृह्य मनुस्मृतिव्याख्यायां लिखितानि । स्मृतिविवेकस्य रचना श्लोकाकारेण जाता । पराशरमाधवीये तिथिनिर्णयेषु च मिधातिथेः स्मृतिविवेकस्थ-श्लोकानामुद्धरणं प्राप्यते ।

विज्ञानेश्वरेण मिताक्षरायां मेधातिथिः प्रामाणिकभाष्यकारत्वेन गृहीतः । अतः मिताक्षरापेक्षया मेधातिथिः प्राचीनः । पूर्वमीमांसया मेधातिथिः प्रभावित इति विज्ञायते । आचार्यकुमारिलभट्टस्य चर्चातः ज्ञायते यत् मेधातिथेरपेक्षया कुमारिलः प्राचीन इति । मनुस्मृतेः प्रख्यातभाष्यकारेण श्रीमता कुल्लूकेनापि मेधातिथिः गोविन्दराजापेक्षया (ख्री० १०५०-११००) पूर्ववर्त्तीति मन्यते । अतः मेधातिथेः समयः ८२० ख्रीष्टाब्दात् १००० ख्रीष्टाब्दमध्ये एव भवितुमर्हति ।

# शूलपाणि: –

वङ्गीयधर्मशास्त्रसाहित्याकाशे प्रख्यातस्य ''धर्मरत्न'' नामकस्य ग्रन्थस्य कर्त्तु: श्रीमतो जीमूतवाहनस्यानन्तरं शूलपाणि: सुप्रसिद्धधर्मनिबन्धकाररूपेण सुपरिचितो वर्त्तते । न केवलमयं शूलपाणि: धर्मनिबन्धकार:, अपितु योगीश्वरयाज्ञवल्क्यकृतस्मृते: सुप्रसिद्धभाष्यकारत्वेन परिचितोऽस्ति । तत्कृतभाष्यस्य नाम ''दीपकलिका:'' । इयं दीपकलिका शूलपाणे: प्रथमा कृतिरस्ति । यद्यपि इयमाकारदृष्ट्या लघ्वी, तथापि प्रायश: याज्ञवल्क्यस्मृतिभाष्येषु प्रसिद्धाऽस्ति । अस्यामेव दीपकलिकायां लक्ष्मीधर-गोविन्दराज-मिताक्षरा-विश्वरूपादीनां नामोल्लेखो दृश्यते । शूलपाणिना बहवो हि ग्रन्था विरचिता:, परन्तु एतेभ्यो ग्रन्थेभ्य केचन ग्रन्था धर्मशास्त्रसम्बन्धव्यतिरिक्ताऽपि भवन्ति । ''स्मृतिविवेक'' नाम्ना एक: बृहत् स्मृतिनिबन्धग्रन्थो विरचित: । अत्र बहव: प्रविभागा: सन्ति । यथा - एकादशीविवेक:, तिथिविवेक:, दत्तक विवेक:, दुर्गोत्सवविवेक:, यात्राविवेक:, प्रतिष्ठाविवेक:, प्रायश्चित्तविवेक:, रासयात्राविवेक:, व्रतकालविवेक:, शुद्धिविवेक:, श्राद्धविवेक:, संक्रान्तिविवेक:, सम्बन्धविवेकश्चेति । श्राद्धविवेकस्य प्रसिद्धि: सर्वत्रैव विद्यते । अस्यैव श्राद्धविवेकस्योपरि बहूनि भाष्याणि अभवन् । श्रीनाथाचार्यचूड़ामणि-गोविन्दानन्दादीनां भाष्यकाराणां प्रसिद्धि: वर्त्तते । एषु सर्वेषु प्राचीन-निबन्धॄणां नामानि दृश्यन्ते ।

शूलपाणे: वयक्तिवेतिहासविषये किमपि प्रमाणं नोपलभ्यते । परन्तु साहुड़ियालमहामहोपाध्यायरूपेणोल्लेख: स्वग्रन्थे शूलपाणिना कृत: । बल्लालसेनस्य शाशनकाले वङ्गदेशे साहिुड़ियालब्राह्मणानां राढ़ीय ब्राह्मणरूपेण ख्याति: आसीत् । शूलपाणे: समयनिर्धारणं कष्टसाध्यम् । यतो हि विषयेस्मिन् किमपि सुदृढ़ं प्रमाणं नोपलभ्यते । अनेन चण्डेश्वरवृकत- स्मृतिरत्नाकरस्य कालमाधवीयस्य चोल्लोख: कृत: । अत एवास्य समय: १३७५ ख्रीष्टाब्दो भवितुमर्हतीति अनुमन्यते । अस्यापि नामोल्लेख: रुद्रधर-गोविन्दराज-वाचस्पतिप्रभृतिभि: कृत: । अत एव १४६० ख्रीष्टसंवत्सरात्पूर्वमेव शूलपाणे: समयो भवितुमर्हतीति काणेमहाभागानामभिमतम् ।

## नन्दपण्डितः –

धर्मशास्त्रीयभाष्यनिबन्धसाहित्याकाशे श्रीमतो नन्दपण्डितस्य प्रख्यातिः सर्वजनविदितो वर्त्तते । अयं दक्षिणभारतीयः स्मृतिपण्डितः । परन्तु परवर्त्तिकाले काशीस्थविद्वद्भिः प्रभावितो भूत्वा काशीमागतवान् । अत्रापि तेषां विदुषां प्रभावेन प्रेरितो भूत्वा बहवो ग्रन्थास्तेन विरचिताः । विज्ञानेश्वरकृतमिताक्षरायारुपरि प्रमीताक्षरा वा प्रतीताक्षरानाम्नी एका संक्षिप्तटीका अनेन विहिता । स्वाश्रयदातुः मर्दुरानिवासिकेशवनायकस्याग्रहेण विष्णुधर्मसूत्रस्योपरि केशववैजयन्तीनाम्नी टीका कृता । अस्यां टीकायां नन्दपण्डितकृतग्रन्थानां नामोल्लेखः प्राप्यते । यथा- श्राद्ध-कल्पलता, शुद्धिचन्द्रिका, दत्तकमीमांसा, प्रमीताक्षरा, विद्वन्मनोहरा चेति । विद्वन्मनोहरा तु पराशरस्मृतेः एका सुप्रसिद्धटीका । शुद्धिचन्द्रिकायां केशववैजयन्तीटीकायाञ्च श्राद्धकल्पलतायाश्चर्चाऽनेन विहिता । ग्रन्थोऽयं सहारनपुरस्थसहगलकुलोद्भवपरमानन्दस्य प्रेरणया नन्दपण्डितेन विरचितः । अस्य पराशरस्मृतिटीकाविद्वन्मनोहरायारुपरि माधवाचार्यस्य पूर्णप्रभावः प्रतितः । स्मृतिनामुपरि स्मृतिसिन्धुनामकनिबन्धग्रन्थोऽपि अनेन विरचितः । यस्योपरि स्वयं तत्त्वमुक्ताबलीनाम्नी टीका प्रस्तुता । दत्तकमीमांसायां नन्दपण्डितस्य प्रगाढपाण्डित्यप्रकर्षो द्योतितो भवति । एतत्कृतकेशववैजयन्ती कृतिषु सर्वान्तिमा भवतीत्यनुमीयते । वैजयन्त्याः रचना १६२३ तमे ख्रीष्टाब्दे वाराणस्यामभूत् । अतः नन्दपण्डितस्य रचनाकालः १५९५-१६३० ख्रीष्टाब्दं यावद् भवितुमर्हति।

## विज्ञानेश्वरः –

विदितमेव तत्र भवतां धर्मशास्त्रमर्मज्ञानां यत् धर्मशास्त्रभाष्यसाहित्याकाशे श्रीपरमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्य महद्वैशिष्ट्यं वरीवर्त्तन इति । अनेन याज्ञवल्क्यस्मृतेरूपरि मिताक्षरानाम्नी टीका कृता । मिताक्षरायामेव विज्ञानेश्वरस्य विद्वत्प्रतिया प्रदर्शिताऽस्ति । इयं मिताक्षरा प्रायशः टीकासु मूर्द्धन्यभूता । यथा व्याकरणे पतञ्जलिमहाभाष्यम्, साहित्ये मम्मट्टाचार्यकृतकाव्यप्रका-शस्तथेयं मिताक्षराः धर्मशास्त्रीयभाष्यसाहित्यक्षेत्रे प्रमुखतमा । न

केवलमियं मिताक्षरा याज्ञवल्क्यस्मृतेः टीका, अपितु एकः स्वतन्त्रः भाष्यनिबन्धग्रन्थः । क्वचित् क्वचित् मिताक्षरा ऋजुमिताक्षरानाम्ना अपि सुपरिचिता । विज्ञानेश्वरेण मिताक्षरायां द्विसहस्रवर्षात्प्राग्प्रचलितानां मतानां सारतत्त्वं गृहीतम् ।

अधुना यः Hindu Law विद्यते, तत्र भागद्वयमस्ति - मिताक्षराभागः, जीमूतवाहनदाय-भागश्चेति । परन्तु तत्र मिताक्षरायाः एव प्राधान्यं दृश्यते । यतो हि कृत्स्नेऽपि भारते जनाः मिताक्षरामनुसरन्ति । केवलमात्रं वङ्गप्रान्ते जीमूतवाहनकृतदायभागस्य प्रचलनं दृश्यते ।

विज्ञानेश्वरकृतमिताक्षरा स्मृतिशास्त्राणामनेकेषां सारसंग्रहभूता । तदीया विषयव्यवस्था मीमांसा- शास्त्रपरिशीलनप्रपञ्चिता परमतखण्डन-स्वमतोपस्थापनपूर्विका तात्त्विकविवेचनपूर्णा बहुधर्मशास्त्रभाष्यनिबन्ध-समर्थिता प्रामाणिकी चास्ति । मिताक्षरायाम् अङ्गिरःप्रभृतीनाम-शीत्यधिक- स्मृतिकर्त्तृणां नामान्युपलभ्यन्ते । धर्मशास्त्रग्रन्थान् विहाय एव काठक-बृहदारण्यकोपनिषद्-गर्भोपनिषद्-जावालोपनिषद्-निरुक्त-भरतमुनि-योगसूत्र-पाणिनि-सुश्रुत-स्कन्दपुराण-विष्णुपुराण-अमरगुरुप्रभृतीनां नामान्यपि बहुशो दृश्यन्ते ।

विज्ञानोश्वरेण भाष्यान्ते आत्मनः नाम विज्ञानयोगीति लिखितम् । तत्त्वविज्ञाननाथस्य विज्ञानेश्वरस्य मिताक्षरायाः व्यवहाराध्याये बहूनां व्यवहाराणां चर्चा दृश्यते । तत्र च दायभामस्य प्रमुखं वैशिष्ट्यम् । भाष्यनिबन्धकारः मित्रमिश्रः प्रकारान्तरेण मिताक्षरामतं स्वीकरोति । परन्तु विज्ञानेश्वर-जीमूतवाहनयोः स्थलविशेषेषु प्रायशः मतवैषम्यं परिलक्ष्यते, परन्तु प्रामाणिकत्वेन विज्ञानेश्वरमतमेव सामीचीनं प्रतिभाति ।

विज्ञानेश्वरोऽयं श्रीभारद्वाजपद्मनाभभट्टोपाध्यायस्य सुपुत्रः आसीत् । अयं परमहंसस्य उत्तमः शिष्यः । यथा अनेन मिताक्षरायाः रचना विहिता तदानीं कल्याणनगर्यां विक्रमादित्यदेवः शाशनं कृतवान् । विज्ञानेश्वरविषये मिताक्षरोपसंहारे उल्लेखदर्शनात् नृपविक्रमादित्यकालि-नत्वं स्फुटं भवति । तत्र कल्याणपुरमिति नाम्ना प्रसिद्धं नागरमस्त्यधुना हैदरावादप्रान्ते कल्याणकीर्त्तिनाम्ना प्रथितम् । अयं दाक्षिणात्यः ।

मिताक्षरायां विश्वरूप-मेधातिथि-धारेश्वरादीनां नामानि वर्त्तन्ते । अतः मिताक्षरायाः रचनाकालः १०५० ख्रीष्टसंवत्सरादनन्तरं भवितुमर्हति । देवणभट्टस्य स्मृतिचन्द्रिकायाः रचना १२००

ख्रीष्टसंवत्सरेऽभूत् । अनेन मिताक्षराकृतसिद्धान्तानां विचारो विहितः । लक्ष्मीधरस्य कल्पतरौ (११००-११३० ख्री०) विज्ञानेश्वर नाम प्राप्यते, तदनुसारं मिताक्षरायाः समयः ११०० ख्रीष्टसंवत्सरात्प्रागेव भवितुमर्हति । डा० काणेमहोदयस्य मतानुसारं मिताक्षरायाः समयः १०७०-१११५ ख्रीष्टाब्दमध्यभागे भवितुमर्हति ।

## कुल्लूकभट्टः –

सुप्रसिद्धस्मृतिग्रन्थस्य मनुस्मृतेः भाष्यकारत्वेन विद्वच्छेखरस्य कुल्लूकभट्टस्य ख्यातिः सर्वजनविदितोऽस्ति । एतत्कृतमनुस्मृतिभाष्यस्य नाम मन्वर्थमुक्तावली । अत्र संक्षिप्ता सारगर्भिका च भाषाशैली निहिताऽस्ति । यद्यपि मनुस्मृतेः बहवो भाष्यकारास्तेषां च बहूनि भाष्याणि सन्ति तथापि तेषु कुल्लूककृतभाष्यं प्रधानं प्रामाणिकञ्च प्रतिभाति । मेधातिथि गोविन्दराजकृतयोः द्वयोरेव भाष्ययोः सम्पूर्णः प्रभावः कुल्लूककृतमन्वर्थमुक्ताबलेरुपरि पतित इति ज्ञायते । अनेन स्थलविशेषेषु अनयोः भाष्ययोश्चर्चा विहिता, मन्वर्थमुक्ताबलीं विहाय ''स्मृतिसागर'' नामकस्य स्मृतिनिबन्धग्रन्थस्य प्रणेताऽपि अयं कुल्लूको भवति । स्मृतिसागरस्य त्रयः भागाः सन्ति । यथा- अशौचसागरः, विवादसागरः, श्राद्धसागरश्चेति । दौर्भाग्यात् श्राद्धसागरस्य बहवो हि अंशाः सम्प्रति नोपलभ्यन्ते । स्मृतिसागरे कुल्लूकेन बहूनां प्रामाणिकतथ्यानां संग्रहो विहितः । अत्रापि तेन विविधप्राचीनग्रन्थानां नामानि तेषां स्मृतिवचनानि चोद्धृतानि । हलायुध-भोजदेव-कामधेनु-शङ्खधर-मेधातिथिप्रभृतीनां भाष्यनिबन्धकाराणां चर्चा स्मृतिसागरे प्राप्यते ।

कुल्लूकभट्टोऽयं गौड़देशस्य (आधुनिकवङ्गस्य) नन्दनग्रामनिवासी आसीत् । अस्य पितुर्नाम दिवाकर भट्टो भवति । एतत्कृतटीकायाः मङ्गलश्लोकादेव ज्ञायते यत् काश्यामेव स्थित्वा विदुषां हिताय कुल्लूकेन मन्वर्थमुक्ताबली विरचिता । अस्य पिता सुयोग्यविद्वान् आसीत् । कुल्लूकेन श्राद्धसागरे लिखितं यत् स्वपितृचरणानामादेशेनैव खण्डत्रयेण स्मृतिसागरः विरचित इति । अयं मीमांसा-न्याय-वेदान्त-व्याकरणादिशास्त्रेष्वपि पारदर्शितामर्ज्जितवान् । अस्य विद्ववत्तायाः सम्पूर्णः परिप्रकाशः मन्वर्थमुक्ताबल्यामेव जातः ।

कुल्लूकभट्टस्य कालः मेधातिथि-भोजदेव-गोविन्दराज-धरणीधर-भास्कर (वेदान्तसूत्रभाष्यकारः)-वामनः(काशिकायाः लेखकः) - विश्वरूपादीनामनन्तरं भवितुमर्हति, यतो ह्यनेन एतेषां चर्चा स्वटीकायां

कृता । अनेन कल्पतरु हलायुधयोश्चर्चा विहिता, अतोऽस्य कालः ११५० ख्रीष्टसंवत्सरादनन्तरमेव भवितुं शक्नोति । वर्धमान-रघुनन्दनौ कुल्लूकस्य चर्चां स्वस्वग्रन्थे कुरुतः, अतः १३५० ख्रीष्टसंवत्सरात् पूर्वमपि तत्कृतटीकायाः लोकप्रियताऽऽसीत् इति ज्ञायते । उपर्युक्तविवेचनानुसारं कथयितुं शक्यते यत् त्रयोदशशतकस्योत्तरार्द्धे चतुर्दशशतकस्य पूर्वार्द्धे वा कुल्लूकस्य रचनाकालो भवितु-मर्हतीति ।

# अपरार्कः –

याज्ञवल्क्यस्मृतेः सुप्रसिद्धभाष्यकारत्वेन अपरार्कः अन्यतमः । अपरार्कस्यापरं नाम अपरादित्यः । भाष्यकारेषु अस्य प्रसिद्धिः प्रतिभा च समग्रेऽस्मिन् देशे विकशिताऽभूत् । एतत्कृतयाज्ञवल्क्यस्मृतिभाष्यस्य नाम ''अपरार्कयाज्ञवल्क्यधर्मशास्त्रनिबन्धः'' इति । यद्यपि एतदीयं भाष्यं भाष्यग्रन्थेषु अन्तर्भवति तथापि अयमेकः स्वतन्त्रः स्मृतिनिबन्धग्रन्थ इति कथनं कदापि अनौचित्यं न भवेत् । अतः भाष्य-निबन्धयोर्मध्ये विशेषभेदाभावात् अपरार्केण स्वभाष्यस्य नाम अपरार्कयाज्ञवल्क्यध-र्मशास्त्रनिबन्ध इति प्रदत्तम् ।

जीमूतवाहनस्य वंशे शिलाहारराजकुमारस्य नाम अपरादित्येदेव आसीत् । शिलाहाराभिलेखानुसारं ज्ञायते यत् जीमुतवाहनवंशजानां राज्यत्रयमासीत् । यथा उत्तरकोङ्कणः, दक्षिणकोङ्कणः, कुल्हालपुरञ्चेति । डा० काणेमहोदयानां मतानुसारम् अपरार्कः उत्तरकोङ्कणे शिलाहारे अपरादित्यदेवनाम्ना प्रथितः आसीत् । स्वकीये भाष्यग्रन्थे अपरादित्येन यः उपाधिः लिखितः साक्षात् तद्वदेव शिलालेखेष्वपि प्राप्यते ।

मिताक्षरा-अपरार्कयोर्मध्ये बहुत्र साम्यं दृश्यते । अपरार्केण वेदेभ्यः पुराणेभ्यः कोशग्रन्थेभ्यश्च प्रमाणवचनानि संगृह्य भाष्यं कृतम् । मिताक्षरायामपि तद्वदेव सुदीर्घोद्धरणानि प्राप्यन्ते । तार्किकदृष्टिकोणानुसारं मिताक्षरायां विद्वत्पूर्णाभिव्यक्तिः परिलक्षिता भवति । गौतम-वसिष्ठधर्मसूत्रेभ्योऽपि प्रमाणवचनानि गृहीतानि अपरार्केण । शंकराचार्य-कुमारिलयोश्चर्चाऽपि अनेन विहिता, परन्तु महत आश्चर्यस्य विषयोऽयं यत् पूर्ववर्त्तीनां भाष्यकाराणां निबन्धकाराणाञ्च नामान्यनेन कुत्रापि नैव लिखितानि ।

अभिलेखानामाधारेण अपरार्कस्य कालः एकादशशतकादनन्तरमेव निर्णयितुं शक्यते । मङ्खकृत ''श्रीकण्ठचरित'' नामके ग्रन्थे वर्णितमस्ति

यत् कोङ्कणनरेश अपरादित्यदेवः तेजकण्ठं काश्मीरनृपतेः जयसिंहस्य राजसभां प्रति दूतरूपेण प्रेषितवान् । अतः सम्भाव्यते यत् काश्मीरराजसभायाः विद्वत्परिषदि तेजकण्ठः अपरार्कटीकां प्रस्तुतवान् । ततः प्रभृति काश्मीरदेशे अपरार्कभाष्यस्य प्रसिद्धिः संजाता । अद्यापि काश्मीरवास्तव्याः अपरार्कभाष्यं प्रामाणिकत्वेन स्वीकुर्वन्ति । एतेन स्पष्टं भवति यत् अपरार्कभाष्यस्य समयः द्वादशशतकस्य प्रथमार्धभाग एव भवितुमर्हति ।

स्वानुशीलनप्रश्नाः

१)याज्ञवल्क्यस्मृतिभाष्यकारेषु कः प्रप्रथमः ?

उ.....................................................

२)नन्दपण्डितकृतविष्णुधर्मसूत्रटीकायाः नाम किम् ?

उ .......................................................

## सारांशः

प्रियपाठकाः अंशेऽस्मिन् धर्मशास्त्रसाहित्येषु भाष्यसाहित्यस्य कीदृशं योगदानमिति सविस्तरं प्रतिपादितम् । कस्तावत् भाष्यशब्दार्थः, तस्य व्युत्पत्तिः, भाष्यनिबन्धयीश्च भेदोऽपि प्रतिपादितः । भाष्यसाहित्यस्य कालविषयेऽपि चर्चा विहिता । भाष्यसाहित्यस्य धर्मशास्त्रक्षेत्रे क्रमिकविकासः कथमभूदित्यपि यथायथं निर्णीतम् । मनुस्मृतेः, याज्ञवल्क्यस्मृतेः, पराशरस्मृतेः, वसिष्ठधर्मसूत्रस्य, गौतमादिधर्मसूत्रस्य च के के भाष्यकाराः सन्ति । तेषां विरचितभाष्याणां टीकानां वा नाम किमस्तीत्यस्मिन् विषयेऽपि विचारो विहितः तेषु भाष्यकारेषु के प्रमुखाः भवन्ति ? तेषां परिचयविषयेऽपि विमर्शः कृतः । विशेषतः विश्वरूप-मेधातिथि - शूलपाणि- नन्दपण्डित - विज्ञानेश्वर - कुल्लूक - अपरार्कादीनां भाष्यनिबन्धकाराणामुपरि विस्तृतविवेचनमत्र विहितम् ।

## पारिभाषिकशब्दाः

१) भाष्यम् - Commentary, सुत्रार्थव्याख्यानविशेषः ।

२) टीका - Commentary, विवृत्तिः, व्याख्यानम् ।

३) व्याख्या - Commentary, Exposition, विवरणात्मकम् ।

४) पूर्वमीमांसा - जैमिनिदर्शनम् ।

५) कुमारिल: - श्लोकवार्त्तिककार: ।

६) साहुड़ियाल - वङ्गदेशीयब्राह्मणसंज्ञाविशेष: ।

७) राढ़ीय: - राढ़देशोद्भव:, Belonging to the western part of Bengal.

८) महामहोपाध्याय: - उपाधिविशेष: ।

९) गौड़देश: - वङ्गदेश: ।

१०)अभिलेख: - शिलालेख: ।

## निबन्धात्मकप्रश्ना:

१) धर्मशास्त्रे भाष्यसाहित्यस्योद्भवं विकासञ्च प्रतिपादयत ।।

२) भाष्यकारेषु विज्ञानेश्वरस्य महत्त्वं वर्णयत ।।

३) अपरार्कस्य देशकालनिरूपणं कुरुत ।।

## विश्लेषणात्मकप्रश्ना:

क) धर्मशास्त्रेषु भाष्यसाहित्यस्य कालं प्रमाणयत ।

ख) प्राचीनतमभाष्यकारत्वेन विश्वरूपस्य परिचयं स्पष्टयत ।

ग) नन्दपण्डितस्य परिचयं लिखत ।

## लघुप्रश्ना:

क) भाष्यशब्दस्यार्थं व्युत्पत्तिञ्च लिखत ।

ख) मनुस्मृतिभाष्यकाराणां नामानि लिखत ।

ग) याज्ञवल्क्यस्मृतिभाष्याणां नामानि प्रतिपादयत ।

घ) गौतमधर्मसूत्रस्य भाष्य-भाष्यकाराणां नामानि स्पष्टयत ।

ङ) नन्दपण्डितस्य कृतीनां परिचयं लिखत ।

## एकाङ्कप्रश्ना:

१) आचार्यशङ्करस्य के चत्त्वार: शिष्या: ?

२) सुरेश्वर इति कस्य नामान्तरम् ?

३) मेधातिथिः कुत्रत्यः ?

४) दीपकलिका कस्य कृतिः ?

५) साहुड़ियालमहामहोपाध्यायः कः ?

६) केशववैजयन्तीटीका कस्य ग्रन्थस्य ?

७) मिताक्षरोपरि प्रमीताक्षरा प्रतीताक्षरा वार केन विहिता ?

८) विज्ञानयोगी कः ?

९) स्मृतिसागरः केन विरचितः ?

१०)अपरादित्य इति कस्य नामान्तरम् ?

## एकाङ्कप्रश्नानामुत्तराणि

१) सूरेश्वरः, पद्मपादः, त्रोटकः, हस्तामलकश्च ।

२) विश्वरूपस्य ।

३) काश्मीरवास्तव्यः ।

४) शूलपाणेः ।

५) शुलपाणिः ।

६) विष्णुधर्मसूत्रस्य ।

७) नन्दपण्डितेन ।

८) विज्ञानेश्वरः ।

९) कुल्लूकेन ।

१०)अपरार्कस्य ।

# अंश: - नवम:

संरचना


९.१. प्रस्तावना

९.२. उद्देश्यम्

९.३ .स्मृतिनिबन्धसाहित्यस्योद्भवो विकासश्च

९.४ .प्रमुखस्मृतिनिबन्धॄणां परिचय:


## ९.१. प्रस्तावना

धर्मशास्त्रसाहित्यक्षेत्रे स्मृतिनिबन्धॄणां योगदानमतीव महत्त्वपूर्णम् । सूत्र-स्मृति-भाष्यणामनन्तरं निबन्धसाहित्यस्य स्थानम् । स्मृतिनिबन्धार: विभिन्नेभ्य: प्रामाणिकग्रन्थेभ्य: प्रमाणवचनानि संगृह्य सूत्र-स्मृतिभाष्यकाराणां वचनं सम्यक् विचार्य च यथायथं परमतखण्डनपूर्वकं सयुक्तिकं स्वाभिमतंमुपस्थापयन्ति । एषु स्मृतिनिबन्धॄषु केचन दाक्षिणात्या:, अपरे केचन महाराष्ट्रिया:, अन्ये वङ्गीया:, परे मैथिला:, इतरे च उत्कलीया: स्मृतिनिबन्धार: भवन्ति । अस्यैव स्मृतिनिबन्धसाहित्यस्य उद्भवो विकासश्च कथं संजात: ? कश्च तस्य काल: ? तत्र के तावत् प्रमुखस्मृतिबन्धार इत्यवश्यमेव ज्ञातव्यम् । एतदर्थमेवास्याध्यायस्योपक्रम: क्रियते ।

## ९.२. उद्देश्यम्

प्रियपाठका: ! अंशेऽस्मिन् भवन्त: अधोलिखितान् विन्दून् आलोचयिष्यन्ति ।

- निबन्धशब्दं व्युत्पादयितुं प्रभवन्ति ।
- निबन्धशब्दार्थं ज्ञातुं शक्नुवन्ति ।
- स्मृतिनिबन्धसाहत्यिस्य धर्मशास्त्रे कीदृशं योगदानम् इत्यपि ज्ञातुं प्रभवन्ति ।
- स्मृतिनिबन्धसाहित्यस्य कालं ज्ञातुं शक्नुवन्ति ।
- कालभेदेन के स्मृतिनिबन्धार: कीदृशान् ग्रन्थान् लिखितवन्त इत्यपि ज्ञातुं प्रभवन्ति ।

- देशभेदेन के प्रमुखाः स्मृतिनिबन्धारः सन्तीति ज्ञातुं शक्नुवन्ति ।
- देशभेदेन कालभेदेन च स्मृतिनिबन्धृ ृणां परिचयमपि ज्ञातुं प्रभवन्ति ।

## १.३ .स्मृतिनिबन्धसाहित्यस्योद्भवो विकासश्च

पवित्रतमेऽस्मिन् भारतवर्षे आर्याणां जीवनकालः धर्मेणैव प्रतिष्ठितो भवति । आर्याणां मूलधर्मग्रन्थो वेदः । प्राचीनतमधर्मशास्त्रकारेण मनुना उक्तं यत् निषेकादिस्मशानान्ताः सर्वे संस्काराः येषां वैदिकमन्त्रैः सम्पादिताः, शास्त्रेऽस्मिन् तेषामधिकारो वर्त्तते । एतस्मात् सुस्पष्टं भवति यत् आर्याणां कृत्स्नमनुष्ठानं धर्मे प्रतिष्ठितं भवति । तर्हि धर्मस्य प्रमाणत्वेन भगवती श्रुतिः सर्वप्रमाणसम्पन्ना, धर्मशास्त्राणि च तदनुमापकत्वेन प्रमाणभूतानि सन्ति ।

सूत्र-स्मृति-भाष्यादिधर्मशास्त्रसाहित्येषु निबन्धा अपि धर्मनिर्णायकतया प्रामाण्यं भजन्ते । यतो हि तेष्वेव विभिन्नानां धर्मवचनानां सामञ्जस्य-समन्वययोः स्थापना विवक्षाविशेषात् तात्पर्यनिर्णयद्वारा धर्माः स्वरूपतः साधनतः फलतश्च निरूपिताः । सूत्र-स्मृति-भाष्यात्मकेभ्यो धर्मशास्त्रग्रन्थेभ्यो यदैव धर्मनिर्णयोऽत्यन्तक-ष्टसाध्यो भवति तदैवावसरे तदुपजीवीनां निबन्धग्रन्थानां भूयस्यावश्यकता परिलक्ष्यते । अतः देशकालभेदानुसारेण समुत्पद्यमानानामावश्यकतानां परिपूर्त्तये निबन्धकाराः स्वकीयान् निबन्धग्रन्थान् विरचितवन्तः ।

सूत्रस्मृतिभाष्यादिभ्योरर्वाक्कालिकतया निबन्धसाहित्यस्य कालः सप्तमशतकादारभ्य अष्टादशशतकं यावदिति ऐतिहासिकैः स्वीकृतः । एतेषामैतिहासिकानाम् अभिमतानुसारं भाष्यनिबन्धग्रन्थयोर्मध्ये नास्ति कश्चन भेदः । यतो हि भाष्यकारैः निबन्धग्रन्थानुरूपं बहुश्रुतिस्मृतिप्रतिपादितवचनानि संगृह्य स्मृतिग्रन्थानां सूत्रग्रन्थानाञ्च टीका कृता । विज्ञानेश्वरस्य मिताक्षरां दृष्ट्वा शङ्करभट्टः विज्ञानेश्वरं सर्वशेष्ठस्मृतिनिबन्धकाररूपेण उद्घोषितवान् । पुनश्च प्रमाणत्वेनास्माभिः स्पष्टमवलोक्यते यत् मनुटीकाकारेण श्रीमता सर्वज्ञनारायणेन स्वीयटीकायाः नाम मन्वर्थविवृत्तिरिति स्थापितम् । याज्ञवल्क्यस्मृतेः टीकाकारेण अपरार्केणापि ‘‘अपरार्कयाज्ञवल्क्यधर्मशास्त्रनिबन्धइति स्थापितः । यद् भवतु, एकादशशताब्दीं यावत् प्रायशः अनेके

भाष्यकाराः अनेकेषां धर्मशास्त्रग्रन्थानां भाष्यं कृतवन्तः । तदनन्तरं यवनानामक्रमणस्य प्रभावोऽस्माकं भारतस्य राजनीतिक-सामाजिक-शैक्षणिकजीवनोपरि दृढ़ं पतितः । ततः द्वादशशतकादेवारभ्य धर्मशास्त्रे नूतना काऽपि शैली प्रचलिता, येन स्मृतिसूत्रग्रन्थानां व्याख्यां विहाय स्वमतप्रतिपादनाय स्वतन्त्ररूपेण निबन्धग्रन्थानां प्रणयने संपादने च मतिं दद्युः । एतेषां स्मृतिनिबन्धानां भारते शनैः शनैः प्रसारः प्रचारश्च संजातः । देशस्य बहुषु प्रान्तेषु एते निबन्धा आदर्शभूताः विराजन्ते । क्रमेण समग्रे भारतवर्षे देशभेदेन कालभेदेन च निबन्धग्रन्थानां महत्त्वं प्रासारितमभूत् ।

निबन्धशब्दोऽपि बहुष्वर्थेषु व्यवह्रीयते । तत्र तावत् शब्दकल्पद्रुमे-निबघ्नातीति निबन्ध इत्युच्यते । ''नि'' उपसर्गात् ''बन्ध'' धातोः ''घञ्'' प्रत्यये कृते निबन्धशब्दो निष्पद्यते । निबन्धो नाम ''शब्दस्य वृत्तिरिति हेमचन्द्रः । निबन्धशब्दस्य प्रयोगो बहुषु स्थलेषु विविधेष्वर्थेषु प्रयुक्तो वर्त्तते । तत्र तावत् कुत्रचित् गद्यबद्धरचनापदेन कुत्रचिच्च निबन्ध एकस्य पर्णभरकस्येयन्ति पर्णानि, तथा एकस्य क्रमुकफलभरकस्येयन्ति क्रमुकफलानीत्याद्युक्तलक्षणः । संग्रहग्रन्थभेदे रोगभेदे बन्धने च निबन्धशब्दो व्यवह्रीयते इति हेमचन्द्रवचनमुट्टङ्कितं वाचस्पत्ये । धर्मशास्त्रविदश्च विभिन्नेभ्यः प्रामाणिकग्रन्थेभ्यः प्रमाणवचनानां संग्रहपूर्वकं यस्यैव ग्रन्थस्य रचनां कुर्वन्ति स तु निबन्धग्रन्थनाम्नाऽभिधीयते ।

तेषु स्मृतिनिबन्धृषु केचन दाक्षिणात्याः, अपरे महाराष्ट्रियाः, अन्ये मैथिलाः, परे, वङ्गीयाः, इतरे च उत्कलीयाः भवन्ति । यथा- लक्ष्मीधर-श्रीदत्तोपाध्यायचण्डेश्वर-वाचस्पतिप्रभृतयो मैथिलाः, देवणभट्ट हेमाद्रि-माधवाचार्य-नन्दपण्डितादयो दाक्षिणात्याः, जीमूतवाहन-गोविन्दानन्द-रघुनन्दनादयो वङ्गीयाः, कमलाकभट्ट-नीलकण्ठभट्ट-अनन्ददेव-नागोजीभट्टादयो महाराष्ट्रियाः, शतानन्द-प्रतापरूद्रदेव-गदाधरादयश्च उत्कलीयाः स्मृतिनिबन्धकाराः भवन्ति । एतेषां स्मृतिनिबन्धॄणां निबन्धग्रन्था अपि सुप्रसिद्धाः भवन्ति । यथा- लक्ष्मीधरस्य कृत्यकल्पतरुः, चण्डेश्वरस्य स्मृतिरत्नाकरः, हेमाद्रेः चतुर्वर्गचिन्तामणिः, माधवाचार्यस्य कालमाधवः, जीमूतवाहनस्य धर्मरत्नः, रघुनन्दनस्य स्मृतितत्त्वम्, कमलाकरस्य निर्णयसिन्धुः, नीलकण्ठस्य भगवन्तभास्करः, मित्रमिश्रस्य वीरमित्रोदयः, शतानन्दस्य शतानन्दसंग्रहः, प्रतापरुद्रदेवस्य सरस्वतीविलासश्चेति । एवमेव प्रकारेण देशभेदेन कालभेदेन च भारतस्य

कोणकोणेषु स्मृतिनिबन्धारः सन्ति । तत्तद्देशीयाचारानुसारं सामाजिकस्थितिमवेक्ष्यैव धर्मनिबन्धग्रन्थाः निबन्धृभिः प्रस्तुताः ।

स्वानुशीलनप्रश्नाः
(१) स्मृतिनिबन्धसाहित्यस्य कः कालः ?
उ............................................................ ।
(२) के उत्कलीयाः स्मृतिनिबन्धारः ?
उ ........................................................ ।

## ९.४ .प्रमुखस्मृतिनिबन्धृणां परिचयः

धर्मशास्त्रसाहित्याकाशे यावन्तः स्मृतिनिबन्धारः सन्ति तेषु प्रायशः लक्ष्मीधर-हेमाद्रि-देवणभट्ट-माधवाचार्य-श्रीदत्त-चण्डेश्वर-जीमूतवाहन-रघुनन्दन-कमलाकर-नीलकण्ठ-वाचस्पति-गदाधर-नरसिंह-दिव्यसिंहप्रभृतयः प्रमुखाः भवन्ति । सम्प्रति एतेषां परिचयः देशकालनिरूपणं च क्रियते ।

### लक्ष्मीधरभट्टः –

धर्मशास्त्रीयनिबन्धसाहित्याकाशे प्रप्रथमः सर्वप्राचीनतमश्च निबन्धकारोऽयं लक्ष्मीधरः । गहडवार अथवा राठौरराजागोविन्दचन्द्रस्य सान्धिविग्रहिकमन्त्रित्वेनायं नियुक्त आसीत् । यादृशोऽयं धर्मज्ञः तादृशोऽपि राजनीतिज्ञः । अस्य पिता श्रीहृदयधरभट्टः राठौरराज्ञां प्रधानमन्त्रीपदे नियुक्त आसीत् । गोविन्दचन्द्रस्य शान्तिप्रियशासनं विजयाभियानं च मन्त्रीलक्ष्मीधरेणैव संपादितमासीदिति तत्प्रणीतकृत्यकल्पतरोः राजधर्मप्रकरणादेव ज्ञायते । अस्य साहसम् आश्चर्यजनकम्, अस्य राजपदवी महासान्धिविग्रह आसीदिति स्वकृतग्रन्थपुष्पिकातो ज्ञायते । ११०८ तमे ख्रीष्टसंवत्सरे यवनानामाक्रमणसमये राजा गोविन्दचन्द्रः स्वविचक्षणमन्त्रिणा लक्ष्मीधरसाहाय्येन साहसेन च हम्मीरं पराजितवान् । अस्य लक्ष्मीधरस्य वैदुष्य-प्रतिभादिविषयेषु व्यवहारकाण्डगतोपक्रमादेव ज्ञायते । अनेन स्वपाण्डित्यगुणेन १११०-११३० ख्रीष्टाब्दमध्ये कृत्यकल्पतरुनामकस्य सुबृहद्धर्मशास्त्रीयनिबन्धग्रन्थस्य रचना विहिता । कृत्यकल्पतरुः कल्पतरुः कल्पवृक्षश्चेति नाम्ना ग्रन्थस्यास्य प्रचारः प्रसारश्च संजातः । अयं

मिथिलावास्तव्यः, यतो हि प्रणीतस्यास्य ग्रन्थस्य कृत्यकल्पतरोः प्रचारः प्रसारश्च मिथिलायां सर्वाधिकतया जातः । आचार-व्यवहार-राजधर्म-तीर्थादिविषयेषु निबन्धग्रन्थेऽस्मिन् चर्चा दृश्यते । कृत्यकल्पतरोः ब्रह्मचारीकाण्डस्य प्रारम्भे ग्रन्थकर्त्तालक्ष्मीधरः स्वयं मन्त्रीश्वर इति तेन लिखितम् । अस्य कालनिर्धारणार्थं काठिन्यं नानुभूयते, यतो हि अयं विज्ञानेश्वरमुद्धृतवान्, तस्मादयमेकादशशतकीयः । अनिरुद्धस्य कर्मोपदेशिन्यां कल्पतरोरुद्धरणानि प्राप्यन्ते, अतोऽस्य समयः ११००-११५० ख्रीष्टाब्दयोः मध्यभागे भवितुमर्हतीति प्रमाणयितुं शक्यते । लक्ष्मीधरोऽयं गोविन्दचन्द्रस्य राजमन्त्री आसीत्, तस्मात् द्वादशशतकमस्य समय इति काणेमहोदयानामभिमतम् ।

## जीमूतवाहनः –

वङ्गीयधर्मशास्त्रनिबन्धकारेषु जीमूतवाहनः मुर्धन्यभूतः । स्वजन्मनाऽयं राढा इति स्थानम् अलञ्चकार । स चायं पारिभद्रकुलसंभूतः महामहोपाध्यायोपाधिधारकश्चासीदिति स्वकृतग्रन्थपुष्पिकातो ज्ञायते । यथा- ''इति पारिभद्रीयमहामहोपाध्यायश्रीजीमूतवाहनस्य कृतौ धर्मरत्ने दायभागे.....'' । मुख्यरूपेण कालविवेकः, व्यवहारमातृका, दायभागश्चेति ग्रन्थत्रयमस्यास्ति । एते तु धर्मरत्ननामकस्य बृहद्ग्रन्थस्यांशभूताः ।

जीमूतवाहानस्य कालविषये बहवो हि विसंवादाः सन्ति । तेन धारेश्वर-गोविन्दराज-भोजदेवादीनां नामानि उट्टङ्कितानि । तस्मात्तस्य समयः कदापि एकादशशतकान्तिमभागात् पूर्वं भवितुं नार्हति । पुनश्च जीमूतवाहनस्य नाम शूलपाणि-वाचस्पति-रघुनन्दनादिभिरुट्टङ्कितत्वात् पञ्चदशशतकस्य मध्यभागादनन्तरमपि तस्य समयो भवितुं नार्हति । पुनश्च जीमूतवाहनेन कालविवेके किञ्चन गाणितिकज्योतिषतथ्यं प्रकटितम् । अतस्तेन तस्य कालः १०१३ शकाब्दात् (१०९३ ख्रीष्टाब्दात्) पूर्वं भवितुं नार्हति । अतो ज्ञायते यत् जीमूतवाहनस्य ग्रन्थलेखनकालः १०९१ ख्रीष्टाब्दादरभ्य ११३० ख्रीष्टाब्दं यावत् भवेदिति काणेमहोदयाः प्रमाणयन्ति ।

जीमूतवाहनस्य प्रथमा कृतिः कालविवेकः, तदनन्तरं व्यवहारमातृका, ततो दायभागश्चेति क्रमेण वक्तुं शक्यते । ग्रन्थत्रयं विहाय ऋणादानविषयकं कञ्चन ग्रन्थविशेषं लिखितुं दायभागे तेन

प्रतिज्ञातम् । परन्तु ग्रन्थोऽयं सम्प्रति नोपलभ्यते । वस्तुतस्तु जीमूतवाहनेन कालविवेकादिग्रन्थ चतुष्टयं लिखितम्, तेषु कालविवेक: स्वतन्त्रो ग्रन्थ:, अन्ये त्रयश्च धर्मरत्नाख्यस्य मुख्यग्रन्थस्याशविशेषा: भवन्तीति एवेऽषां मतम् ।

पारिभद्रकुलोत्पन्नस्य जीमूतवाहनस्य कीदृशं वैदुष्यं कीदृशी च प्रतिभा इति तत्प्रणीतग्रन्थेभ्य: सम्यक् ज्ञातुं शक्यते । दायभागस्य उपक्रमे तेन सुस्पष्टतया लिखितं यत् मन्वादिवचनव्याख्यायां व्याख्याकाराणां यो विवाद:, तद्दूरीकरणार्थं सुश्लिष्टा व्याख्या मयाऽत्र विहिता इति । यथा-

**''मन्वादिवाक्यान्यविमृश्य येषां यस्मिन् विवादो बहुधा बुधानाम् ।**
**तेषां प्रबोधाय स दायभाग: निरूपणीय: सुधिय: शृणुध्वम् ।।''**

यद्भवतु वङ्गीयधर्मशास्त्रकारेषु अस्य पाण्डित्यम् अतीव महत्त्वपूर्णमासीदिति कथयितुं शक्यते । वङ्गीयानां कृते हिन्दुविधौ तत्प्रणीतो दायभाग एवाद्रियते ।

दायभागोपरि बह्व्य: टीका: सन्ति । तासु स्मृतितत्त्वकाररघुनन्दनभट्टाचार्यस्यापि एका टीका वर्त्तते । जीमूतवाहनस्य दायभागे प्रायश: परमतखण्डनेऽधिकाभिरुचिर्दृश्यते । ''मन्वर्थविपरीता तु या स्मृति: सा न शश्यत'' इति वचनात् मनुविरुद्धानि वचनानि प्रमाणत्त्वेनोपस्थापयतामाचार्याणां मतमुपेक्षते ।

## हेमाद्रि: –

दक्षिणभारतीयस्मृतिनिबन्धकारेषु हेमाद्रे: स्थानमन्यतममस्ति । हेमाद्रिप्रणीतचतुर्वर्ग-चिन्तामणि: प्राचीनधार्मिकवृत्यानां विश्वकोशो भवति । चतुर्वर्गचिन्तामणे: प्रसिद्धि: हेमाद्रिनाम्ना वर्त्तते । अस्य हेमाद्रे: पितुर्नाम कामदेव:, पितृव्यस्य नाम वासुदेवश्चासीत् । वत्सगोत्रोत्पन्न: हेमाद्रि: देवगिर्यां यादवराज्ञ: महादेवस्य राजमन्त्री आसीत् । अस्योत्तराधिकारिरामचन्द्रस्यापि मन्त्रित्वेन हेमाद्रिरासीत् । स्पष्टं भवति यत् त्रयोदशशतकस्योत्तरार्द्धे (१२५०-१३०० ख्रीष्टाब्द:) हेमाद्रि: जीवित आसीदिति । चतुर्वर्गचिन्तामणे: रचना १२५० ख्रीष्टाब्दादनन्तरमेव जाता । ग्रन्थोऽयं १३०० ख्रीष्टसंवत्सरात्पूर्वमेव लोकलोचनमागत: । तत: परं समग्रे दक्षिणभारते सोऽयं ग्रन्थ: लोकप्रियतामर्ज्जितवान् । विज्ञानेश्वरस्य मिताक्षरायारुल्लेख: हेमाद्रिणा

स्वग्रन्थे नैव विहितः । एतस्मादनुमीयते यत् विज्ञानेश्वरकृतमिताक्षरायारनन्तरमेव चतुर्वर्गचिन्तामणेः रचना जाता इति । अत्र श्राद्धखण्डे एव हेमाद्रेः विद्वत्प्रतिभायारूपलब्धिः भवति । अयमेव पूर्वमीमांसायाः महान् विद्वानासीत् ।

चतुर्वर्गचिन्तामणौ आपस्तम्बधर्मसूत्र-न्यायमञ्जरी-त्रिकाण्डमण्डन-निर्णयामृत-पण्डितपारितोष-पृथ्वीचन्द्रोदय-बृहत्कथाविधिरत्न-वृद्धशातातप-भाष्यकार-गोविन्दराज-गोविन्दोपाध्याय-भवदेव-मदननिर्घण्टु-मेधातिथि-वामदेव-विश्वरूप-विश्वप्रकाश-विश्वादर्श-शम्भुशिवदत्त-श्रीधर-सोमदत्तप्रभृतीनां ग्रन्थकाराणां ग्रन्थानाञ्च नामानि दृश्यन्ते । एवंषामाचार्याणां तदीयग्रन्थानां च नाम अपि ग्रन्थेऽस्मिन् बहुवारं प्राप्यते । यथा- अपरार्क-कर्कोपाध्याय-देवस्वामि-शङ्खधर-स्मृतिचन्द्रिका-स्मृतिमहार्णव-प्रकाश-हरिहरप्रभृतयः ।

चतुर्वर्गचिन्तामणिं विहाय हेमाद्रेरपि अन्ये ग्रन्थाः सन्ति । श्राद्धकल्पः, मुक्ताफलस्य (बोधदेवकृतस्य) कैवल्यदीपकभाष्यम्, वाग्भट्टकृताष्टाङ्गदयोपरि आयुवेदरसायनीनाम्नी टीका, शौनकप्रणवकल्पस्य भाष्यं चेति । अस्य भाषाशैली अन्येषां निबन्धकारणामपेक्षया सर्वथा भिन्ना भवति । महाराष्ट्रस्य बहुषु मन्दिरेषु हेमाद्रिशैलीविषये उल्लेखः प्राप्यते । अयमेव हेमाद्रिः ''मोड़ि'' लिपेराविष्कर्त्ता । सम्पूर्णेऽपि दक्षिणभारते हेमाद्रिकृतचतुर्वर्गचिन्तामणेः प्रचारः प्रसारश्च सर्वत्रैव जातः ।

## चेण्डश्वरः –

स्मृतिनिबन्धसाहित्याकाशे मैथिलधर्मशास्त्रनिबन्धकारत्वेन बहुसम्मानो विद्यते । अनेन ''स्मृतिरत्नाकर'' नाम्ना ग्रन्थः प्रणीतः । ग्रन्थस्यास्य अपरं नाम ''रत्नाकर'' इति । सुबृहत्स्मृतिनिबन्धग्रन्थोऽयं सप्तखण्डेनैव विभक्तः, यथा–

**१) कृत्यरत्नाकरः -**

अत्र बहूनां कृत्यानां विषये पुराणोपपुराणस्मृतिग्रन्थानामाधारेण विचारो वर्त्तते । ग्रन्थेऽस्मिन् द्वाविंशतितरङ्गाः सन्ति । अयं ग्रन्थः मिथिलायाः कर्मशास्त्रत्वेन परिचितोऽस्ति ।

**२) दानरत्नाकरः -**

अत्र एकोनत्रिंशत्संख्याकाः तरङ्गाः सन्ति । विविधप्रकारदानानां विषये विचारो दृश्यते ।

**३) व्यवहाररत्नाकरः -**

बहूनां सामाजिकनियमानां विवेचनमत्र दृश्यते ।

**४) शुद्धिरत्नाकरः -**

शुद्धेः साङ्गोपाङ्गविवेचनमत्र दृश्यते । ग्रन्थोऽयं चतुस्त्रिंशत् तरङ्गैः विभक्तोऽस्ति ।

**५) पूजारत्नाकरः -**

प्रार्थना-पूजनयोः कृते अत्र बहवः विधयः सन्ति । एतदर्थं ग्रन्थस्यास्य महती आवश्यकता विद्यते ।

**६) विवादरत्नाकरः -**

हिन्दुनियमानां कृते ग्रन्थोऽयं आधारभूतो भवति । अत्र १०० परिमिताः तरङ्गाः सन्ति ।

**७) गृहस्थरत्नाकरः -**

गृहस्थानां कृते कर्त्तव्यशास्त्रत्वेन ग्रन्थस्यास्य प्रसिद्धिः वर्त्तते । अत्र अष्टषष्ठिपरिमिताः तरङ्गाः सन्ति ।

धर्मशास्त्रीयग्रन्थान् विहाय श्रीमता चण्डेश्वरेण ''कृत्यचिन्तामणि'' नामकस्य प्रख्यातज्योतिर्निबन्धग्रन्थस्य रचना विहिता । अत्र उत्सव-संस्कारयोर्विषये सम्यक् वर्णनं दृश्यते । राज्यसम्बन्धितविषयाणां विचारार्थं अनेन राजनीतिरत्नाकरस्य रचना कृता । अत्र षोड्शपरिमिताः तरङ्गाः सन्ति । अस्य शिववाक्याबलि-दानवाक्याबलिनाम्ना ग्रन्थद्वयमस्ति ।

चण्डेश्वरः कस्यापि राज्ञः राजमन्त्री आसीत् । स्वकीयनीतीनामुपरि नेपालराज्यस्याक्रमणे तेन विजयः लब्धः । तत्रास्य चण्डेश्वरस्य बहुसम्मानः आसीत् । चण्डेश्वरस्य देहान्ते मैथिलाः वङ्गियाश्च स्मृतिनिबन्धारः चण्डेश्वरप्रणीतग्रन्थेभ्यः बहूपकारं प्राप्तवन्तः । मिसरुमिश्र-वर्धमान-वाचस्पतिमिश्र-रघुनन्दनप्रभृतयः सादरं चण्डेश्वरस्य नामोल्लेखं कृतवन्तः । अनेन चण्डेश्वरेण स्वकृतस्मृतिनिबन्धग्रन्थे हलायुध-कामधेनु-कल्पतरु-पारिजातप्रभृतीनां निबन्धानां निबन्धकाराणाञ्च नाम गृहीतम् । प्रसङ्गवशादपि कामन्दक-कुल्लूक-

पल्लव-श्रीकरादीनामुल्लेख: तेन कृत: । एतेन प्रमाणितं भवति यदस्य काल: १ ३ ० ० ख्रीष्टसंवत्सरस्य निकटवर्त्तिकाले कदाचित् भवितुमर्हति । चतुर्दशशतके एव मिथिलाभूमि: धर्मशास्त्रक्षेत्रे बहुमूल्यानां ग्रन्थानामुद्धारं कृतवती । भारतीयसंस्कृतौ यस्या: भूमेरद्यापि समादरो वर्त्तते ।

## देवणभट्ट: –

दक्षिणभारतीयधर्मशास्त्रनिबन्धकारेषु देवणभट्टस्य स्थानमन्यतम-मस्ति । अस्य देवण:, देवनन्दन:, देवगणश्चेति नामान्तराणि वर्त्तन्ते । अस्य पितुर्नाम केशवादित्य: । सोमयाजीति केचिद् वदन्ति । देवणभट्टविरचिता ''स्मृतिचन्द्रिका'' अतीव महत्त्वपूर्णा । शुकदेवमिश्र-आपदेव-वामदेवादीनां स्मृतिनिबन्धृणां निबन्धग्रन्था: यद्यपि स्मृतिचन्द्रिकानाम्ना उच्यन्ते तथापि देवणभट्टप्रणीतस्मृतिचन्द्रिकाया: महत्त्वं वरीवर्त्तते । अत्र बहूना स्मृतिनिबन्धकाराणां नामान्युल्लिखितानि सन्ति । अनेन स्वनिबन्धग्रन्थे अपरार्क-त्रिकाण्डी देवराट्-देवस्वामि-आपस्तम्ब-कल्पभाष्यार्थकारधारेश्वर-घृतस्वामीप्रदीप-भवनाथ-धर्मदीप-मेधातिथि-भाष्यार्थसंग्रहकार-मिताक्षरा-वैजयन्ती-विश्वरूप-विश्वादर्श-शम्भुकर-श्रीकर-विश्वस्वामि-स्मृतिभास्कर-स्मृत्यर्थसारादीनां निबन्धानां निबन्धकाराणां च नामान्युद्धृतानि । अयं दाक्षिणात्यनिबन्धकार: । दक्षिणदेशेऽयं प्रामाणिकस्मृतिनिबन्धृरूपेण परिचितो वर्त्तते । अनेन विज्ञानेश्वरस्य नाम स्वग्रन्थे गृहीतम् । परन्तु बहुषु स्थलेषु तस्य मतस्य विरोधोऽपि आचरित: । स्मृतिचन्द्रिकायां मिताक्षरा-अपरार्क-स्मृत्यर्थसाराणामुल्लेखोऽस्ति । तस्मादस्य देवणभट्टस्य समय: १ १ ५ ० ख्रीष्टाब्दात्पूर्वं भवेदिति काणेमहोदयानामभिमतम् । हेमाद्रिणा स्मृतिचन्द्रिकामतानामुल्लेख: कृत: । अत: १ १ २ ५ ख्रीष्टाब्दादेकशता-ब्दीपूर्वं स्मृतिचन्द्रिकाया: कालो भवेत् । स्मृतिचन्द्रिकेयं परस्परविरु-द्धस्मृत्यर्थसमन्वयैकप्रयोजनम् । स्मृतिनिबन्धग्रन्थेषु अन्यतमा च जागर्त्ति । हेमाद्रि-माधव-भट्टनीलकण्ठ-कमलाकरभट्ट-वैदिकसार्वभौम-वैद्यनाथदीक्षितादिभ्यो निबन्धकारेभ्य: स्मृतिचन्द्रिकाप्रणेता याज्ञिकदेवण-भट्टोऽयं प्राचीन इति ज्ञायते । हेमाद्रिणा स्वीये श्राद्धकल्पे स्मृतिचन्द्रिकाकारस्य मतं खण्डितमतो देवणभट्टो हेमाद्रे: पूर्वकालिक इति ज्ञायते । स्मृतिचन्द्रिकाया: रचना अपरार्क-विज्ञानेश्वर-

श्रीधरादीनामनन्तरमेव जाता देवणभट्टेन स्वग्रन्थे एतेषां त्रयाणामेवोल्लेख: कृत: । त्रयोदशशतकस्योत्तरार्द्धे हेमाद्रिणा चतुर्वर्गचिन्तामणौ स्मृतिचन्द्रिकाया: उद्धारो विहित: । पूनश्च सरस्वतीविलासे, वीरमित्रोदये च अस्य नामोल्लेखो दृश्यते । अतोऽस्य समय: १२२५ ख्रीष्टाब्दात्पूर्वं न भवेत् । धर्मद्रुमानुसारं देवणभट्टस्य काल: ११७५-१२५० ख्रीष्टाब्दमध्ये भवेत् ।

## माधवाचार्य: –

धर्मशास्त्रसाहित्याकाशे कालविषयकस्मृतिनिबन्धकारेषु माधवाचार्य: सुप्रख्यातोऽस्ति । अयमेव कालमाधवस्य कर्त्ता । माधवाचार्य: बुक्कणमहाराजस्य कुलगुरुमन्त्री आसीदिति ज्ञायते । अयं मायणाचार्यस्य श्रीमत्याश्च पुत्र:, प्रख्यातस्य वेदभाष्यादिग्रन्थकर्त्तु: सायणाचार्यस्य भ्राता यजु:शाखि भारद्वाजगोत्रश्चेति एतत् कृतपराशरस्मृतिव्याख्यातोऽवगम्यते । यथा-

**श्रीमती जननी यस्य सुकीर्त्तिर्मायण: पिता ।**
**सायणो भोगनाथश्च मनोबुद्धिसहोदरौ ।**
**यस्य बौधायनं सूत्रं शाखा यस्य च याजुषी**
**भारद्वाजं कुलं यस्य सर्वज्ञ: स हि माधव: ।।**

सोऽयं सायणाचार्यस्य अग्रज एव आसीत्, नतु अनुज: । सायणाचार्येण ज्येष्ठे भ्रातरि भक्त्यत्यतिशयतात् प्रायश: स्वनिर्मितग्रन्था: माधवीयतया निर्दिष्टा: । न तु माधव-सायणयो: ऐक्यमिति भ्रमितव्यम् । सायणशब्दस्य वंशनामत्वादेव सर्वदर्शनसंग्रहे माधवाचार्यस्यापि सायणतयोल्लेख: संगच्छते । यथा- ‘‘श्रीमत्सायणमाधव:’’ इति । माधवाचार्यस्य विवेकतीर्थ इत्युपाधि: आसीदित्यवगम्यते । स्वयं भारतीतीर्थाभिधस्य कस्यापि यतीन्द्रस्य शिष्य आसीदित्यपि ज्ञायते । वस्तुत: सायणाचार्य: वेदभाष्यकर्त्ता । परन्तु ‘‘कृपालुमाधवाचार्यो वेदार्थं वक्तुमुद्यत:’’ इत्युक्ति: सायणार्यस्य ज्येष्ठे भ्रातरि भक्त्यातिशयख्यापनार्था । अयं बुक्कस्य बुक्कुणस्य वा महाराजस्य कुलगुरु: मन्त्री आचीत् । बुक्कस्तु चन्द्रबंशीसंगमनाम्नो महाराजस्य आत्मज: । बुक्कस्यात्मजस्तु हरिहर: इति यज्ञतन्त्रसुधानिधौ दृश्यते । मायणस्तु संगमस्य मन्त्री बभूव इति माधवीये दृश्यते । सायणस्तु

बुक्कस्य परतो हरिहरस्य मन्त्री आसीदिति तदीयवेदभाष्यात् यज्ञतन्त्रसुधानिधिग्रन्थाच्चावगम्यते ।

माधवाचार्यस्य रचनायां बहवो ग्रन्थाः सन्ति । यथा - कालमाधवः, जैमिनीयन्यायमाला- विस्तरः, पराशरस्मृतेः पराशरमाधवीयटीका, पुराणसारस्य व्याख्या, सर्वदर्शनसंग्रहश्चेति । माधवाचार्यः रामानुजाचार्यात् जैनहेमचन्द्रात् काव्यप्रकाशाच्च पराचीन इति एतत्वृतसर्वदर्शनसंग्रहे तेषामुल्लेखदर्शनादवधार्यते । माधवाचार्यस्य कालविषये यद्यपि निश्चितरूपेण किमपि कथयितुं नैव शक्यते तथापि काणेमहोदयस्य मतानुसारं एवमेव स्वीक्रियते यदयं माधवाचार्यः स्ववार्धक्यावस्थायां १३७७तमे ख्रीष्टाब्दे विद्दारण्यनाम्ना विभूषितो भूत्वा संन्यासाश्रमं गृहीतवान् । किम्बदन्त्यनुसारं ज्ञायते यदस्य मृत्युः नवतितमे वयसि १३८६ तमे ख्रीष्टसंवत्सरेऽभवदिति । अतः माधावाचार्यस्य रचनासमयः १३३० - १३८५ ख्रीष्टाब्दमध्ये भवितुमर्हतीति निश्चीयते ।

## रघुनन्दनः –

जीमुतवाहनात्परं वङ्गदेशस्य श्रेष्ठधर्मशास्त्रनिबन्धकारत्वेनास्य नाम प्रसिद्धमस्ति । अष्टविंशति तत्त्वविशिष्टः स्मृतितत्त्वाख्यो विशालग्रन्थस्तेन विरचितः । तेनापि तीर्थतत्त्वम्, द्वादशयात्रातत्त्वम्, त्रिपुष्करशान्तितत्त्वम्, रासयात्रापद्धतिः, गयाश्राद्धपद्धतिश्चेति ग्रन्थानां रचना वृत्ता । सः बन्धघटीयब्राह्मणहरिहरभट्टाचार्यस्य सुपुत्र आसीत् । अयं महाप्रभुश्रीचैतन्यदेवस्य परमो भक्तः । अनेन स्वरचितग्रन्थेषु सर्वत्रैव स्वदेशस्याचारपरम्परायाश्चोपस्थापनं वृतम् । विषयाणामपि सम्यक् विचारो विहितः । रघुनन्दनो वङ्गीय इत्यत्र नास्ति केषामपि वैमत्यम् । तत्प्रणीतगयाश्राद्धपद्धतौ श्राद्धस्योपरि महती चर्चा तेन वृता । किम्बदन्त्यनुसारं ज्ञायते यत् श्रीचैतन्यमहाप्रभु-रघुनन्दनौ वासुदेवसार्वभौमस्य द्वौ सुयोग्यौ शिष्यावास्ताम् । वासुदेवसार्वभौमो नन्दव्यायस्य सुप्रसिद्धविद्वानासीत् । तदनुसारं स्मृतितत्त्वप्रणेतुः जन्म १४९० तमख्रीष्टाब्दो भवेत् । यतो हि श्रीचैतन्यस्य जन्म १४८५-८६ ख्रीष्टाब्दे अभूत् । अतः रघुनन्दनः प्रायशः १४९०-१५७० ख्रीष्टाब्दमध्ये आसीदिति अनुमीयते । स्मार्तभट्टाचार्यरूपेण अस्य प्रसिद्धिः वङ्गे

अविस्मरणीया विद्यते । अनेन जीमूतवाहनकृतदायभागस्योपरि भाष्यमपि रचितम्, यत्तु प्रायशः सर्वेषु दायभागभाष्येषु मूर्द्धन्यत्वेन अस्ति ।

## कमलाकरभट्टः –

विद्वदग्रगण्यः कमलाकरः विश्वमित्रशाखीयब्राह्मण इति स्वकृतनिर्णयसिन्धोः मङ्गलाचरणादेव ज्ञायते । परन्तु अस्य पूर्वजः गोविन्दभट्टः महान् विद्वान सदाचारसम्पर्णश्चासीत् । अयम् आश्वालायनशाखीय देशस्थब्राह्मण इति कमलाकरकृतनिर्णयसिन्धु-भूमिकातः एतस्मिन् विषये स्पष्टमनुमीयते । न्याय-मीमांसा-वेदान्त-व्याकरण-साहित्य-धर्मशास्त्रादिविषयेषु अस्य प्रगाढ़पाण्डित्यमासीत् । अस्य पितामहः नारायणभट्टः जगद्गुरुपदवीमवाप । श्रीकाशीक्षेत्रे तद्वंशीयानां पूजासम्मानस्तु अद्यावधिरपि प्रचलाति । अस्य पितुः नाम रामकृष्णभट्टः, माता च उमादेवी । दिवाकरभट्ट-लक्ष्मणभट्टाख्येन ज्येष्ठकनिष्ठरूपेणास्य भ्रातृद्वयमासीत् । यतो हि कमलाकरः निर्णयसिन्धोः मङ्गलाचरणे स्वयमेव उमाख्यां मातरं ज्येष्ठभ्रातरं दिवाकरञ्च ग्रन्थस्य अविघ्नेन परिसमाप्तये स्तौति । अनेनैव धर्मशास्त्रेऽन्येऽपि दानकमलाकर-शुद्रकमलाकर-शान्तिरत्न-गोत्रप्रवरदर्पण -पूर्त्तकमलाकर-व्रतकमलाकर-प्रायश्चित्तरत्न-सर्वतीर्थविधि-विवादताण्डव-कर्मविपाक-रत्नप्रभृतयः ग्रन्थाः प्रणीताः । साहित्येऽपि काव्यप्रकाशोपरि व्याख्या कृतास्ति । सा चानेकटीकाभ्यः मूर्द्धन्यत्वेन वर्त्तते । कमलाकरस्य न केवलं दक्षिणभारते नापि केवलमात्रं महाराष्ट्रे, अपितु समग्रेऽस्मिन् भारतवर्षे भूरि-भूरि प्रशंसा दृश्यते । निर्णयसिन्धुः अस्य प्रथमा कृतिः । अस्य ग्रन्थस्य रचनासमयः १६१२ ख्रीष्टाब्दः । अतः कमलाकरस्य रचनाकालः १६१०-१६४० ख्रीष्टाब्दं यावत् भवितुमर्हतीति काणे महोदयानां मतम् ।

## नीलकण्ठभट्टः –

पवित्रतमे भारतवर्षे धर्मशास्त्रसाहित्याकाशे सुप्रसिद्धधर्मनिबन्धृत्वेन भट्टनीलकण्ठस्याद्वितीयं स्थानं वर्त्तते । अस्य पितुर्नाम शङ्करभट्टः मातुर्नाम च गङ्गादेवी । नारायणभट्टस्य रामकृष्णभट्ट-शङ्करभट्टाख्यौ महानिबन्धकारौ सकलशास्त्रपरिपूर्णधर्मशास्त्रनिबन्धका-रभूततया द्वावेव पुत्रावास्ताम् । शङ्करभट्टस्य यौ द्वौ पुत्रौ तयोर्नाम नीलकण्ठः दामोदरश्चेति । तयोर्ज्येष्ठः नीलकण्ठभट्टः ।

भारतवर्षेऽस्मिन् धर्मशास्त्रसाहित्याकाशे स्मृतिनिबन्धकाररूपेण यद्यपि लक्ष्मीधर-हेमाद्रि-देवणभट्ट-चण्डेश्वर-विश्वेश्वर-नृहिंप्रसाद-रघुनन्दन-शूलपाणि-कमलाकर-जीमूतवाहन-मित्रमिश्र-काशीनाथोपाध्यायप्रभृतीनां नामानि प्रख्यातानि सन्ति तथापि भगवन्तभास्कराख्यसुबृहत्स्मृति-निबन्धकर्त्तात्वेन श्रीमतो नीलकण्ठभट्टस्य महद् वैशिष्ट्यं वर्त्तते । मध्यकालिकेषु सर्वेष्वपि स्मृतिनिबन्धकारेषु नीलकण्ठोऽयं सर्वश्रेष्ठः । मीमांसकानां कुलेषु अयं लब्धजन्मा । धर्मशास्त्रेषु मीमांसानियमानां प्रयोगेऽयं सिद्धहस्तः । श्रीमता नीलकण्ठेन महाराजाधिराजभगवन्तदेवस्याश्रये स्थित्वा तस्य सम्मानार्थं तन्नाम्ना भगवन्तभास्कराख्यो स्मृतिनिबन्धग्रन्थो विरचितः । ग्रन्थोऽयं संस्कारादिद्वादशमयूखैर्विभक्तः । यथा-

**संस्काराचारकालाः समुचितरचनाश्राद्धनीतिर्विवादौ**
**दानोत्सर्गप्रतिष्ठा जगति जयकराः संगतार्थानुबद्धाः ।**
**प्रायश्चित्तं विशुद्धिस्तदनुनिगदिता शान्तिरेवं क्रमेण**
**ख्याता ग्रन्थेऽत्र शुद्धबुद्धजनसुखदा द्वादशेति मयुखाः ।**

यद्यपि जैमिनीयमीमांसादर्शनेऽस्य प्रगाढ़पाण्डित्यमासीत् तथापि तन्नाम्ना मीमांसाविषये कोऽपि ग्रन्थविशेषः नैवोपलभ्यते । परन्तु स्वनिबन्धग्रन्थे स्थलविशेषेषु मीमांसाधिकरणानामाधारेण युक्त्या विस्तृतविचारो विहितः ।

नीलकण्ठभट्टस्य पितृकुले प्रदीर्घकालात् विद्यासमाराधनमभूत् । अनेनैव हेतुना एतत् कुलं भट्टेति संज्ञया जनैरभिहितम् । भट्टेति विदुषां सम्मानसूचक उपाधिः । गच्छता कालेन अयमेवोपाधिः वंशगतनाम्ना लोके प्रथितोऽभवत् । सांप्रतिका एतेषां वंशजाः स्वनाम्ना वंशगतेन सह द्विरावृत्तं भट्टेति पदं प्रयुज्यते । यथा- भट्ट-भट्टेति । अत्र प्रथमं भट्टपदं नाम्नः सूचकमन्यच्च भट्टेति पदं विद्वदुपाधिसूचकमिति । भट्टश्रीनीलकण्ठस्य बहुमुखीशास्त्रप्रतिभा, सार्वभौमञ्चास्य पाण्डित्यम् । वेदशास्त्रेषु अस्याप्रतिहता गतिः । एतत् सर्वं नीलकण्ठेन पैतृकदायरूपेण संप्राप्तम् । श्रीनीलकण्ठभट्टस्य पितामहो जगद्गुरुविरुदाबलिविभूषितः सर्वदिग्विख्यातो श्रीनारायणभट्टः । इदानीमपि विद्वत्सभायां भट्टवंशधराः अग्रपूजासम्मानं प्राप्नुवन्ति । श्रीनीलकण्ठस्य जन्म एवंविधलब्धप्रतिष्ठितविद्यातपःपूतपरिवारो संजातम् । अनेन

भगवन्तभास्करातिरिक्ता अन्येऽपि ग्रन्थाः विरचिताः । यथा-व्यवहारतत्त्वम्, दत्तकनिर्णयः, धर्मप्रकाशः, श्राद्धप्रकाशश्चेति ।

निलकण्ठः शङ्करभट्टस्य कनिष्ठपुत्रः । शङ्करभट्टेन स्वकीये द्वैतनिर्णये टीडनीरानन्दमतानामुल्लेखो विहितः । टोड़रानन्दस्य तिथिस्तु ज्ञायते । अनेन ख्रीष्टीय १५७०-१५८९ मध्ये स्वकृतीनामुपस्थापनं कृतम् । अतो द्वैतनिर्णयः १५९० ख्रीष्टाब्दात्पूर्वं प्रणीतो न भवितुमर्हति । श्रीनीलकण्ठभट्टः कमलाकरभट्टस्य कनिष्ठपुत्रो भवति । अतः स कमलाकरात्पूर्वं ग्रन्थान् रचयितुं समर्थो न स्यात् । कमलाकरेण निर्णयसिन्धुः १६१२ तमे ख्रीष्टाब्दे विरचतिः । अतो नीलकण्ठस्य रचनाकालः १६१० ख्री. अनन्तरं भवितुमर्हति । व्यवहारतत्त्वस्य एकस्याः प्रतिलिपेः समयः १६४४ ख्रीष्टाब्दः । अतः स्पष्टं भवति यद् ग्रन्थोऽयम् इतोऽपि पूर्वं प्रणीतोऽभूदिति । अतः स्पष्टतया प्रतिपादितुं शक्यते यत् नीलकण्ठस्य रचनाकालः १६१०-१६४५ ख्रीष्टाब्दमध्ये भवेदिति काणेमहोदयानामभिमतम् ।

## वाचस्पतिमिश्रः –

धर्मशास्त्रसाहित्यमहाम्बरे मिथिलायाः योगदानमतीव महत्त्वपूर्णम् । मिथिलादेशे वाचस्पति- मिश्रनामे द्वावेव पुरुषावास्ताम् । तयोर्मध्ये एकः महान् दार्शनिकः । अस्य रचनाकालः ८४१ विक्रमाब्दो भवति । अनेन सांख्यकारिकायारुपरि सांख्यतत्त्वकौमुदी योगदर्शनस्य व्यासभाष्योपरि तत्त्ववैशारदी, वेदान्तदर्शनस्य शांकरभाष्योपरि भामतीनाम्नी टीका च संपादिता । भारतीयदर्शनसाहित्येऽस्य स्थानमतीव गुरुत्वपूर्णम् ।

अपरो यो वाचस्पतिमिश्रः स तु महाराजाधिराजहरिनारायणस्य राजपरिषदि उपदेष्टृत्वेन आसीत् । धर्मशास्त्रसाहित्येऽस्य योगदानमतीव प्रशंसनीयम् । अनेन चिन्तामणिसंज्ञको बृहत्स्मृतिनिबन्धग्रन्थः प्रणीतः, यत्र एकदशसंख्यकप्रविभागाः सन्ति । हेमाद्रिकृतचतुर्वर्गचिन्तामणेः प्रभावेनैव अनेन न केवलं मैथिलानां कृते अपि तु भारतीयसंस्कृतेः उपासकानां निरतसनातनधर्मावलम्बिनां कृते धर्मशास्त्रस्य विविधभागमाश्रित्य एकः सुविशालो निबन्धग्रन्थो विरचितः । अस्य चिन्तामणिसंज्ञकस्य ग्रन्थस्य प्रत्येको भागः स्वतन्त्रो भवति । ते च यथा- आचारचिन्तामणिः, शुद्धिचिन्तामणिः, विवादचिन्तामणिः, कृत्यचिन्तामणिः, तीर्थचिन्तामणिः, द्वैतचिन्तामणिः, नीतिचिन्तामणिः, व्यवहारचिन्तामणिः, शूद्राचारचिन्तामणिः, आह्निकचिन्तामणिः,

श्राद्धचिन्तामाणिश्चेति । अस्य अपरेऽपि ग्रन्थाः दृश्यन्ते यथा- तिथिनिर्णयः, शुद्धिनिर्णयः, महादाननिर्णयः, द्वैतनिर्णयश्चेति । श्रीमिश्रकृतसप्तहार्णवानामप्युल्लेखो दृश्यते । यथा- कृत्यमहार्णवः, आचारमहार्णवः, विवादमहार्णवः, दानमहार्णवः, व्यवहारमहार्णवः, शुद्धिमहार्णवः, पितृपक्षमहार्णवश्चेति । एषु बहुनिबन्धग्रन्थेषु स्मृतिचिन्तामणिः प्रमुखं स्थानं भजते ।

अनेन रत्नाकर-रुद्रधरयोरुल्लेखो विहितः, अतस्तस्य समयः १४२५ ख्रीष्टब्दात् परं भवेत् । गोविन्दानन्द-रघुनन्दनौ वाचस्पतेः चर्च्चां कृतवन्तौ । अतः सः १५४० ख्रीष्टाब्दात् पूर्वं भवेत्, अतः वाचस्पतिमिश्रः ख्रीष्टीयपञ्चदशशतकस्य मध्यभागीयो भवितुमर्हतीति काणेमहोदयाः प्रमाणयन्ति ।

## श्रीदत्तोपाध्यायः –

धर्मशास्त्रं प्रति मिथिलायाः योगदानमतीव महत्त्वपूर्णम् । योगीश्वरयाज्ञवल्क्यदारभ्य एतावत्पर्यन्तं मिथिलाभूमौ बहूनां सरस्वतिवरपुत्राणां जन्म जातम् । मध्ययुगीयमैथिलस्मृतिनिबन्धकारेषु श्रीदत्तोपाध्यायस्य स्थानमत्युच्चे वर्त्तते । अनेन आचारादर्शः, पितृभक्तिः, श्राद्धकल्पः, समयप्रदीपश्चेत्येते ग्रन्थाः विरचिताः । यजुर्वेदीनां श्राद्धविषयकग्रन्थो भवति पितृभक्तिः । अत्र प्राचीनश्राद्धविधीनामुपरि विचारो विद्यते । श्राद्धकल्पे सामवेदिविद्यार्थिनां कृते श्राद्धविषयाः वर्णिताः सन्ति । रुद्रधरकृतश्राद्धविवेके अनयोर्द्वयो ग्रन्थयोः चर्चा दृश्यते । अत्र बहूनां प्राचीनस्मृतिनिबन्धृणां तत्प्रणीतग्रन्थानाञ्चोल्लेखः प्राप्यते । श्रीदत्तेन कृत्यकल्पतरोश्चर्चा कृता । हरिहर-हलायुधयोर्नाम अप्यत्र चर्चितमस्ति । चण्डेश्वरेण श्रीदत्तस्य नाम स्वग्रन्थे उद्धृतम् । अतोऽयं चतुर्दशशतकस्य प्रथमभागे मिथिलाभूमिमलंकृतवानिति ज्ञायते ।

## नरसिंहवाजपेयी –

अयं तु सुविस्तृतोत्कलभूभागस्यान्तिमस्वाधीननरपतेः मुकुन्ददेवस्य (ख्री० १५५९-१५६८) सभापण्डितरूपेण सुपरिचितः । कौत्सगोत्रोत्पन्नोऽयं नरसिंहमिश्रवाजपेयी अष्टादशस्मृतिनिबन्धग्रन्थान् विरचितवान् । अष्टादशविद्यासु प्रवीणः श्रीवाजपेयी एकः सुमहान् पण्डित आसीदिति तत्कृतग्रन्थाः सुदृढ़ं प्रमाणयन्ति । श्रीशङ्करकृतसंक्षेपशारी

रिकवार्त्तिककर्त्तुः श्रीनृसिंहमिश्रवाजपेयीमहोदयादयमष्टादशप्रदीपकारः नरसिंहवाजपेयी भिन्नः ।

कौत्सगोत्रावतंशः प्रथमः मृत्युञ्जयमिश्रः तत्समयमीमांसार्णवकर्णधार-शुद्धिमुक्ताबलीग्रन्थानां कर्त्ता । गोपीनाथपुत्रेण नारायणेन स्वल्पे वयसि विद्यार्जनं कृत्वा मीमांसाग्रन्थद्वस्योपरि टीकाद्वयं च कृत्वा षोड़शवर्षे पञ्चत्वमवाप्तवान् । नारायणस्य भ्राता जलेश्वरमिश्रः षड्दर्शनेषु प्रवीण आसीत् । तेन जलेश्वरपद्धतिः कृतेति हण्टरमहोदयेन स्वग्रन्थे लिखितम् । तत्पुत्रः नृसिंहमिश्रवाजपेयी संक्षेपशारीरके वार्त्तिकमकरोत् । तदीयभ्राता गङ्गाधरोऽपि धर्मशास्त्रकारः । नृसिंहवाजपेयीपुत्रः देवानन्दः चयनी यज्ञविद्याधुरीणश्चासीत् । तदीयभ्राता बलभद्रः भट्टतन्त्रे निपुणः । अद्वैतचिन्तामणि-शारीरिकसार-पुरुषोत्तमस्तुति-बलभद्रसंग्रहग्रन्थानां कर्त्ता च भवति । तस्य पुत्रः गोदावरः बहूनां चिन्तामणिसंज्ञकानां धर्मशास्त्रनिबन्धग्रन्थानां कर्त्ता । देवानन्दपुत्रः धराधरः प्रसिद्धाग्निहोत्री सच्चरित्रवान विद्वान् आसीत् । तदीयपुत्रः मुरारिः नृसिंहोपासको भवति । स त्वष्टादशप्रदीपग्रन्थकर्त्तुः नरसिंहवाजपेयिनः पिता । अयं स्वज्येष्ठपितृव्यात् विघ्नेश्वरात् विद्यां लेभे । तत् प्रणीताष्टादशसंख्यकप्रदीपसंज्ञकग्रन्थाः यथा- चयनप्रदीपः, भक्तिप्रदीपः, वर्षप्रदीपः, प्रायश्चितप्रदीपः, श्राद्धप्रदीपः, प्रतिष्ठाप्रदीपः, शाबरभाष्यप्रदीपः, प्रतीमाप्रदीपः, शान्तिप्रदीपः, शान्तिकपौष्टिकप्रदीपः, समयप्रदीपः, व्यवस्थाप्रदीपः, नित्याचारप्रदीपश्चेत्येते त्रयोदशग्रन्थानां नाम प्राप्यते । अनेन स्ववंशवर्णनावसरे वारद्वयमुत्कलशब्दः व्यवहृतस्तस्मादुत्कलीय इति प्रमाणीक्रियते । अस्य पाण्डित्यप्रकर्षमतीव प्रशंसनीयम् । अस्य समयस्तु १५२०-१५८० ख्रीष्टाब्दमध्ये भेवेदिति ऐतिहासिवेकन केदारनाथमहापात्रमहोदयेन निर्णयः कृतः ।

## विव्यसिंहमहापात्रः –

दिव्यासिंहो महापात्रोपाधिको वत्सगोत्रीयब्राह्मणः श्रीकृष्णभवानीशङ्करोपासकश्चासीदिति तत्प्रणीतग्रन्थाद् ज्ञायते । अनेन श्रीपुरुषोत्तमक्षेत्रसमीपवर्त्तिविश्वनाथपुरशाशनं स्वजन्मना अलंकृतमिति अनुमीयते । तत्र हि वत्सगोत्रीयब्राह्मणानां प्रोक्तदेवत्रयस्य च प्रतिष्ठानं दृश्यते । वत्सगोत्रीयाः केचन ब्राह्मणाः कुलपरम्परया आचार्योपाधिकाः आसन् । भक्तिभागवतप्रणेता कवि डिण्डिमजीवदेवाचार्यः तत्पिता त्रिलोचनदेवाचार्यश्चेत्यादयस्तद्वंशीयाः राजसम्मानिताः

सामन्तोपाधिधारका: महापात्रपदवीविभूषिताश्चासन् । तस्यैव विख्यातवंशस्य पृष्ठपोषकोऽयं दिव्यसिंहमहापात्र: । अन्यथा अस्य सिद्धान्त: जनानामादरणीयो न भवेत्, अस्य ग्रन्थस्य प्रसारोऽपि न स्यात् । अस्यैव दिव्यसिंहस्य असाधारणपाण्डित्यप्रकर्ष: आसीत् । अस्य पूर्वजा: महान्त: पण्डिता: आसन् । तेषां पूर्वजानां प्रभावो दिव्यसिंहस्योपरि पतित: । येन प्रभावेन प्रभावितो भूत्वा धर्मशास्त्रीयविषयानाश्रित्य तेन ग्रन्था: विरचिता: । एतत्प्रणीतग्रन्था: उत्कलस्य गृहे गृहे प्रचलिता: दृश्यन्ते ।

दिव्यसिंहेन धर्मशास्त्रमाश्रित्य स्मृतिनिबन्धद्वयं लिखितम् । यथा श्राद्धदीप:, कालदीपश्चेति । वस्तुत: कृतिं दृष्ट्वा कर्त्ता अनुमीयते । कर्त्तु: कीदृशं वैशिष्ट्यं कीदृशी च तस्य विद्वत्प्रतिभा चेत्येत्सर्वं तस्मादेव ज्ञायते । दिव्यसिंहकारिकानाम्ना अस्य अपराऽपि कृतिर्विद्यते ।

दिव्यसिंहमापात्र: उत्कलीय इति निर्विवादेन कथयितुं शक्यते । तस्य परिवारस्य पाण्डित्यपरम्परा उत्कले प्रसिद्धिं लब्धा । किम्बदन्त्या ज्ञायते यत् तदीयपूर्वज: कविडिण्डिमजीवदेवाचार्य: प्रहरमात्राभ्यन्तरे श्रीभगवत: पादपद्मं हृदि ध्यात्वा प्रबन्धमेकं रचयितुं षड्दर्शनमतानि खण्डयितुं च समर्थ: आसीदिति । भक्तिभागवतमहाकाव्यकारोऽयं कविडिण्डिमजीवदेवाचार्य: उत्कलस्य सुप्रसिद्धगजपतिप्रतापरुद्रदेवस्य गुरु: आसीत् । तत्पिता श्रीत्रिलोचनदेवाचार्येऽपि उत्कलगजपतिपुरुषोत्त-मदेवस्य गुरु: आसीत् । तद्वंशजत्वेन श्राद्धदीपकारो दिव्यसिंहोऽपि उत्कलीय इति मुक्तकण्ठेनोद्घोषयितुं शक्यते । धर्मशास्त्रनिबन्धृणा अनेन दिव्यसिंहेन स्वग्रन्थादौ विघ्ननिवारणार्थं द्वयो: ग्रन्थयो: मङ्गलाचरणमुपस्थापितम् ।श्रीयादवेन्द्रनाथरायदेवशर्मणा दिव्यसिंहवि-रचितश्राद्धदीपस्य प्राक्शंसने दिव्यसिंहोऽययुत्कलप्रदेशगङ्गामण्डले आविर्भूय कालदीप-श्राद्धदीपनामानौ द्वौ स्मृतिनिबन्धग्रन्थौ विरचितविति लिखितम् ।

दिव्यसिंहकृतकालादीपस्योपरि ''तेजनी'' नाम्नीं टीकां कृत्वा १९८२ तमे ख्री. वर्षे मुद्रयित्वा प. कुलमणिमिश्रशर्मणा प्रकाशितम् । कोलकातास्थ एसिआटिक्सोसाइटिद्वारा श्राद्धदीप: १९७७ तमे बर्षे प्रकाशित: । सप्तदशशतकमध्यभागीयविश्वनाथमिश्रस्य स्मृतिसारसंग्रह-नामकग्रन्थात् दिव्यसिंहेन स्मृतिवचनान्युद्धृतानि । अष्टादशशतकीयगदाधरेणापि दिव्यसिंहकृतात् ग्रन्थात् प्रमाणवचनानि

गृहीतानि, तस्मात् सप्तदशशतकस्य द्वितीयार्द्ध एव दिव्यसिंहस्य समयो भवेदित्यनुमीयते । परन्तु दिव्यसिंहस्य समयविषये विभिन्नेभ्यः इतिहाससंबलितग्रन्थेभ्यो मतानि प्राप्यन्ते । तत्रादौ ऐतिहासिकेन केदारनाथमहापात्रमहोदयेन लिखितं यत् सप्तदशशतकस्य प्रथमो भाग एव दिव्यसिंहस्य समयो वर्त्तते । पं. श्रीनीलमणिमिश्रेण दिव्यसिंहस्य कालनिर्णय इत्थं कृतो यत्- उत्कलीयधर्मशास्त्रनिबन्धकारस्य श्रीमतो दिव्यसिंहस्य समयः सप्तदशशतकस्यान्तिमभागो भवेत्, यतो हि विश्वनाथमिश्रस्य स्मृतिवचनानि स्वग्रन्थे दिव्यसिंहेन उद्धृतानि । अतो दिव्यसिंहः ख्रीष्टीयसप्तदशशतकीय इति निश्चीयते ।

## गदाधरराजगुरुः –

उत्कलीयधर्मशास्त्रनिबन्धकारेषु गदाधरराजगुरुः सुप्रसिद्धः । अस्य पितामहः श्रीकृष्णमहापात्रवाजपेयी खोर्धानरपतेः बृहत्पण्डितविरुदं प्राप्तवान् । स नीतिरत्नाकराख्यमेकं धर्मशास्त्रं रचितवान् । अस्य श्रीकृष्णराजगुरोः त्रयः पुत्राः आसन् यथा- हलधरः, नीलाम्बरः, यमेश्वरश्चेति । ज्येष्ठः हलधरः शारदवाजपेययागं कृत्वा राज्ञः हरेकृष्णदेवस्य गुरुः संजातः । तत्सकाशात् पुरीनगर्याः उपकण्ठे एकं ग्रामं प्राप्तवान् । तस्य नाम वीरहरेकृष्णपुरशासनमिति। नीलाम्बरः बहुशास्त्रवित् भगवतो जगन्नाथस्य स्नानोत्सवस्त्रोत्रकर्त्ता चासीत् । स गजपतिहरेकृष्णदेवस्य (१७१५-१७१८) राजगुरुः आसीत् । गदाधरराजगुरोः पिता अयं नीलाम्बरराजगुरुः माता च जानकीदेवी । गदाधरराजगुरोः वंशपरम्परायां सर्वेषामेव महान् पाण्डित्यप्रकर्षः आसीत् । अयं गदाधरः ब्रिटिश्शासकानां राजत्वकालात्पूर्वं संस्कृतसाहित्यराजमार्गस्य शेषदीपस्तम्भः आसीदिति ऐतिहासिकेन केदारनाथमहापात्रेण लिखितम् । तदीयवंशधरो जयकृष्णराजगुरुः ब्रिटिश्शासनविरोधेन विद्रोहं कृत्वा उद्बन्धनदण्डेन दिवं गतः । अतः परं उत्कलीयसंस्कृतसाहित्यगगनमन्धकाराच्छन्नं जातम् । एतावता यावन्तो धर्मनिबन्धकाराः उत्कलेषु जातास्तेषु गदाधरराजगुरुः वस्तुगत्या स्वग्रन्थविस्तारदृष्टाया च लोकानां जीवनप्रवाहेण सह जीवितोऽस्ति ।

नरसिंहवाजपेयिनोऽनुकरणेन तत्प्रणीताष्टादशप्रदीपप्रभावेण च गदाधरः सारसंज्ञकाष्टादशग्रन्थान् लिखितवान् । अस्य ग्रन्थस्य नाम गदाधरपद्धतिः । अत्र आचारसारः, कालसारः, दानसारः, व्रतसारः, विवाहसारः, संस्कारसारः, शुद्धिसारः, स्नानसारश्चेत्येतेषु प्रमुखाः

भवन्ति । अन्येषां नामानि नैवावाप्यन्ते । एषु आचारसारकालसारौ एसियाहाटिक्सोसाइटिद्वारा प्रकाशितावास्ताम् । परन्तु आचारसारस्य मुद्रितरूपं न प्राप्यते । अत: कालसार: सर्वेषां दृष्टिपथारूढ़ो भवति । अयमुत्कलीय इत्यत्र नास्ति कस्यापि वैमत्यम् । यतो हि अनेन स्वग्रन्थे उत्कलीयव्रतोत्सवानामुल्लेखो विहित: । अस्यायं कालसारसंज्ञको ग्रन्थ उत्कलस्य गृहे गृहे सर्वै: समाद्रियते । तत्कृताचारसारे कालसारे च तस्योत्कलीयत्वं द्योतयितुं बहूनि प्रमाणानि प्राप्यन्ते ।

कालसारकार: गदाधरराजगुरु: भोइवंशीयराज्ञो गजपतिहरेकृष्णदेवस्य सभापण्डित: आसीत् । हरेकृष्णदेवस्य राजत्वकाल: १७१५-१७१९ ख्रीष्टाब्दं यावत् । अत: पं. नीलमणिमिश्रमतानुसारं गदाधरस्य समय: १७१०-१७३० ख्रीष्टाब्दमध्ये भवेत् । पं. कुलमणिमिश्रपादैस्तु चतुरङ्गाख्योत्कलभाषानिबद्धपत्रिकायां गदाधर: हरेकृष्णदेवस्य समवयस्क: अथवा तत्परवर्त्ती आसीदिति लिखतम् । ऐतिहासिकेन केदारनाथमहोदयेन च लिखितं यत् गदाधर: ब्रिटिश्शासनात्पूर्वं संस्कृतसाहित्यराजमार्गस्य शेषदीपस्तम्भ आसीदिति । एतेन गदाधरस्य ब्रिटश्शासनपूर्वकालत्वं व्यज्यते । अत: स्पष्टं भवति यत् गदाधर: अष्टादशशतकीय इति ।

स्वानुशीलनप्रश्नाः

१. ''कल्पतरु:'' इति कस्य ग्रन्थस्य नामान्तरम् ?

उ:- ...........................................................

ख) संस्कृतसाहित्यराजमार्गस्य शेषदीपस्तम्भ: क: आसीत् ?

उ:- ...........................................................

## सारांश:

प्रियपाठका: ! अस्मिन् अंशे निबन्धशब्दार्थ: व्युत्पत्तिश्च प्रतिपादिता । स्मृतिनिबन्धसाहित्यस्योद्भव: क्रमिकविकासश्च सम्यक् प्रतिपादित: । तत्र स्मृतिनिबन्धानां निर्माणे निबन्धृणामुद्देश्यमपि सम्यक् उल्लिखितम् । देशभेदेन कालभेदेन च के के स्मृतिनिबन्धार: सन्ति,

तेषाञ्च वे निबन्धग्रन्थाः सन्तीति प्रतिपादितम् । तत्र तावत् प्रमुखस्मृतिनिबन्धॄणां परिचयोऽपि यथासाध्यमत्र प्रदत्तोऽस्ति ।

## पारिभाषिकशब्दाः

१) निबन्धः - A kind of Composition

२) व्यवहारः - Case, विवादपदम् ।

३) दायभागः - The division of paternal wealth.

४) हिन्दुविधिः - Hindu Law.

५) विवेकतीर्थः - उपाधिविशेषः ।

६) जगद्गुरुविरुदम् - जगद्गुरूपाधिम् ।

७) आह्निकम् - प्रत्यहकर्त्तव्यं सन्ध्यावन्दनादिकम् ।

८) वर्त्तिकम् - व्याख्यानग्रन्थविशेषः, A kind of expository text.

९) शारदवाजपेयः - वैदिकयागविशेषः ।

१०) उद्बन्धनः - Hanging, दण्डविशेषः ।

## निबन्धात्मकप्रश्नाः

क) स्मृतिनिबन्धसाहित्यस्य क्रमिकविकासं विलिख्य तत्कालञ्च प्रतिपादयत ।

ख) माधवाचार्यस्य देशकालनिरूपणं कुरुत ।

ग) द्वयोरुत्कलीयस्मृतिनिबन्धकारयोः संक्षिप्तं परिचयं लिखत ।

## विश्लेषणात्मकप्रश्नाः

१) निबन्धशब्दस्य व्याख्यां कृत्वा अर्थं लिखत ।

२) हेमाद्रेः परिचयं सप्रमाणं प्रतिपादयत ।

३) चण्डेश्वरकृतग्रन्थानां परिचयं वर्णयत ।

४) जीमूतवाहनस्य वङ्गीयत्वं स्पष्टयत ।

५) गदाधरराजगुरोरुत्कलीयत्वं प्रमाणयत ।

## लघुप्रश्नाः

१) कमलाकरभट्टस्य कृतीनां नामानि कानि ?

२) धर्मरत्ने के के ग्रन्था अन्तर्भवन्ति ?

३) चतुर्वर्गचिन्तामणेः खण्डानां नामानि कानि ?

४) वाचस्पतेः चिन्तामणिसंज्ञकाः के ग्रन्थाः ?

५) गदाधरस्य प्रमुखा के सारसंज्ञकाः ग्रन्थाः ?

## एकाङ्कप्रश्नाः

क) निबन्धस्य का व्युत्पत्तिः ?

ख) स्मृतिनिबन्धसाहित्यस्य कः कालः ?

ग) सान्धिविग्राहिकोपाधिः कस्य आसीत् ?

घ) चतुर्वर्गचिन्तामणेः नामान्तरं किम् ?

ङ) विद्याण्यमहामुनिः कः ?

च) स्मार्तभट्टाचार्यनाम्ना वङ्गे कः प्रसिद्धः ?

छ) पारिभद्रकुलोत्पन्नः कः ?

ज) स्मृतिरत्नाकरः कस्य कृतिः ?

झ) विवेकतीर्थोपाधिः कस्य आसीत् ?

ञ) भगवन्तभास्करः केन विरचितः ?

## एकाङ्कप्रश्नानामुत्तराणि

क) निबध्नातीति निबन्धः ।

ख) एकादशशतकादारभ्य ऊनविंशशतकं यावत् ।

ग) लक्ष्मीधरस्य ।

घ) हेमाद्रिः ।

ङ) माधवाचार्यः ।

च) रघुनन्दनः ।

छ) जीमूतवाहनः ।

ज) चण्डेश्वरस्य ।

झ) माधवाचार्यस्य ।

ञ) नीलकण्ठभट्टः ।

❖❖❖

# अंशः - दशमः

संरचना

१०.१ . प्रस्तावना
१०.२. उद्देश्यम्
१०.३ .प्रकीर्णकप्रकरणम्
१०.४. स्मृतिकाराः
१०.५.भाष्यकाराः
१०.६. स्मृतिनिबन्धकाराः

## १०.१ . प्रस्तावना

धर्मशास्त्रस्य क्षेत्रमतीव विस्तृतम् । वेदानन्तरं शास्त्रस्यास्य प्रामाण्यं सर्वैः निर्विवादेन स्वीक्रियते । ''वादे वादे जायते तत्त्वबोधः'' इति न्यायेन शास्त्रस्यास्य मन्थनं यदि सम्यक् क्रियते तर्हि तज्जनिततत्त्वानामवबोधो भवति । तस्याध्ययनद्वाराऽस्माभिः यद् ज्ञायते तदपेक्षया अधिकं किमपि तत्त्वं तत्र निहितमस्तीति शास्त्रज्ञाः वदन्ति । अत इतः पूर्वम् अस्माभिः प्रत्येकास्मिन् अंशे ये ये विषयाः प्रतिपादिताः, तदपेक्षया अधिकाः नूतनाश्च विषयाः धर्मशास्त्रे सन्ति । परन्तु ते प्रसिद्धाः न भवन्ति । शास्त्रस्यास्यालोडनेन त एव विषयाः सम्यग्रूपेण दृष्टिपथारूढाः भवन्ति । तेषामेव अप्रसिद्धानाम् अदृष्टानाम् पूर्वमप्रतिपादितानां सूत्रस्मृति-भाष्य-निबन्धकाराणां विषये किमपि प्रतिपादयितुमस्य प्रकरणस्यायमारम्भः क्रियते ।

## १०.२. उद्देश्यम्

प्रियपाठकाः ! अंशेऽस्मिन् भवन्तः अधोलिखातान् विन्दून् आलोचयिष्यन्ति । -

- प्रकीर्णकशब्दार्थं ज्ञातुं प्रभवन्ति
- प्रकीर्णकप्रकरणे के विषयाः अन्तर्भवन्तीति ज्ञातुं शक्नुवन्ति ।
- अप्रसिद्धान् धर्मशास्त्रकारान् ज्ञातुं प्रभवन्ति ।

- पूर्वमप्रतिपादितानां सूत्र-स्मृति-भाष्य-निबन्धकारन् अपि ज्ञातुं शक्नुवन्ति ।
- तेषाञ्च धर्मशास्त्रे विभिन्नेषु विषयेषु कथं योगदानमिति ज्ञातुं प्रभवन्ति ।

## १०.३ .प्रकीर्णकप्रकरणम्

प्रकीर्णकविषये नारदेन मिताक्षरायामुक्तं यत्- ''न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णके'' इति । अर्थात् इतः पूर्वं यत्सर्वं नालोचितं तत्सर्वमत्र प्रकीर्णकप्रकरणे समागच्छन्ति । पूर्वोक्तेषु नवसु अंशेषु येषां धर्मसूत्रकाराणां स्मृतिकाराणां भाष्यकाराणां स्मृतिनिबन्धकाराणाञ्च विषये विचारो नैव विहितस्ते सर्वेऽपि विषया अत्र संक्षेपेण क्रमश आलोच्यन्ते –

## धर्मसूत्रकाराः

### हारीतः –

धर्मसूत्रपरम्परायां हारीतस्य नाम प्रमुखधर्मशास्त्रकारेषु सादरेण गृह्यते । धर्मसूत्रस्यास्य प्रामाण्यमपि धर्मसूत्रान्तरवदस्ति । यद्यपि धर्मसूत्रमिदं न सम्पूर्णतया प्राप्यते तथापि अस्य प्राचीनतायाः आभासः धर्मसूत्रादस्मात् भवत्येव । कुमारिलेन गौतमेन सह हारीतस्य गणना कृता: । विश्वरूपादयः भाष्यकाराः अस्य नाम उद्धरन्ति । हारीतधर्मसूत्रे ''कपोल्ल'' ''कपेल्ल'' वेति काश्मीरशब्दः आगच्छति । येन हारीतः काश्मीरवास्तव्य इत्युच्यते । काणेमतानुसारं अस्य हस्तलिखितमातृका नासिकवास्तव्यवामनशास्त्रीइस्लमपुरकरेण प्राप्ताऽऽसीत् । या सम्प्रत्यपि अप्रकाशितरूपेण वर्त्तते । धर्मद्रुमकारेण अस्य कालः ख्री.पू. ५००-३०० मध्ये स्थापितः ।

### हिरण्यकेशि –

धर्मसूत्रसाहित्याकाशे हिरण्यकेशिधर्मसूत्रस्य स्थानमन्यतमेव । धर्मसूत्रमिदं हिरण्यकेशिकल्पस्य षड्विंशतितमे सप्तविंशतितमे वा प्रश्ने वर्त्तते । आपस्तम्बधर्मसूत्रस्य बहूनि सूत्राणि अत्रावाप्यन्ते । अत्र धर्मसूत्रग्रन्थोयं न स्वतन्त्रग्रन्थ इति वक्तुं शक्यते । हिरण्यकेशीणब्राह्मणा अद्यापि रत्नगिरिमण्डले वर्त्तन्ते । महार्णवानुसारं हिरण्यकेशिनः

सह्याद्रिपर्वतस्य परशुरामक्षेत्रे कोङ्कणस्य दक्षिणपश्चिमस्यां दिशि तिष्ठन्ति । कोंगूराज्ञः दानपत्रेऽपि हिरण्यकेशीयब्राह्मणानां चर्चा दृश्यते । अतः धर्मसूत्रकारस्य हिरण्यकेशिनः स्थानं रत्नगिरिसह्याद्रि-परशुरामक्षेत्रयोः दक्षिणपश्चिमस्यां दिशि कोंगूराज्यं वा स्यादित्यनुमीयते । उद्धरणानामाधारेण अस्य समयः ख्री. पू. ४००-२०० मध्ये भवेत् ।

## वैखानसः –

गौतम-बौधायनयोरनन्तरं वैखानसधर्मसूत्रस्य रचना अभूत् । यत्तु वैखानसधर्मप्रश्नत्वेन परिचितम् । महादेवेन सत्याषाढश्रौतसूत्रस्य वैजयन्तीटीकायां वैश्वानसश्रौतसूत्रस्य चर्चा विहिता । वैखनसशब्दः वानप्रस्थाश्रमवाचको भवति । परन्तु मनु-बौधायन-वसिष्ठादीनां मतानुसारं त एव वैखानसाः, ये वैखानसमतं स्वीकुर्वन्ति । वैखानसधर्मप्रश्नः वैखानसश्रौतसूत्रं चेति द्वे एव कृती प्रसिद्धे भवतः वैखानसनाम्ना । वैखानसस्य कालविषये न कुत्रापि किमपि प्रमाणमवाप्यते ।

## उशना –

धर्मसूत्रकारेषु उशनसो नाम प्राप्यते । याज्ञवल्क्यस्मृतौ धर्मसूत्रकारत्वेन उशनसो नाम विद्यते । महाभारतानुसारं कौटिल्यानुसारं च उशना महान् राजनीतिवेत्ताऽऽसीत् । मुद्राराक्षसनाटके औशनसदण्डनीतेः, याज्ञवल्क्यस्मृतेः विश्वरूपकृतटीकायाञ्च उशनसः चर्चा वर्त्तते । मनुस्मृतिभाष्यकारेण मेधातिथिना उशनसः श्लोकद्वयमुद्धृतम् । टीकाकारेण कुल्लूकेन, याज्ञवल्क्यस्मृतिटिकाकारेण विज्ञानेश्वरेण च उशनसः चर्चा कृता । यद्यपि उशनसः देशविषये किमपि प्रमाणं नैव प्राप्यते तथापि डेकान्महाविद्यालये औशनसधर्मशास्त्रस्याप्रकाशिते द्वे मातृके वर्त्तेते । अस्य कालविषये न किमपि प्रमाणमवाप्यते ।

स्वानुशीलनप्रश्नाः
१) कः प्रकीर्णशब्दार्थः ?
उ ..........................................................
२) हिरण्यकेशीयाः कुत्र तिष्ठन्ति ?
उ ..........................................................

## १०.४. स्मृतिकाराः

### बृहस्पतिः -

स्मृतिशास्त्रप्रयोजतेषु बृहस्पतेर्नाम अन्यतममस्ति । अयं स्मृतिकारत्वेन सूत्रकारत्वेन च सर्वत्र सुधिजनविदितोऽस्ति । परन्तु सम्प्रति बृहस्पतिस्मृतेः काऽपि सत्ता नैव दृश्यते । बहुषु प्राचीनतमग्रन्थेषु बृहस्पतेर्नामोल्लेखो दृश्यते । डा० जालिमहोदयेन स्वकीयपरिश्रमबलेन विभिन्नेभ्यः ग्रन्थेभ्यः प्रमाणवचनानि संगृह्य प्रायशः ७११ परिमिताः श्लोकाः एकत्रीकृताः । परन्तु मनसुखरायमोरप्रकाशिते स्मृतिसन्दर्भे केवलमात्रं ८१ संख्यकाः श्लोकाः सन्ति । यत्र केवलमात्रं सुवर्णपृथ्वीदानयोः फलं वर्णितमस्ति । योगीश्वरयाज्ञवल्क्ये स्वकीये स्मृतिग्रन्थे धर्मास्त्रकाराणां नामगणनाप्रसङ्गे बृहस्पतेरपि नामोल्लेखो विहितः । अयं बृहस्पतिः व्यवहारविज्ञाने निपुणः आसीन् । विषयवस्तुनः परिशीलनेन अनुमीयते यत् बृहस्पतिः मनुमतावलम्बी भवतीति । यतो हि मनुस्मृतेः बहून् श्लोकान् स्वग्रन्थे बृहस्पतिरुद्धरति ।

अस्य कालनिर्द्धारणे इदमेव काठिन्यं भवति यत् किं देवगुरुः बृहस्पतिः स्मृतेरस्याः रचयिता उत मनु-याज्ञवल्क्य-नारदादीनां स्मृतिकाराणां परवर्त्ती अपरः कश्चिदयं बृहस्पतिरिति । महाभारते बृहस्पतेः नाम बहुवारभागच्छति । क्वचिद् अर्थशास्त्रकारत्वेन, क्वचिद् धर्मसूत्रकारत्वेन, क्वचित् स्मृतिकारत्वेन, क्वचिच्च देवगुरुत्वेन । परन्तु बहुरूपधारी कश्चन एक एव बृहस्पतिरयं न भवति । स्मृतेरस्याः समयनिर्धारणं स्मृतिशास्त्रकारैः इतिहासकारैश्च मनु-नारदयोरनन्तरमेव प्रतिपादितम् । मनोरपेक्षयाऽनेन अधिकं किञ्चित् लिखितमिति ज्ञायते । अत्र नाणक-दीनार-शबयोरुल्लोखोऽपि दृश्यते । डा० जालिमहोदयेन षष्ठसप्तमशतकयोः मध्यवर्त्ती अयं बृहस्पतिरिति प्रतिपाद्यते ।

काणेमहोदयेन त्वस्य समयः २००-४०० ख्रीष्टाब्दं यावद् भवेदिति प्रतिपादितम् ।

## अङ्गिराः -

याज्ञवलक्यस्मृतौ दर्मशास्त्रकाराणां नामगणनायां आङ्गिरसः नाम आयाति । मद्रास्थस्य थियोसोफिक्लसोसाइटिअधीनस्थस्य अड्यारपुस्तकालयस्य साहाय्येन प्रकाशिते स्मृतिसंदर्भे आङ्गिरसः स्मृतिः भागद्वयेन विभक्ता जीवानन्दसंग्रहे याः आङ्गिरसस्मृतिः, तत्र केवलमात्रं ७२ परिमिताः श्लोकाः समुपलब्धाः भवन्ति । परन्तु मनसुखरायमोरमहोदयेन आङ्गिरसस्मृतेः बृहत्संस्करणं प्रस्तुतम् । यत्र पूर्वाङ्गिरसि ११३ परिमिताः श्लोकाः, उत्तराङ्गिरसि च १६४ संख्यकाः श्लोकाः द्वादशाध्यायश्च सन्ति ।

याज्ञवलक्येन स्वस्मृतौ धर्मशास्त्रप्रयोजकानां नामगणनावसरे आङ्गिरसः नामोल्लेखो विहितः । याज्ञवलक्यस्मृतेः प्रसिद्धटीकाकारेण विश्वरूपेणापि आङ्गिरसः वचनं प्रमाणत्वेन स्वीकृत्य स्वसिद्धान्तोऽपि प्रदत्तः । नवमशतकात्प्रागेव सम्भवतो ग्रन्थोऽयम् अङ्गिरसा प्रणीतः । एतदर्थं परवर्त्तिकाले विश्वरूपादयः प्रामाणिकग्रन्थत्वेन स्वीकृत्य स्मृतेरस्याः बहून् श्लोकानुद्धृतवन्तः । परन्तु भाषाशैल्या विषयप्रतिपादन-दृष्ट्या च ग्रन्थोऽयं षष्ठशतकस्य निकटवर्त्तिकाले भवेदित्यनुमीयते । शैलीदृष्ट्या स्मृतिरियं याज्ञवलक्यस्मृतेरनन्तरमेव भवितुमर्हति । ब्राह्मणानां महत्त्ववर्णनेनैव स्मृतेरस्याः पर्यवसानं भवति । यथा-समस्तसम्पत्समवाप्तिहेतवः समुत्थितात्पत् कुलधूमकेतवः ।

**अपारसंसारसमुद्रसेतवः पुनन्तु मां ब्राह्मणपादपांसवः ।। इति ।।**

## दक्षः -

याज्ञवलक्येन दक्षः धर्मशास्त्रकारत्वेन गृहीतः । विश्वरूपेण विज्ञानेश्वरेण तु दक्षस्य बहवः श्लोकाः उद्धृताः । मनसुखराममोरमदोदयप्रकाशिता या दक्षस्मृतिः तत्र सप्त अध्यायाः सन्ति । अत्र २०८ परिमिताः श्लोकाः सन्ति । दक्षस्य केचनोपादेयश्लोकाः प्रायशः बहुभिः टीकाकारैः उद्धृताः- यथा-

**आयुर्वितं गृहच्छिद्रं मन्त्रमैथुनभेषजम् ।**
**तपोदानापमानौ च नवगोप्यानि यत्नतः ।।**
**सामान्यं याचितं व्यासं आधिदाराश्च तद्धनम् ।**

**क्रमायातञ्च निक्षेप: सर्वस्वञ्चान्वये सति ।।**
**आपत्स्वपि न देयानि नववस्तूनि सर्वदा ।**
**यो ददाति स मूढात्मा प्रायश्चित्तीयते नर: ।।**
**न क्लेशेन विना द्रव्यं द्रव्यहीने कुत: क्रिया**
**क्रियाहीने न धर्म: स्याद्धर्महीने कुत: सुखम् ।**
**सुखं वाञ्छन्ति सर्वे हि तच्च धर्मसमुद्भवम् ।**
**तस्माद्धर्म: सदा कार्य: सर्ववर्णै: प्रयत्नत: ।।**
**पत्नीमूलं गृहं पुंसां यदि छन्दोनुवर्त्तिनी ।**
**गृहस्थाश्रमसमं नास्ति यदि भार्या वशानुगा ।।**

विश्वरूप-विज्ञानेश्वरापरार्कादय: सुप्रसिद्धा: प्राचीनटीकाकारा: स्मृतेरस्या: प्रामाण्यं स्वीकुर्वन्ति । प्रायश: नवमशतकात्प्रागेन ग्रन्थोऽयं लोकलोचनमागत: प्रशंसितश्च जात: । अनुमीयते यत् योगीस्वरस्य समयेबृहद्दक्षस्मृते: रचनाऽभूदिति, यस्या: संक्षिप्तसंस्करणं सम्प्रति प्राप्यते । आचार्यराजेन्द्रप्रसादपाण्डेमतानुसारं ग्रन्थस्यास्य समय: षष्ठाष्टमशतकयो: मध्यभागे एव भवितुमर्हति ।

## व्यास: -

स्मृतिकारेषु व्यासोऽपि अन्यतम: । जीवानन्दसंग्रहे आनन्दाश्रमे च या व्यासस्मृति: प्राप्यते तत्र चत्वार अध्याया: १५० परिमिता: श्लोकाश्च सन्ति । मनसुखरायस्य स्मृतिसन्दर्भे या व्यासस्मृति: प्रकाशिता वर्त्तते तत्र २४१ संख्याका: श्लोका: सन्ति ।

मेधातिथिविश्वरूपादिभि: व्यासकृता: श्लोका: प्रमाणत्वेन गृहीता:, यानि तु प्रमाणानि महाभारतेऽपि दृश्यन्ते । व्यवहारविधेरूपरि व्यासेन केचन श्लोका: विरचिता:, येषां संकेत: स्मृतिचन्द्रिकायां प्राप्यते । अपरार्कोऽपि व्यवहारप्रसङ्गे व्यासस्मृतिं स्मरति । व्यासस्मृतौ पुराणेतिहासानां बहुचर्चा दृश्यते । महाभारतीयश्लोकै: सह स्मृतेरस्या: बहुषु साम्यं वर्त्तते । अत: आस्या: रचनाकाल: द्वितीयशताब्दे: पूर्वभागे भवितुं नार्हति । द्वितीयशताब्दित: पञ्चमशताब्द्यभ्यन्तरे स्मृतेरस्या: रचना अवश्यमेव भवेत् । लघुव्याससंहिता स्मृतिरपि सम्प्रति समुपलभ्यते । अत्र अध्यायद्वयमस्ति । प्रायश: १२३ परिमितै: श्लोकै: सकलस्नानविधि-सन्ध्याविधि-कर्त्तव्यविशेषाणां विचारो वर्त्तते । व्यासस्मृतिवत् लघुव्यासस्मृतावपि तादृशी शैली प्राप्यते । बल्लालसेनेन

दानसागरे महाव्यास-लघु-व्यास-दानव्यासानां नामान्युल्लिखितानि । मिताक्षरायां बृहद्व्यासस्य नाम प्राप्यते ।

## हारीत: -

बहुप्राचीनकालादारभ्य धर्मशास्त्रकारत्वेनास्यां भारतीयपरम्परायां हारीत: सुप्रसिद्ध: आसीत् । योगीश्वरयाज्ञवल्क्योऽपि विंशतिधर्मशास्त्रप्रयोजवकेषु हारीतस्य नामोल्लेख: कृत: । हारीतनाम्ना स्मृतिद्वयं समुपलभ्यते । लघुहारीतस्मृति:, बृद्धहारीतस्मृतिश्चेति । लघुहारीतस्मृतौ सप्त अध्याया: १९२ परिमिता: श्लोकाश्च सन्ति । बृद्धहारीतीये तु अष्टावध्याया: २५२९ परिमिता: श्लोकाश्च सन्ति । स्मृतिकारोऽयं हारीत: परमवैष्णव: परमधर्मज्ञश्च आसीत् । राज्ञा अम्बरीषेण धर्मविषये हारीत: पृष्ठ: । तदनन्तरं हारीतेन धर्मशास्त्रस्य विविधभागानाश्रित्य विचार: कृत: । हारीतस्मृतौ मनु-भृगु-वसिष्ठ मरीचि-दक्ष-अङ्गिरा-पुलह-पुलस्त्य-अत्रिप्रभृतीनां धर्मशास्त्रकाराणां नामानि वर्त्तन्ते । एनमेव हरीतं जगद्गुरुरूपेण संवोध्य राज्ञा अम्बरीषेण प्रणाम: कृत: । हारीतस्य राजधर्म-दण्डधर्मादिविषया: याज्ञवल्क्यस्मृतौ समाना: सन्ति । स्मृतिचन्द्रिकाया: व्यवहारविधौ हारीतस्य श्लोक उद्धतो वर्त्तते -

**स्वधनस्य यथा प्राप्ति: परधनस्य वर्जनम् ।**
**न्यायेन यत्र क्रियते व्यवहार: स उच्यते ।।**

हरीतेनापि नारद-कात्यायनयो: नाम स्वग्रन्थे उद्धतम् । नारदस्मृतिवत् हारीतेनापि व्यवहारस्य चत्वारि स्वरूपाणि निर्दिष्टानि । यथा- धर्म:, व्यवहार:, चरित्रं, नृपाज्ञा चेति ।

नारद-कात्यायनयो: समकालिकोऽयमिति केचन कथयन्ति । परन्तु अपरे नारद-कात्यायनापेक्षया हारीतोऽयम् अर्वाचीन इति प्रतिपादयन्ति । बैष्णवधर्मस्याभूतपूर्वचर्या अनेन कृता । तदनुसारमस्य समय: प्रतिविम्बितो भवति । ४००-७०० ख्रीष्टाब्दमध्ये अवश्यमियं स्मृति: हारीतेन विरचिता इति निर्णयितुं शक्यते ।

## संवर्त्त: -

संवर्त्त: सुप्रसिद्धस्मृतिकारत्वेन गण्यते । योगीश्वरोऽपि स्वस्मृतौ संवर्त्तस्य नाम स्मृति कर्त्तृषु गृहीतवान् । अपरार्क-मेधातिथि-विज्ञानेश्वर-हरदत्तविश्वरूपादय: स्वस्वग्रन्थेषु संवर्त्तस्य वचनानि उद्धववन्त: ।

व्यवहारविज्ञानसम्बन्धे संवेर्त्तन स्वस्मृतौ बहुविचार: कृत: । लेख्यप्रमाणप्रसङ्गे तेनोक्तं यत् लेख्यप्रमाणं यत्र मूलरूपेण विद्यते तत्र मौक्षिकवचनस्य महत्वं नैव तिष्ठति । स्थलविशेषेष्वपि लेख्यप्रमाणं दुर्बलं भवति । यथा-

**भुज्यमाने गृहक्षेत्रे विद्यमाने तु राजनि ।**
**भुक्तिर्यस्य भवेत्तस्य न लेख्यं तत्र कारणम् ।**

जीवनानन्दसंग्रहे आनन्दाश्रमे च वंवर्त्रस्मृतौ क्रमश: २७०,२३० परिमिता: श्लोका: सन्ति । परन्तु सम्प्रति या संवर्त्तस्मृति: प्राप्यते सा संक्षिप्तरूपा भवति । प्रकाश्यमानाया: संवर्त्तस्मृते: बहवो हि अंशा अपरार्कनिबन्धे उद्धृता: सन्ति । मिताक्षरायां बृहत्संवर्त्तस्य नामोल्लेखोऽस्ति । हरिनाथस्य स्मृतिसारे एकस्य लघुसंवर्त्तस्य चर्चा दृश्यते । संवर्त्तस्य समयविषये एतेहासिका: मौनमवलम्बन्ते । यावत्पर्यन्तं गवेषका: ऐतिहासिकाश्च संवर्त्तस्य समयविषये किमपि सुदृढं प्रमाणं नोपस्थापयन्ति तावदेव पर्यन्तमस्य समयनिर्धारणं कष्टसाध्यं भवेदिति ।

## शातातप: -

याज्ञवलक्येन पराशरेण च धर्मशास्त्रप्रयोजवकेषु शातातप: गृहीत: । विश्वरूप- दृश्यत्तापरार्वक्प्रभृतय: स्मृतिनिबन्धार: प्रायश्चित्तविचारदशायां शातातपस्य गद्यभागमुद्धतक्त: । मिताक्षरायां स्मृतिचन्द्रिकायां चास्य श्लोका: उदाहरणरूपेण निबद्धा: सन्ति । जीवनानन्दसंग्रहे कर्मविपाकनाम्ना शातातपस्मृति: प्राप्यते । यत्र षडध्याया: २३१ संख्याका: श्लोकाश्च सन्ति । India Office इत्यस्य पुस्तकानुक्रमणिकायां १३६२ तमसंख्यां शयांतपस्मृति: अस्ति । तत्र द्वादशाध्याया: सन्ति । डेकानकलेजसंग्रहे India Office इत्यस्यानुक्रमणिकायां च वृद्धशातातपस्मृति: वर्त्तते । जीमूतवाहनस्य व्यवहारमातृकायां बृद्धशातातपस्य नामोल्लेखो दृश्यते । एतस्माद् विज्ञायते यद्नेन शातातपेन व्यवहारस्योपरि किमपि विरचितमिति ।

## अत्रि: -

निखिलधर्माचारचरणभास्वरे भारतखण्डे ये तावत् स्मृतिशास्त्रग्रन्था: समुपलभ्यन्ते तत्र धर्मशास्त्र- कारत्वेन स्मृतिकारस्य अत्रे: प्रसिद्धि: वर्त्तते । अस्मावंक भारतदेशे बहव: धर्मशास्त्रग्रन्था: सन्ति, ये नु सम्प्रति

मातृकारूपेण विभिन्नेषु संग्रहालयेषु संरक्षिताः वर्त्तन्ते । आसु हस्तलिखितमातृकासु अत्रिस्मृतिः अन्यतमा । डेकानकलेज्संग्रहे आत्रेयधर्मशास्त्रमपि विद्यते । अत्र नवसंख्यकाः अध्यायाः सन्ति । अत्र आदौ त्रिषु अध्यायेषु श्लोकाः, तदनन्तरमन्येषु अध्यायेषु गद्यं पद्यंच मिलित्वा वर्त्तते ।

वेदान्त-योग-सांख्य-पुराणानां चर्चाऽपि ग्रन्थेऽस्मिन् वर्त्तते । अने सप्तभेदेनैव जातीतामुल्लेखो विहितः । यत्र रजक-चर्मकार-नट-वैवर्त्त-मेद-भिल्ल-बुरुडानां वर्णनं प्राप्यते । विवाहे, मेलायां, वैदिकयज्ञे, उत्सवे च अस्पृश्यतादोषः न भवति । मथुरामगधयोः ब्राह्मणाः यद्यपि बृहस्पतेः समतुल्याः भवन्ति तर्ह्यपि श्राद्धकाले तेषामेव समादरो न भवति । स्मृतेरस्याः केचन स्मरणीयाः श्लोकाः यथा-

**श्रुतिः स्मृतिश्च विप्राणां नयने द्वे प्रकीर्त्तिते ।**
**काणः स्यादेकहीनोऽपि द्वाभ्यामन्धः प्रकीर्त्तितः ।।**
**न श्रुतिः न स्मृतिर्यस्य शीलं नैव कुलं यतः ।**
**तस्य जन्म वृथा ज्ञेयं त्वन्धकस्यात्रिरब्रवीत् ।।**

## यमः -

धर्मशास्त्रकारत्वेन यमस्यापि गणना भवति । इयं यमस्मृतिः बहुप्राचीना । लघुयमस्मृतिबृहद्यमस्मृति-यमस्मृतिरूपेण यमस्मृतिः प्राप्यते । वसिष्ठधर्मसूत्रे यमस्मृतेरुद्धरणानि सन्ति । बहवः । यमस्मृतेः श्लोका अपि मनुस्मृतौ प्राप्यन्ते । एतस्मात् ज्ञायते यन्मनोः प्रभावः यमस्मृतेरूपरि पतित इति । याज्ञवल्क्येनापि यमः धर्मशास्त्रकारत्वेन गृहीतः । लघुयमस्मृतौ केवलमात्रं ९९ परिमिताः श्लोकाः सन्ति । बृहद्यमस्मृतावपि १८२ परिमिताः श्लोकाः वर्त्तन्ते । यमस्मृतौ तु ७८ परिमितैः श्लोकैः चतुर्णां वर्णानां प्रायश्चित्तं शुद्धिश्चेति वर्णितं दृश्यते ।

एतासां सर्वासां यमस्मृतीनां प्रकाशनं मनसुखरायमोरस्मृतिसन्दर्भे चतुर्थभागे जातम् । परन्तु प्राचीनधर्मशास्त्रव्याख्याकाराणां ग्रन्थेषु यानि यमवचनानि सन्ति तानि यद्यपि सम्मिलितानि स्युस्तर्हि यमस्मृतेः कलेवरः बृहदाकारो भवेत् । धर्मशास्त्रस्य विविधविषयाणामुपरि यमेन वचनानि लिखितानि ।

विश्वरूप-विज्ञानेश्वर-अपरार्क-स्मृतिचन्द्रिका-हरदत्त-स्मृतिरत्नाकरप्रभृतिभिः यम-बृहद्यम-लघुयमस्मृतीनामुद्धरणं संगृहीतम् ।

महाभारतेऽपि यमस्य गाथा प्राप्यते । यमेन मनु: आदर्शधर्मशास्त्रकारत्वेन गृहीत: । मनुस्मृते: श्लोकानां किञ्चित् परिवर्त्तनं विधाय अनेन प्रायश्चित्तविचार: कृत: । याज्ञवलक्यकृतप्रायश्चित्तस्यानुसरणं यमेन कृतम् । अतो याज्ञवलक्येनापि अयं प्रभावित इति कृत्वा तदपेक्षयाऽयमर्वाचीन: । तृतीय-षष्ठशतकयो: मध्ये स्मृतेरस्या: रचना जातेति अनुमीयते ।

स्वानुशीलनप्रश्नाः

१.कात्यायनेन पश्चात्कारशब्द: कथं प्रमुक्त: ?

(उ) .....................................

२.कस्यां स्मृतौ बहव उपादेयश्लोका: सन्ति ?

(उ) .....................................

## १०.५.भाष्यकारा:

### असहाय: -

डॉ०. जालीमहोदयेन सम्पादितायां कल्याणभट्टेन च संशोधितायां नारदस्मृतौ असहायभाष्यस्यैकोऽंश: प्राप्यते । अयमेक: सुप्रसिद्धो भाष्यकार इत्यत्र नास्ति केषामपि वैमत्यम् । दौर्भाग्यादस्य भाष्यग्रन्थो न पूर्णरूपेण लभ्यते । मनुस्मृतिभाष्ये मेधातिथिना असहायस्य नामोल्लेखो विहित: । सरस्वतीविलासे विवादरत्नाकरे चासहायो मनुस्मृते: टीकाकाररूपेण उल्लेखोऽस्ति । याज्ञवल्क्यस्मृतिव्याख्यायामपि विश्वरूपेण असहाय: गौतमधर्मसूत्रभाष्यकाररूपेण स्मृतो वर्तते । अनिरुद्धेन स्वहारलतायां गौतमधर्मसूत्रभाष्यकारत्वेन असहाय: स्वीकृत: । उद्धरणानुसारं विज्ञायते यदसहायो मनुस्मृति गौतमधर्मसूत्र-नारदस्मृतीनामुपरि टीका विरचिता इति ।

विश्वरूप-मेधातिथिभ्यामसहाय उदृत:, एतदर्थं तस्य काल: ७००-७५० ख्रीष्टाब्दमध्ये भवितुमर्हति । अस्य देशविषये तादृशं सुदृढं किमपि तथ्यं प्रामाणरूपेण नैवावाप्यते ।

### भर्तृयज्ञ:–

मेधातिथिना भर्तृयज्ञस्योल्लेखः कृतः । गौतमधर्मसूत्रस्य व्याख्याकाररूपेण गदाधरेण च भर्तृयज्ञस्य नामोल्लेखः कृतः । भर्तृयज्ञेन कात्यायनश्रौतसूत्रस्योपरि टीका कृतेति तत्कृतभाष्यादेव ज्ञायते । अस्य समयः ७००-८०० ख्रीष्टाब्दमध्ये भवितुमर्हतीति धर्मद्रुमकारस्याभिमतम् । काणेमतानुसारमस्य कालः ८०० ख्रीष्टसंवत्सरात्पूर्वमेव भवितुमर्हति । अस्य देशविषये न किमपि प्रमाणमुपलभ्यते ।

## भारुचिः -

विज्ञानेश्वरेण मिताक्षरायां भारुचिमतस्योल्लेखः कृतः । पराशरमाधवीये सरस्वतीविलासे च भारुचेः चर्चा दृश्यते । रामानुजाचार्यात्पूर्वं स्थितेषु षट्सु विशिष्टाद्वैताचार्येषु भारुचिः अन्यतमः आसीत् । विष्णुधर्मसूत्रस्य व्याख्या चानेन कृता इति ज्ञायते । आपस्तम्बगृह्यसूत्रभाष्यकारेण सुदर्शनाचार्येणापि एतन्मतानि चर्चितानि । भारुचिः नियोगविधेः समर्थकः आसीत् । मिताक्षरायाः पूर्वं विश्वरूप अस्य समसामयिक आसीदिति कृत्वा अस्य कालः ८००-९०० ख्रीष्टाब्दमध्ये भवितुमर्हति ।

## बालकृष्णभट्टः -

याज्ञवलक्यस्मृतेरूपरि विज्ञानेश्वरेण या मिताक्षरा कृता, तदुपरि अनेन एका टीका विरचिता । तत्कृतटीकायाः नाम लक्ष्मीव्याख्यानम् । यद्यप्ययं दक्षिणभारतीयः तथापि वाराणस्यां स्थित्वा विद्याध्ययनमकरोत् । अस्य कालस्तु १७३०-१८२० ख्रीष्टाब्दमध्ये भवेत् ।

## हरदत्रः -

दक्षिणभारते भाष्यकारः हरदत्तस्तत्कृतटीका च सर्वैः स्मर्यते । तेन गौतममधर्मसूत्रोपरि मिताक्षरानाम्नी टीका कृता । आपस्तम्बधर्मसूत्रस्योपरि उज्वलाव्याख्या च विहिता । आपस्तम्बमृह्यसूत्रस्योपरि अनाविलभाष्यमपि अनेन विरचितम् । आपस्तम्बीयमन्त्रपाठोपरि भाष्यमपि कृतम् । यद्यपि मिताक्षरायाः प्रभावेनायं प्रभावितो भूत्वा अनेकासां स्मृतीनामुदाहरणमानीय स्वग्रन्थो उपस्थापितं तथापि न कस्यापि निबन्धकारस्य नामोल्लेखः स्वग्रन्थेऽनेन विहितः । अस्य कालः मिताक्षराभाष्यकारस्य विज्ञानेश्वरस्यानन्तरमेव

भवेत् । अत एव ११००-१२०० ख्रीष्टाब्दमध्येऽस्य समयो भवितुमर्हति ।

वीरमित्रोदय-प्रयोगरत्न-नारायणभट्टादिभिः हरदत्तस्य मिताक्षरा उद्धृता । दक्षिणभारते ग्रन्थोऽयं सुतरामाद्रियते । अयं शैवसम्प्रदायस्य श्रेष्ठोपासक आसीद्िति स्ववृतग्रन्थमङ्गलाचरणादेव ज्ञायते । प्रायशः सर्वे ग्रन्थाः अनेन दक्षिणभारते विरचिताः ।

## धारेश्वरभोजदेवः -

धारानगर्याः राजा भोजदेवः धारेश्वरभोजदेवनाम्ना प्रख्यातः । अयमनेकेषां विदुषामाश्रयदाताऽऽसीदिति प्रसिद्धिरपि वर्त्तते । सरस्वतीकण्ठाभरणं श्रृङ्गारप्रकाशश्चेति ग्रन्थद्वयं भोजदेवस्य कृतिरिति ज्ञायते । धर्मशास्त्र- ज्योतिषतथ्यसंवलितभुजबलनिबन्धनाम्ना कश्चन ग्रन्थविशेषः अनेन विरचितः । ग्रन्थोऽयमष्टादशाध्यायेषु विभक्तः । अस्य प्रमुखविषयाः यथा-स्त्रीजातकम् कर्णवेधः, संस्कारः, व्रतम्, विवाहे मेलकदशकम्, गृहकर्मप्रवेशः, संक्रान्तिस्नानम्, द्वादशमासकृत्यं चेति । भोजदेवकृतः तत्त्वप्रकाशः त्रिवेन्द्रमात् प्रकाशितोऽस्ति । राजमार्तण्डग्रन्थात् ज्ञायते यत् राजमृगांकनामकः आयुर्वेदज्योतिषसंबलितग्रन्थोऽपि अनेन प्रणीत इति । व्याकरणोपरि एको ग्रन्थ अनेन कृत इत्यपि ज्ञायते । धर्मशास्त्रमाश्रित्य एकः सुवृहद्ग्रन्थोऽपि अनेन विरचितः । भीमपराक्रमनामधेयो ग्रन्थोऽपि अनेन विरचितः । भोजप्रबन्धाद् ज्ञायते यत् धारानगर्यां भोजदेवेन पञ्चपञ्चाशद्वर्षाणि राज्यशाशनं कृतमिति, जयसिंहस्याभिलेखानुसारं (१०५५-१०५६ ख्री.) १०५६ ख्रीष्टाब्दात्पूर्वमस्य कालः स्थापयितुं शक्यते । अतः १०००-१०५६ ख्रीष्टाब्दमध्येऽस्य शासनकालः भवितुमर्हति ।

## देवस्वामिः -

देवस्यामिना स्मृतिसमुच्चयनाम्ना ग्रन्थो विरचितः । देवणभट्टकृतस्मृतिचन्द्रिकातो ज्ञायते यत् आश्वलायनगृह्यसूत्रोपरि नारायणेन यद् भाष्यं विरचितं तदेव देवस्वामिना लिखितमिति । अतः देवस्वामिना आश्वलायनश्रौतसूत्र-गृह्यसूत्रयोरूपरि भाष्यं विरचितमिति । एतादृशः निबन्धग्रन्थोऽयं विरचितः यत्र आचार-व्यवहार-आशौयसम्बन्धिविषयाः वर्णित सन्ति । चतुर्विंशतिमतसंग्रहेऽपि

देवस्वामिमतानामुल्लेखोऽस्ति । स्मृतिचन्द्रिकायामपि व्यवहाराशौचादिविषयेषु विचारो दृश्यते । स्मृतिचन्द्रिकायाः कालः १२००-१२२५ ख्रीष्टाब्दमध्ये भवेत् । अतः देवस्वामिनः कालः १०००-१०५० ख्रीष्टाब्दमध्ये भवेदित्यनुमीयते ।

## गोविन्दानन्दः -

गोविन्दानन्दोऽयं पश्चिमवङ्गस्थमेदिनापुरमण्डलान्तर्गतः आसीत् । तस्य पितुर्नाम गणपतिभट्टः । अनेन क्रियाकौमुदीनामको ग्रन्थो विरचितः । तत्र दान-शुद्धि-वर्षक्रियाकौमुद्यादयोऽनेके भागाः सन्ति । वर्षक्रियाकौमुद्यनुसारं वङ्गदेशे व्रतानि अनुष्ठीयन्ते । श्रीनिवासाचार्यकृतशुद्धिदीपिकोपरि शूलपाणिकृततत्त्वार्थकौमुद्यारुपरि च गोविन्दानन्देन षोडशशतकस्य पूर्वार्द्धे भाष्यं लिखितम् । क्रियाकौमुद्याः रचना अनेन १४३५ तमे ख्रीष्टाब्दे कृता । अतोऽस्य रचनाकालः १४७५-१५४० ख्रीष्टाब्दमध्ये भवेत् । गोविन्दानन्दस्य चर्चा रघुनन्दनेन कृता, अतः क्रियाकौमुद्याः रचना रघुनन्दनात्पूर्वमेव जातेति सिद्ध्यति ।

# १०.६. स्मृतिनिबन्धकाराः

## विश्वेश्वरभट्टः -

राजसिंहासनमारुह्य नृपतिपदे स्थित्वाऽपि मदनपालः विद्यानुरागी संस्कृतप्रेमी चासीत् । स्वशाशनकाले तेन संस्कृतविदुषां कृते बहुसम्मानः प्रदत्तः । संस्कृतस्यापि बहुप्रचारः प्रसारश्च विहितः । देहल्यारुत्तरपार्श्वे यमुनायाः समीपे टाक्राजवंशे मदनपालनामकः गुणिगणमूर्द्धन्यभूतः राजाऽऽसीत् । अस्मिन् समये विद्वद्भिः मदनपालनाम्ना बहवो ग्रन्थाः विमण्डिताः । एवमेव परम्पराक्रमेण विश्वेश्वरभट्टेनापि मदनपालस्याश्रये स्थित्वा तन्नाम्ना मदनपारिजातः कृतः । अत्र बहुषु स्थलेषु स्पष्टतयोल्लेखोऽस्ति यत् ग्रन्थस्यास्य प्रणेता विश्वेश्वरभट्टो भवतीति । यद्यपि अत्र शब्देनैव तन्नामनिर्देशो नास्ति तथापि तद्ग्रन्थात् स्पष्टमनुमीयते । अयं द्रविडदेशीय आसीत् । याज्ञवलक्यस्मृतेः मिताक्षरायारुपरि सुबोधिनीनाम्नी टीका विश्वेश्वरभट्टेनैव विरचितेति मन्यते । अस्मादपि ज्ञायते यद् विश्वेश्वरभट्टः दक्षिणदेशं विहाय काशीं प्रति आगतवान्निति । तत्र बहुषु निबन्धकारेषु विश्वेश्वरभट्टस्य स्थानमन्यतममासीत् ।

मदनपारिजाते हेमाद्रेश्चर्चा दृश्यते । अतो ग्रन्थोऽयं त्रयोदशशतकादनन्तरमेव प्रणीतो भवेत् । रघुनन्दनेन मदनपारिजातस्य चर्चा कृता, तस्मात् षोडशशतकस्य प्रारम्भे एव ग्रन्थोऽयं लोकलोचनमागतः । अत उपर्युक्तविवेचनानुसारं पञ्चदशशताब्दी मदनपारिजातस्य कालो भवितुमर्हति । विश्वेश्वरभट्टस्य कालः चतुर्दशशतकस्योत्तरार्द्धादारभ्य पञ्चदशशतकस्य पूर्वार्द्धमध्ये भवितुमर्हति । मदनपारिजातोऽयं नवस्तवकेन विभाजितोऽस्ति । यथा ब्रह्मचर्यधर्मः, गृहस्थधर्मः, आह्निककृत्यम्, गर्भाधानादिसंस्कारः, जननमरणाशौचम्, द्रव्यशुद्धिः, श्राद्धम्, दायभागः, प्रायश्चित्तञ्चेति ।

## रुद्रधरः -

मिथिलाधर्मशास्त्रकारेषु रुद्रधरोऽन्यतमः । मध्यकालिनधर्मनिबन्धकारेषु रुद्रधरस्य नाम न केवलं मिथिलायाम् अपि तु सम्पूर्णेऽपि भारतदेशे प्रसरितमस्ति ।

अनेन रुद्रधरेण श्राद्धविवेक-शुद्धिविवेक-वर्षकृत्यप्रभृतीनां धर्मशास्त्रीयग्रन्थानां रचना कृता । एते ग्रन्थाः भारतीयसंस्कृतौ सुप्रसिद्धाः सन्ति शुद्धिविवेकनामकनिबन्धग्रन्थे रुद्रधरेण रत्नाकर पारिजात-मिताक्षरा-हारलता-शुद्धिप्रदीय-आचारादर्श-शुद्धिविम्ब-स्मृतिसमुच्चय-हरिहर-श्रीदत्तोपाध्याया-नामुल्लेखो विहितः । एतत्कृतशुद्धिविवेके त्रयः परिच्छेदाः, श्राद्धविवेके चेति चत्वारः परिच्छेदाः सन्ति । उपर्युक्तासु सर्वास्वेव कृतिषु शूलपाणिमतानामुल्लेखो दृश्यते । रुद्रधरस्य कृतीनां चर्चा वाचस्पतिमिश्रेण स्मृतिचिन्तामणौ कृता । शूलपाणेः प्रारम्भिककालो यद्यपि चतुर्दशशतकस्यान्तिम-भागः स्वीक्रियते, तर्हि पञ्चदशशतकस्य पूर्वार्द्ध एव रुद्रधरस्य प्रारम्भिककालो भवतिुमर्हति । एतस्मात् ज्ञायते यत् वाचस्पतिमिश्रात् पूर्वमेव रुद्रधरस्थ समयो भवेत् । अनुमीयते यत् स्मृतिनिबन्धकारवाचस्पतिमिश्रः पञ्चदशशतकस्य मध्यभागादारम्य षोडशशतकस्य पूर्वार्द्धमध्ये निबन्धकार आसीदिति । एवंप्रकारेण रुद्रधरस्य कालः वाचस्पतिमिश्रकृतीनां पूर्वमेव मन्यते । सम्भवतः १४५०-१४६० ख्रीष्टाब्दमध्यभागे रुद्रधरस्य समयो भवितुमर्हति ।

## श्रीधरः -

अयं श्रीधरः दक्षिणभारतीयनिबन्धकारः ब्राह्मणश्चासीत् । अनेन स्मृत्यर्थसारनामको ग्रन्थः लिखितः । ग्रन्थेऽस्मिन् कामधेनु-प्रदीप-कल्पतरु-कल्पलता-बौधायन-गोविन्दराजादीनां नामोल्लेखोऽस्ति । अतोऽस्य कालः कल्पतरुकालादनन्तरं ख्रीष्टीयद्वादशशतके एव भवेत् । अस्य पितुर्नाम विष्णुभट्टः । अयं विश्वामित्रगोत्रीयः ।

स्मृत्यर्थसारे कलिवर्ज्य-संस्कार-उपनयन-ब्रह्मचारीधर्म-विवाहप्रकार-सापिण्डयनिर्णय-गोत्र-प्रवरनिर्णय-आचमनशौचादिविधि-श्राद्ध-अशौच-पाप-प्रायश्चित्त-तीर्थादिविषयाः वर्णिताः सन्ति ।

## अनिरुद्धभट्टः -

अयं चम्पाहट्टीयब्राह्मणः आसीत् । गङ्गातरे विहारपाटकनामके स्थाने लब्धजन्मा । स वङ्ग राजस्य राजगुरुरासीत् । दानसागरनाम्ना ग्रन्थः बल्ला सेनसाहाय्येन अनेन लिखित इति तदीयग्रन्थाद् ज्ञायते । दानसागरस्य रचना ११६९ ख्रीष्टाब्दात्परमभूत् । अतोऽनिरुद्धस्य कालः द्वादशशतकात्पूर्वं भवेत् ।

अनिरुद्धेन हारलता पितृदयिता चेति ग्रन्थद्वयमपि लिखितम् । हारलतायां श्राद्धविषये, पितृदयितायां च सामवेदशिक्षाविषये उल्लेखो दृश्यते ।

## बल्लालसेनः -

अनिरुद्धभट्टस्य शिष्योऽयं बल्लालसेनः आसीत् । अनेन आचारसागरः, प्रतिष्ठासागरः, दान सागरः, अद्भूतसागरश्चेति चत्वारः प्रसिद्धाः ग्रन्थाः विरचिताः । अनेन सर्वेषु ग्रन्थेषु स्वगुरोः अनिरुद्धस्य धर्माध्यक्षरूपेण चर्चा कृता । मदनपारिजात-स्मृतिरत्नाकरयोः दानसागरस्योद्धरणं प्राप्यते । चण्डेश्वरेण दानरत्नाकरे दानसागरस्यापि उद्धारः कृतः । अद्भूतसागरस्य नाम निर्णयसिन्धावपि उपलभ्यते । अनेन विविधपुराण-महाभारतरामायणमतानुमुल्लेखः स्वग्रन्थेषु विहितः । दान सागराद् ज्ञायते यत् ग्रन्थोऽयं १०९०-९१ ख्रीष्टाब्दे रचितोऽभूत् । तस्मात् बल्लालसेनः द्वादशशतकस्य उत्तरार्द्धे अवश्यमेव भवेदिति प्रतीयते ।

## अनन्तदेवः -

अनन्तदेवेन स्मृतिकौस्तुभाख्यो ग्रन्थो विरचित: । ग्रन्थोऽयं संस्काराचार-राजधर्म दान-उत्सर्ग-प्रतिष्ठा-सवंत्सरभेदेन सप्तधा विभक्त: । अनेन विज्ञानेश्वर- अपरार्क-हेमाद्रि विश्वेश्वरभट्ट- विश्वनाथ-गङ्गाधर-रत्नाकरादीनां नामानि स्वग्रन्थे उल्लिखितानि । सप्तदशशतकस्योत्तरार्द्ध एवास्य समय: ।

## काशीनाथोपाध्याय: -

धर्मशास्त्रसाहित्याकाशे सुप्रसिद्धनिबन्धकाररूपेण काशीनाथोपाध्यायस्य स्थानमतीव प्रख्यातम् । अयं काशीनाथोपाध्याय: सोलापुरमण्डलान्तर्गतपण्ढरपुरवास्तव्य: । मराठीकवि: मोरोपन्त: एतस्य कन्याया: श्वशुर आसीत् । मोरोपन्तस्य द्वैतीयकेन पुत्रेण सह स्वकन्याया: आवड्या: विवाहो जात: अयं महाराष्ट्रियब्राह्मण: । अयमपि सम्पूर्णे महाराष्ट्रे वावापाध्ये नाम्ना प्रसिद्ध: । अनेन कमलाकरभट्टकृतनिर्णयसिन्धो: मूलश्लोकान् आश्रित्य धर्मसिन्धु: विरचित: । सर्वेषां कृते ग्रन्थोऽयमुपादेयो भवति । धर्मसिन्धो: रचना १७९० तमे ख्रीष्टाब्देऽभूत् । अयं निबन्धग्रन्थ: सम्पूर्णेऽपि दक्षिणभारते परमप्रामाणिक इति मन्यते । काशीनाथोपाध्याय: स्वजीवनस्यान्तिमे समये संन्यासं गृहीतवान् । तस्य मृत्यु: १८०५-०६ तमे ख्रीष्टाब्दे जात: । एतद्विरचित धर्मसिन्धोरपरं नाम धर्माब्धिसार: धर्मसिन्धुसारो वा भवति । एतद्भिन्नं प्रायश्चित्तशेखर:, ऋग्वेदमन्त्रसारभाष्यम् । वैष्णवतोषणी, वेदस्तुतिनामुपरि भाष्यं चेत्येते ग्रन्था अपि अनेन विरचिता: । अस्य रचनाकाल: १७९०-१८०६ ख्रीष्टाब्दं यावद्भवेत् ।

## जगन्नाथतर्कपञ्चानन: -

विवादभङ्गार्णव: जगन्नाथतर्कपञ्चाननेन विरचित: । सम्पूर्णेऽपि वङ्गदेशेऽयं सुप्रसिद्धनिबन्धग्रन्थ: प्रामाणिकव्यवहारग्रन्थरूपेण आद्रियते । अयं व्यवहारविष्टयको ग्रन्थ: । ग्रन्थोऽयं सरविलियमजोन्समहोदयस्य संरक्षणे प्रणीतो जात: । अस्य पिता श्रीरुद्रतर्कवागीश: संस्कृसाहित्ये एक उद्भट्टो विद्वानासीत् । दर्शनक्षेत्रे अस्य महती ख्यातिरासीत् । एकादशोत्तरैकशतवर्षाणि जीवित: सन् १८०६ तमे ख्रीष्टाब्देऽयं स्वपार्थिवशरीरं तन्यज । अस्य समय: १७९५-१८०६ ख्रीष्टाब्दं यावद् भवितुमर्हति ।

## जितेन्द्रिय: -

जीमूतवाहनेन स्ववृकृतदायभाग-कालविवेक–व्यवहारमातृकादिग्रन्थेषु, रघुनन्दनेन च दायतत्त्वे जितेन्द्रियमतानि उद्धृतानि । मासकृत्यतिथिकृत्य-धार्मिकव्रतनियमादिविषयेषु कालविवेके जितेन्द्रियमतानि प्रमाणरूपेण प्रतिपादितानि सन्ति । अस्य काल: १०००-१०५० ख्रीष्टाब्दमध्ये भवेत् । अयं वङ्गीय इति ज्ञायते ।

## बालक: -

जीमूतवाहनेन दायभागे, रघुनन्दनेन व्यवहारत्त्वे, शूलपाणिना च दुर्गोत्सवविवेके बालकमतानि उल्लिखितानि । अयं पूर्ववङ्गीय इति ज्ञायते । यतो हि सर्वै: पूर्ववङ्गीयनिबन्धकारै: अस्य चर्चा विहिता । व्यवहारविषये प्रायश्चित्तविषये चैतत्कृतग्रन्थानां परमप्रामाण्यं स्वीक्रियते । अस्य काल: ११००-११५० ख्रीष्टाब्दमध्ये भवितुमर्हति ।

## भवदेवभट्ट: -

उत्कलप्रेदाशान्तर्गतभुवनेश्वरस्यानन्तवासुदेवमन्दिरे कस्मिश्चिद् अभिलेखे भवदेवकृता चर्या दृश्यते । यस्याभिलेखस्य समय: ख्रीष्टीयद्वादशशतकं भवतीति वलटन्महोदयस्याभिमतम् । एतत्कृतव्यवहारतिलके व्यवहारविषया: विस्तृतेन वर्णिता: सन्ति । रघुनन्दनमित्रमिश्र-नन्दपण्डितानां ग्रन्थेषु भवदेवमतानि आलोचितानि सन्ति । अस्य द्वितीया कृतिस्तु कर्मानुष्ठानपद्धति: । ग्रन्थोऽयं दशकर्मपद्धतिनाम्नाऽपि प्रसिद्धो वर्त्तते । तृतीया कृतिश्च प्रायश्चित्तनिरूपणम् । चतुर्थकृतिस्तु तोतातितमततिलक: । अत्र पूर्वमीमांसासिद्धान्तानां विचारो दृश्यते । हेमाद्रि: हरिनाथश्च भवदेवमतानि स्वीकुरुत: । अतोऽस्य समय: द्वादशशतकमिति विज्ञायते ।

## शतानन्द: -

पवित्रतमेऽस्मिन् भारतवर्षे धर्मास्त्रसाहित्याकाशे धर्मशास्त्रं प्रति उत्कलीयानामवदानमतीव महत्त्वपूर्णम् । यद्यपि कृत्स्नेऽपि भारतवर्षे सप्तमशतकादारभ्य ऊनविंशशतकं यावत् स्मृतिनिबन्ध- साहित्यक्षेत्रे महान् अभ्युदय: संजात: तथापि उत्कलप्रान्ते प्रायश: एकादशशतकादेवारभ्य स्मृतिनिबन्धग्रन्थरचनायां निबन्धृणां प्रवृत्तिर्जाता । अत्र प्रप्रथमस्मृतिनिबन्धृत्वेन शतानन्दस्य स्थानमतीव गौरवपूर्णम् । आचार्य: शतानन्द: कतिभागेन स्वकीयग्रन्थं

विरचितवान्निति स्पष्टतया वक्तुं नैव शक्यते । तन्नाम्ना ये ग्रन्था दृश्यन्ते तेषु शतानन्दसंग्रहः, भास्वती, शतानन्दरत्नमाला चेति ग्रन्थत्रयं प्रसिद्धम् । एषु शतानन्दसंग्रहः धर्मशास्त्रीयनिबन्धग्रन्थः । ग्रन्थोऽयं यद्यपि संप्रति नैवोपलभ्यते तथापि विभिन्नेषु स्मृतिनिबन्धग्रन्थेषु शतानन्दविरचितस्मृतिवचनानि समुपलभ्यन्ते । भास्वतीनामकः ज्योतिर्निबन्धग्रन्थः भारते प्रसिद्धो वर्त्तते । ग्रन्थस्यास्य नामान्तरं तु पञ्चसिद्धान्तभास्वती । कालविषयकधमार्शास्त्रीयनिर्णयस्तु अत्र विहितोऽस्ति । ग्रन्थोऽयं न केवलम् उत्कलेऽपि तु समग्रेऽस्मिन् भारतवर्षे सुप्रतिष्ठतो वर्त्तते । ग्रन्थस्यास्योपरि द्वाविंशतिसंख्याकाः टीकाः सन्तीति गवेषकाः स्वर्गतहीरालालमहाभागाः प्रतिपादयन्ति । अधोलिखितवचनादस्य समय-जन्मस्थानदिविषये सूचना प्राप्यते । यथा-

**देखाश्ववेखो प्रमिते युगाब्दे**
**दिव्योक्तितः श्रीपुरुषोत्तमस्य ।**
**श्रीमान् शतानन्द इतीदमाह**
**सरस्वती-शङ्करयोस्तनुजः ।।**

अस्माद् वचनात् ज्ञायते यदयमुत्कलस्य श्रीपुरुषोत्तमवास्तव्य इति । ४२०० युगाब्दे १०२१ शकाब्दे १०४९ तमख्रीष्टाब्दे ग्रन्थस्यास्य पूर्त्तिर्जाता । अस्य मातुर्नाम सरस्वती पिता च शङ्करः दिव्यसिंहमहापात्र-गदाधर-कृष्णमिश्र-रघुनाथदासप्रभृतयः स्वस्वग्रन्थेषु प्रामाणिकस्मृतिनिबन्धृत्वेन शतानन्दं स्वीकुर्वन्ति । अस्य रचनाकालः १०९९-११०० ख्रीष्टाब्दमध्ये भवेत् ।

## प्रतारुद्रदेवः -

गजपतिप्रतापरुद्रदेवः उत्कलीयसूर्यवंशस्य तृतीयराजाऽऽसीन् । महावीरप्रतापरुद्रदेवः उत्कलस्य दक्षिणोत्तराञ्चलेषु शत्रून् परिजित्य गौरवस्य विजयवैजयन्ती स्थापितवान् । तस्य राजत्वकाले तत्पृष्ठपोषकतां लब्ध्वा बहवः पण्डिताः ग्रन्थान् लिखितवन्तः । सरस्वतीविलासनाम्ना व्यवहारविषयक- स्मृतिनिबन्धग्रन्थः प्रतापरुद्रदेवनाम्ना प्राप्यते । वस्तुतस्तु तस्य पृष्ठपोषकतायां स्थितेन लोल्ललक्ष्मीधरेण केनचिद् आन्ध्रपण्डितेन ग्रन्थोऽयं लिखितः, प्रतापरुद्रदेवनाम्ना च भणितइति विज्ञायते । भारतवर्षीयधर्माधिकरणेन प्रामाणिकग्रन्थरूपेण व्रिटिस् पी.भी.काउन्सिल्द्वारा ग्रन्थोऽयं इंलण्डदेशेऽनुमोदितः । एतन्नाम्ना प्रतापमार्तण्डः, निर्णयसंग्रहः,

कौतुकाचिन्तामणि रचेत्येते ग्रन्था: प्राप्यते । अस्य आनुमानिकरचनासमय: १४९७-१८३५ ख्रीष्टाब्दमध्ये भवेदिति ।

स्वानुशीलनप्रश्नाः

१.वावापाध्ये नाम्ना क: प्रसिद्ध: ?

(उ)..................................................

२.ब्रिटिस् पी.भी. काउन्सिल्द्वारा क: ग्रन्थोऽनुमोदितो जात: ?

(उ) ...............................................

## सारांश:

प्रियपाठका: ! अस्मिन् अंशे प्रकीर्णशब्दार्थ: प्रकीर्णप्रकरणस्योद्देश्यं च सुष्टु प्रतिपादितम् । ''न दृष्टं यच्च पूर्वेषु सर्वं तत्स्यात्प्रकीर्णवे॰'' इति नारदवचनानुसारं पूर्वप्रकरणेषु येषां सूत्र-स्मृति-भाष्यं-निबन्धकाराणां चर्चा नैव वृ॰ता तेषामेव सूत्र-स्मृति-भाष्य-निबन्धकाराणां देश-काल-वृ॰तिनिरुपणपूर्वकमत्र विचारो विहित: । येन प्रकारेण अप्रसिद्धा अपि धर्मशास्त्रकारा: लोकलोचनमागच्छेयुरिति ।

## पारिभाषिकशब्दा:

(क) प्रकीर्णकम् - ग्रन्थविच्छेद:,Miscellaneous Chapter

(ख) नियोग: - प्राचीनपुत्रोत्पादनविधिविशेष:

(ग) चम्पाहट्टीय: - वङ्गदेशीयब्राह्मणविशेष: ।

(घ) पश्चात्कार: - कात्यायनमतेन उग्रवादविवादादनन्तरं यो निर्णयो दीयते स: ।

(ङ) पूर्त: - खननादिकर्म ।

(च) व्यवहारविज्ञानम् - Legal Procedure.

(छ) कर्मविपाक - असत्कर्मजन्यफलभोग, Suffering due to action.

(ज) भिल्ल: - म्लेच्छजातिविशेष:, Name of a hill tribe.

(झ) वुरुड: - जातिविशेष:

(ञ) धर्माधिकरणम्- धर्मस्थानम्, Low-Court.

## निबन्धात्मकप्रश्ना:

(क) प्रकीर्णशब्दार्थं तदुद्देश्यं च विलिख्य व्यवहारक्षेत्रे कात्यायनस्य योगदानं वर्णयत ।

(ख) भाष्यसाहित्याकाशे असहायस्य वैशिष्ट्यं लिखत ।

(ग) उत्कलीयधर्मशास्त्रकारेषु शतानन्दस्य स्थानं निरूपयत ।

## विश्लेषणात्मकप्रश्ना:

(क) आङ्गिरसस्मृते: वैशिष्ट्यं प्रमाणयत ।

(ख) दक्षस्य प्रसिद्धवचनानि उदाहरत ।

(ग) वङ्गीयधर्मशास्त्रकाराणां महत्त्वमुपपादयत ।।

## लघुप्रश्ना:

(क) भर्तृयज्ञस्य परिचयं लिखत ।

(ख) मारुचे: भाष्यकारत्वेन वैशिष्ट्यं प्रतिपादयत ।

(ग) धारेश्वरभोजदेवस्य कृतीनां परिचयं प्रदत्त ।

(घ) गोविन्दानन्दस्य परिचयं लिखत ।

(ङ) सरस्वतीविलासस्य संक्षिप्तपरियं प्रतिपादयत ।

## एकाङ्कप्रश्ना:

(क) मिताक्षरोपरि सुबोधिनीटीका केन विरचिता ?

(ख) रुद्रधर: कुत्रत्य: ?

(ग) हारलता केन विरचिता ?

(घ) बालकृष्णभट्टकृतटीकाया: नाम किम् ?

(ङ) राजमार्तण्ड: कस्य कृति: ?

(च) गोविन्दानन्दकृतक्रियाकौमुद्या: क: रचनाकाल: ?

(छ) अन्तदेवस्य कृतेर्नाम किम् ?

(ज) काशीनाथोपाध्याय: कीदृश: ब्राह्मण: ?

(झ) विवादभङ्गार्णवः कस्य संरक्षणे विरचितोऽभूत् ?

(ञ) भास्वती कस्य कृतिः ?

# एकाङ्कप्रश्नानामुत्तराणि

(क) विश्वेश्वरभट्टेन ।

(ख) मैथिलः ।

(ग) अनिरुद्धभट्टेन ।

(घ) लक्ष्मीव्याख्यानम् ।

(ङ) धारेश्वरभोजदेवस्य ।

(च) १४३५ ख्रीष्टाब्दः ।

(छ) स्मृतिकौस्तुभः ।

(ज) महाराष्ट्रियब्राह्मणः ।

(झ) सर् विलियमजोन्समहोदयस्य

(ञ) शतानन्दस्य ।

# सहायकग्रन्थाः

(क) History of Dharmashastra by- Dr. P.V.kane BORI, Pune.

(ख) धर्मशास्त्र का इतिहास

अर्जुचौवे काश्यप, हिन्दीसाहित्यसम्मेलनम्, प्रयागः ।

(ग) धर्मद्रुम

राजेन्द्रप्रसादपाण्डेयकृतः, वनारसहिन्दूविश्वविद्यालयः, वाराणसी ।

(घ) उत्कलीयधर्मशास्त्रकाराः

डा० खगेश्वरमिश्रसम्पादितः, ओडिशा ।

(ङ) भारतीयं वृत्तम् ।

राष्ट्रियसंस्कृविद्यापीठम् (मानितविश्वविद्यालयः) तिरुपतिः (आ.प्र.)